परमप्रेमसर्वस्वपूर्णं सम्पूर्णतामगात् ।।
श्रीरस्तु । कल्याणमस्तु ।

2799. भक्तिरसामृतसिन्धुः 'दुर्गसङ्गमनी' टीकासहितः

COLOPHON (Ct.)

श्रीगणपतये नमः । श्रीगोवर्द्धननाथदेवो जयति ।
सनातनसमो यस्य ज्यायान् श्रीमान् सनातनः ।
श्रीवल्लभोऽनुजः सोऽसौ श्रीरूपो जीवसद्गतिः ।।

अथ श्रीमान् सोऽयं ग्रन्थकारः सकलभागवतलोकहिताभिलाषपरवशतया प्रकाशितैः स्वहृदयदिव्यकमलकोषविलासिभिः श्रीमद्भागवतरसैरेव भक्तिरसामृतसिन्धुनामानं ग्रन्थमपूर्वरचनमाचिन्वानस्तद्वर्णयितव्यस्यैव च सर्वोत्तमतां निश्चिन्वानस्तद्व्यञ्जनयैव मङ्गलमासंजयति । एवं सर्व एव ग्रन्थोऽयं मङ्गलरूप इति च विज्ञापयति—अखिलेति ।

OPENING (w.)

ॐ नमो गोपीजनवल्लभाय ।

अखिलरसामृतमूर्तिः प्रसृमररुचिरुद्धतारकापालिः ।
कलितश्यामाललितो राधाप्रेयान् विधुर्जयति ।। १ ।।

हृदि यस्य प्रेरणया प्रवर्तितोऽहं वराकरूपोऽपि ।
तस्य हरेः पदकमलं वन्दे चैतन्यदेवस्य ।। २ ।।

विश्राममन्दिरतया तस्य सनातनो मदीशस्य ।
भक्तिरसामृतसिन्धुर्भवतु सदाऽयं प्रमोदाय ।। ३ ।।

CLOSING & COLOPHON (w.)

इति भक्तिरसामृतसिन्धौ उत्तरविभागे रसाभासलहरी ।
ग्रन्थस्य गौरवभयादस्या भक्तिरसश्रियः ।
समाहृतिः समासेन मया सेयं विनिर्मिता ।।

गोपालरूपशोभां दधदपि रघुनाथभावविस्तारी ।
तुष्यतु सनातनोस्मिन्नुत्तरविभागे रसाम्भोधेः ।।

इति श्रीभक्तिरसामृतसिन्धौ गौणभक्तिरसादिनिरूपणं नाम चतुर्थो विभागः ।४।
समाप्तोऽयं भक्तिरसामृतसिन्धुरिति ।

रामाङ्कशुक्रगणिते १४६३ शाके गोकुलमधिष्ठितेनाऽयम् ।
भक्तिरसामृतसिन्धुर्विटाङ्कितः क्षुद्ररूपेण ।।

CLOSING & COLOPHON (Ct.)

तेषां दीनमन्यतामयपाठेऽपि तदसहिष्णुः सरस्वती क्षुद्रं सूक्ष्मं दुर्ज्ञेयं रूपं स्वरूपं यस्येति गत्यन्तरास्पदपदं स्फोरयन्ती समाहितवती-

श्रीकृष्णः सर्वपूर्णः स चरति विपुले गोकुले व्यक्ततत्त्त्वा-
न्माधुर्यैश्वर्यवर्यः स च···शुपानन्तलक्ष्मीभिरिष्टः (?) ।
श्रीराधावर्गमध्ये स च मधुरगुणश्रीधुराधामधारी-
त्यस्मिन् ग्रन्थे रसाब्धावभिमतमहिमाधारसारप्रचारः ।।

यदपि च नातिविशुद्धा तदपि च सद्भिः कदाप्युरीकार्या ।
दुर्गमसङ्गमनीयं नौकेवाऽस्यामृताम्भोधेः ।।

समाप्तेयं टीका तेषामेव प्रीतये भवतु ।।

श्रीगोपाल ।

Post-Colophonic: अथ शुभसंवत्सरेऽस्मिन् श्रीनृपतिविक्रमादित्यराज्ये संवत् १८१५ शाके १६८० माघकृष्णपक्षे तिथौ १३ भृगौ । श्रीगंगायमुनयोर्मध्ये । अन्तर्वेदे नग्र खैर राज्य स्थानाय इदं पुस्तिक लिखितं ब्राह्मण सन्नाहमोचकस्य उपाध्या हरिपरताप । पठनार्थं चिरंजीव श्रीमहाराजश्रीकुवर चम्पारांम । शुभं भूयात् ।

2801. भक्तिरसामृतसिन्धुबिन्दुः

OPENING: श्रीराधाविनोददेवो जयति ।

श्रीरूपवाङ्मधूली धूली तत्पादपङ्कजप्रभवा ।
एते मम जीवातुर्वातुलस्यास्तु भूयास्ताम् ।।१।।
अन्याभिलषिताशून्यं ज्ञानकर्माद्यनावृतम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ।।२।।

CLOSING & COLOPHON: इति भक्तिरसामृतसिन्धोर्बिन्दुः सम्पूर्णः ।

अनधीतव्याकरणश्चरणप्रवणो हरेर्जनो यः स्यात् ।
भक्तिरसामृतसिन्धुर्विन्दतु तं बिन्दुरूपेण ।।

2803. भक्तिवर्द्धिनी

OPENING: यथा भक्तिः प्रवृद्धः (द्धा)स्यात् तथोपायो निरूप्यते ।
बीजभावे दृढे तु स्यात् त्यागात् श्रवणकीर्त्तनात् ।।१।।

CLOSING: इत्येवं भगवच्छास्त्रं गूढं तत्त्वं निरूपितम् ।
यत एतत् समधीर्येव(त्यैव)तस्यापि स्याद् दृढा रतिः ।। ११ ।।

COLOPHONE: इति श्रीवल्लभाचार्यकृतौ भक्तिवर्द्धिनी सम्पूर्णा ।

2827. भगवद्भक्तिविलासः सटीकः

OPENING (ct.): श्रीकृष्णाय भग[व]ते नमः ।

दया(तमा)दिशक्तिप्रदमीश्वरं यद् दातुं स्व[भ]क्ति कृपयावतीर्णम् ।
चैतन्यदेवं शरणं प्रपद्ये यस्य प्रसादात् स्ववशोर्थसिद्धिः ।। १ ।।

लिख्यते भगवद्भक्तिविलासस्य यथामति ।
टीका दिग्दर्शिनी नाम तदेकांशार्थबोधनी ।।

सुदुःकरे कर्मणि प्रवर्त्तमानो ग्रन्थकारस्तत्संसिद्धये प्रथमपरमगुरुरूपं श्रीमदिष्टदैवतं शरणत्वेनाश्रयति चैतन्येति ।

OPENING (w.) चैतन्यदेवं भगवन्तमाश्रये श्रीवैष्णवानां प्रमुदेऽञ्जसा लिखन् ।
आवश्यकं कर्म विचार्य साधुभिः सार्द्धं समाहृत्य समस्तशास्त्रतः ॥२॥

भक्तेर्विलासांश्चिनुते प्रबोधानन्दस्य शिष्यो भगवत्प्रियस्य ।
गोपालभट्टो रघुनाथदासं सन्तोषयन् रूपसनातनौ च ॥

मथुरानाथपादाब्जप्रेमभक्तिविलासतः ।
जातं भक्तिविलासाख्यं तद्भक्ताः शोभयन्त्विमम् ॥३॥

CLOSING : सदा सदाचारपरास्तु ये नरा भवन्ति दामोदरपादपेक्षया ।
तदीयपादाम्बुजधूलिधूसरं कदा भवेदस्य शिरोऽधमस्य मे ॥

श्रीनन्दसुन्दरमुकुन्दपदारविन्दप्रेमामृताब्धिरसतुंदिलमानसा ये ।
नानार्थवृन्दमनुसंदधते न च स्वं तेषां पदाब्जमकरन्दमधुव्रतः स्याम् ॥

COLOPHON : इति श्रीगोपालभट्टलिखिते श्रीभगवद्भक्तिविलासे प्रासादिको नाम विंशतिमो विलासः ॥ २ ॥

Post-Colophonic : ग्रंथ हरिभक्तिविलास लीखतं जयनगरमध्ये पुस्तकं मीती आसोज बदि २ संमत १८६७ का लीखतं गोवंदराम लेखकः । शुभं भूयात् ॥

हरिभक्तिविलास ग्रंथसंख्या २५००० पत्र संख्या ६७१ ।

2829 भगवल्लीलाचिन्तामणिः

OPENING: श्रीगणेशाय नमः ।

श्रीनीलाचलचन्द्रं चेतसि रुचिरं विचिन्तयामि चिरम् ।
यद्रुचिरुचिता रचयति परिचयमार्य्यं तमोऽपचयम् ॥१॥

जन्माद्यस्येति पद्यस्य हृद्यन्तस्थो हरिर्मम ।
व्याख्यातं भगवल्लीलाचिन्तामणिमरीरचत् ॥२॥

नैतद् व्यासानभिमतमित्याशंक्यं बुधैर्यतः ।
साक्षिणी मम मन्दस्य प्रेर्या मन्दा मनीषिका ॥ ३ ॥

प्रथमस्कन्धमारभ्य प्रमेयार्थान् महामुनिः ।
द्वादशस्कन्धपर्यन्तं मामि(तानि)दानीमलीलिखत् ॥ ४ ॥

CLOSING : आसीच्छ्रीविश्वनाथः प्रवरतरभरद्वाजवंशावतंसः,
शान्तात्मा कृष्णभक्तोऽभवदथ तनुजो यस्ततो रामचन्द्रः ।
तत्पुत्रश्चित्रकाव्यागमरचनपटुः श्रीजगोविन्दनामा,
तस्यासीन्नन्दनो यः सकलगुणकलावन्दितः कृष्णचन्द्रः ॥१॥

तस्यात्मजः कमललोचननामधेयः,
श्रीनीलशैलनिलयः कलयन्नकस्मात् ।
कौतूहलं हृदि हरेर्ज(ग)दीशलीला-
चिन्तामणिं विवृतिमारचयांचकार ॥२॥

श्रीमद्व्यासमहामुनिर्विहितवान् वेदान् पुराणान्यपि,
यस्यैवापरितुष्य नारदमुनेर्लब्ध्वा निदेशं हि यत् ।
श्रीमद्भागवतं हि शब्दभगवद्रूपं स्वसन्तोषकृत्,
तस्य श्रीभगवत्त्वबोधनकृते प्रामाण्य[मा]दर्शयत् ॥३॥

जन्माद्येत्यादि नान्दीमिह तु विहितवानद्भुताचिन्त्यशक्तिः,
स्वाभाव्यात्तत्र संदर्शयितुमिव नवं चारुकारुण्यभावात् ।
मद्धीराविश्चकार प्रविततविवृतिं तत्प्रये(मे)यान्यनेकै-
रर्थैरत्यर्थमेतां तदियमुरुधियास्तत्कृतैवेति बोध्यम् ॥४॥

यद्यस्ति सम्बन्धहृवन्ति (हृति) विरोधप्रतीतिरच्युतसंस्कृतत्वम् ।
सर्वं तु बोढव्यमिदं तदीयं सम्बन्धतस्तत्र खलु स्वतोऽस्ति ॥५॥

COLOPHON: इति श्रीभगवल्लीलाचिन्तामणौ श्रीभागवतनान्दीपद्यव्याख्याने द्वादशस्कन्धार्थदिग्दर्शनं समाप्तोऽयं ग्रन्थः ॥

Post-Colophonic: संवत् १९०६ मिती श्रावणशुक्ल १५ लिखायितं भटजी श्रीहरिवल्लभजी चिरंजीव जनकुलालजीशर्म्मभिः । लिखिकृतं चिरंजीव रामनारायणेन । पत्तनपुरनिवासिनोऽयं ग्रन्थः ।

2830. भागवतसन्दर्भे कृष्णसन्दर्भः

OPENING: श्रीवृन्दावननाथाय भगवते श्रीकृष्णाय नमः । श्रीवृन्दावनाधीश्वर्यै भगवत्यै श्रीराधिकायै नमः । श्रीमत्कृष्णचैतन्यदेवाय भगवते नमः । श्रीश्रीगुरुचरणाम्बुजेभ्यो नमः ।

तौ सन्तोषयता सन्तौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद् विविच्यते ॥

तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितम् ।
पर्यालोच्याऽथ पर्यायं कृत्वा लिखति जीवकः ॥

अथ पूर्वं सन्दर्भत्रयेण यस्य सर्वपरत्वं साधितं तस्य श्रीभगवतो निर्द्धारणाय सन्दर्भोऽयमारभ्यते ।

CLOSING: गौरश्यामरुचोज्ज्वलाभिरमलैरक्ष्णोर्विलासोत्सवै-
र्नृत्यन्तीभिरशेषमादनकलावैदग्ध्यदिग्धात्मभिः ।
अन्योन्यप्रियतासुधापरिमलस्तोमोन्मदाभिः सदा.
राधामाधवमाधुरीभिरभितश्चित्तं ममाक्रम्यताम् ॥

Post-Colophonic : इति कलियुगपावनस्वभजनविभवदानभजनप्रयोजनावतार-श्रीश्रीभगवत्कृष्णचैतन्य-देवचरणानुचर-विश्ववैष्णवराजसभासभाजनभाजन-श्रीरूपसनातनानुशासनभारतीगर्भे श्रीभागवतसन्दर्भे श्रीकृष्णसन्दर्भो नाम चतुर्थः सन्दर्भः ।

जयतां व्रजवनाधीशौ ।

2833. भागवतसन्दर्भे–तत्त्वसन्दर्भः

OPENING : श्रीगणेशाय नमः । श्रीगोपीनाथो जयति ।

कृष्णवर्णं त्विषाऽकृष्णं साङ्गोपाङ्गास्त्रपार्षदम् ।
यज्ञैः संकीर्त्तनप्रायैर्यजन्ति हि सुमेधसः ॥१॥

अन्तःकृष्णं बहिर्गौरं दर्शिताङ्गादिवैभवम् ।
कलौ संकीर्त्तनाद्यैः स्मः कृष्णचैतन्यमाश्रिताः ॥२॥

जयतां मथुराभूमौ श्रीलरूपसनातनौ ।
यौ विलेखयतस्तत्त्वज्ञापकौ पुस्तिकामिमाम् ॥३॥

कोऽपि तद्बान्धवो भट्टो दक्षिणद्विजवंशजः ।
विविच्य व्यलिखद् ग्रन्थं लिखिताद् वृद्धवैष्णवैः ॥४॥

तस्याद्यं ग्रन्थनालेख्यं क्रान्तव्युत्क्रान्तखण्डितम् ।
पर्यालोच्याथ पर्यायं कृत्वा लिखति जीवकः ॥५॥

यः श्रीकृष्णपदाम्भोजभजनैकाभिलाषवान् ।
तेनैव दृश्यतामेतदन्यस्मै शपथोऽर्पितः ॥६॥

अथ नत्वा मन्त्रगुरून् गुरून् भागवतार्थदान् ।
श्रीभागवतसन्दर्भं सन्दर्भं वच्मि लेखितुम् ॥७॥

यस्य ब्रह्मेति संज्ञां क्वचिदपि निगमे याति चिन्मात्रसत्ता-
प्यंशो यस्यांशकैः स्वैर्विभवति वशयन्नेव मायां पुमांश्च ।
एकं यस्यैव रूपं विलसति परमव्योम्नि नारायणाख्यं,
स श्रीकृष्णो विधत्तां स्वयमिह भगवान् प्रेम तत्पादभाजाम् । ८॥

COLOPHON : इति कलिजुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीभगवत्कृष्णचैतन्यदेवचरणा-नुचरविश्ववैष्णवराजसभासभाजनभाजन-श्रीरूपसनातनानुशासनभारतीगर्भे श्रीभागवत-सन्दर्भे तत्त्वसन्दर्भो नाम प्रथमः सन्दर्भः ।

श्रीकृष्णराधाकान्तचरणैकतानमानसेभ्यो नमः । श्लोकसंख्या ४८० । श्रीशुभं भवतु ।

Post-Colophonic : संवत् १८२५ फागुणकृष्ण २ बुधवारे लिप्य कृतम् ॥श्री॥

2836. भागवतसन्दर्भे परमात्मसन्दर्भः

OPENING:

श्रीराधावल्लभो जयति ।
अथ परमात्मसन्दर्भः ३ ।
तौ संतोषयता संतौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद् विविच्यते ।। १ ।।
तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितम् ।
पर्यालोच्याथ पर्यायं कृत्वा लिखति जीवकः ।। २ ।।

अथ परमात्मा विव्रियते तत्र तं जीवनिरूपणपूर्वकं निरूपयति ।

COLOPHON: इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीभगवत्कृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनभाजन-श्रीरूपसनातनानुशासनभारतीगर्भे श्रीभागवतसन्दर्भे परमात्मसन्दर्भो नाम तृतीयः सन्दर्भः ।। ३ ।। अनेन श्रमेण श्रीराधाकृष्णौ प्रीयेताम् ।

Po t-Colophonic: लिखितमात्मपठनार्थं व्यासहरिलालेन जून्यां वासिना श्रीवृन्दावनवासिना मनसा । सं. १८२० मिति फाल्गुन कृष्ण ८ शुक्रवासरे जैनगरे श्रीविजैगोपालजी के मंदिर विषै । श्रीराधावल्लभो जयति । अतः परं श्रीकृष्णसन्दर्भो भविष्यति ।

2838. भागवतसन्दर्भे प्रीतिसन्दर्भः

OPENING

श्रीराधावल्लभाय नमः ।
तौ सन्तोषयता संतौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद् विविच्यते ।।
तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितम् ।
पर्यालोच्याथ पर्य्यायं कृत्वा लिखति जीवकः ।।२।।

अथ प्रीतिसन्दर्भो लेख्यः । इह खलु शास्त्रप्रतिपाद्यं परमतत्त्वं हि सन्दर्भचतुष्टयेन पूर्वं सम्बद्धं तत्तदुपासना च तदनन्तरसन्दर्भेणाभिहिता । तत्क्रमप्राप्तत्वेन प्रयोजनं खल्वधुना विविच्यते ।

CLOSING: (on f. 1 9 .

नो इति । धत्ते पदं त्वमविता यदि विघ्नमूर्द्ध्नीत्यादिवत् अत्र चेच्छब्दोऽपि निश्चये । ततश्च यस्मात् चेत् निश्चितमेव वयं ते तव विरहाग्न्युपयुक्तदेहा नो भवामः, ततो ध्याने विषयेऽपि तव पदयोः पदवीमपि न यामः न स्पृशामः । सखे इति सम्बोध्य प्राचीनमिथो बाल्यक्रीडा ग...सौहृदा प्रकटनेन निज..................

2939. भागवतसन्दर्भे भक्तिसन्दर्भः

OPENING:

श्रीराधावल्लभो जयति ।
अथ भक्तिसन्दर्भः ।
तौ सन्तोषयता संतौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद् विविच्यते ।।१।।

तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितम् ।
पर्यालोच्याथ पर्यायं कृत्वा लिखति जीवकः ।।२।।

अत्र पूर्वं सन्दर्भचतुष्टयेन सम्बन्धो व्याख्यातः । तत्र पूर्णसनातनपरमानन्दलक्षण-परतत्त्वरूपं सम्बन्धि च । ब्रह्म परमात्मा भगवानिति त्रिधाविर्भावितया शब्दितमिति निरूपितम् । तत्र च भगवत्त्वेनैवाविर्भावस्य परमोत्कर्षः प्रतिपादितः । प्रसङ्गेन विष्णु-वाद्याश्चतुः सनाद्याश्च तदवतारा दर्शिताः ।

CLOSING : गुरुः शास्त्रं श्रद्धा रुचिरनुगतिः सिद्धिरिति मे
यदेतत्तत्सर्वं चरणकमलं राजति ययोः ।
कृपापूरस्यन्दस्नपितनयनाम्भोजयुगलौ,
सदा राधाकृष्णावगतिगतिदौ तौ मम गतिः ।।१।।

COLOPHON : इति कलियुगपावनस्वभजनविभजनप्रयोजनावतार-श्रीश्रीभगवत्कृष्णचैतन्यदेव चरणानुचर-विश्ववैष्णवराजसभासभाजनाभाजन-श्रीरूपसनातनानुशासन - भारतीगर्भे-श्रीभागवतसन्दर्भे-भक्तिसन्दर्भो नाम पञ्चमः सन्दर्भः ।५। श्रीराधावल्लभो जयति । श्रीचन्द्रोजयतितराम् ।

Post-Colophonic : संवत् १८२० माघशुक्ल १२ मंगलवासरे लिखितमिदं श्रीभक्तिप्रवर्द्धनार्थं माया-वादनिरासार्थं जून्या-ग्रामवासिना व्यास-हरिलालेन स्वपठनार्थं जयनगरे श्रीविजै-गोपालजीकानामालयस्थाने । लेखकपाठकयोः शुभं भूयात् । अतः परं प्रीतिसन्दर्भो भविष्यति ।

2840. भागवतसन्दर्भे भगवत्सन्दर्भः

OPENING : श्रीकृष्णो जयति ।

तौ सन्तोषयता संतौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद् विविच्यते ।।

तस्याद्यं ग्रन्थनालेखं क्रान्तयुत्क्रान्तखण्डितम् ।
पर्यालोच्याथ पर्य्यायं कृत्वा लिखति जीवकः ।।

अथैवमद्वयज्ञानलक्षणं तत्तत्त्वं सामान्यतो लक्षयित्वा पुनरुपासकयोग्यतावैशिष्ट्येन प्रकटितनिजसत्ताविशेषं विशेषतो निरूपयति वदन्तीत्यस्यैव उत्तरार्द्धेन । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ।

COLOPHON : इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीभगवत्कृष्णचैतन्यदेव-चरणानुचरविश्ववैष्णवराजसभासभाजनभाजन - श्रीलरूपसनातनानुशासनभारतीगर्भे-श्रीभागवतसन्दर्भे भगवत्सन्दर्भो नाम द्वितीयः सन्दर्भः ।२।

अनेन श्रीकृष्णः प्रीणातु । श्रीकृष्णाय नमः । श्रीकृष्णचैतन्यचरणा(२) विन्दे-भ्यो नमः । २७००

2843. राधामाधवलीला

OPENING : श्रीगणेशाय नमः । श्रीराधावल्लभो जयति । ॐ

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं सन्ततो जयमुदीरयेत् ॥१॥

द्विभुजं मुरलीहस्तं श्यामसुन्दरविग्रहम् ।
वाञ्छासिद्धिप्रदातारं श्रीकिशोरीरमणं भजे ॥२॥

श्रीवृषभानुकिशोरिकामलहृतां वृन्दावनाधीश्वरीं,
श्रीराधां प्रणमामि......मनसा वाचा च कायेन वै ।
यन्नेत्रान्तविलोकनेन भगवान् प्रीणाति वंशीधर-
स्तां श्रीकृष्णप्रियां नमो भग [व] तीं दासीं निजां मां कुरु ॥३॥

शम्भूराममिश्र(?)विहारिमभजत् सस्तौ जले यामुने,
स्थित्वा नाभिमिते जजाप प्रणवं सन्ध्यादिकं सोऽकरोत् ।
तत्रैवाविभूत् मुरारिकृपया गोपालमूर्तिः स्वयं,
सो मे शं विदधातु वाञ्छितप्रदो श्रीमान् किशोरीप्रियः ॥४॥

जयनगरे जयमन्दिरे जयति यः जै श्रीकिशोरीप्रभो,
जयगोस्वामिविनिर्मिते रतिप्रदे पूज्ये स्वपीठे स्थितः ।
जय जय गौरिनिभे व्रजेन्द्रतनये कृष्णप्रिये राधिके,
जय जय जय निजदासिकां कुरुस्व मां पादाब्जसेवापराम् ॥५॥

एकदा सस्मितं प्राह मातरं मातृवत्सलः ।
देहि मे दोहिनीं मातः दुहिष्याम्यहमद्य गाः ॥६॥

CLOSING : श्रीमान् किशोरीरमणस्य-सेवकः,
गौडान्वयेऽभून (न्न)वनन्दशर्मा ।
गोस्वामिमिश्रेति च ख्यापितामित-
स्तस्यात्मजोऽकारि विहारिणः कथा ॥१॥

राधागोविन्दनामा यः श्रीमद्भागवताश्रयः ।
जैपुराख्ये पुरे रम्ये रचितेयं शुभा कथा ॥२॥

न जाने व्याकरणं क्वचिदपि न जा [ने] सुकवितां,
न जाने छन्दोज्ञान् क्वचिदपि न जा [ने] श्रुतिपथम् ।
न जाने सिद्धान्तं क्वचिदपि न जा [ने] सुरचितुं,
जडोन्मत्तो मूढस्तदपि रचितं साहसमहम् (?) ॥३॥

स्वस्य चित्तप्रसादाय वर्णिता माधवी कथा ।
यदि शुद्धा ह्यशुद्धा वा शोधनीया मनीषिभिः ॥३ ॥

क्षन्तव्यं द्विजवर्य्यैर्मे पण्डितैः काव्यनैपुणैः ।
यद्यशुद्धा भवेत् क्वापि तर्हि शुद्धां करोत्विमाम् ॥५॥

COLOPHON: इति श्रीकिशोरीरमणपदाब्जभ्रमरिकामिश्रगोस्वामीराधागोविन्दकृतराधामाधवची(क्री)डा ।

2844. रामनवरत्नसारः

OPENING: श्रीसीतापतये नमः ।

श्लोक—

मत्स्यः कूर्मो वराहो नरहरिरतुलो वामनो जामदग्निः,
सभ्राता (भ्रातः) कंसशत्रुः करुणमयवपुर्म्लेंक्षविध्वंसनं च ।
एते चान्येपि सर्वे तरणिकुलभुवो यस्य जाताः कलांशै-
स्तं व्याप्तं ब्रह्मतेजोविमलगुणमयं रामचन्द्रं नमामि ॥१॥

सर्वे लोकाः सशोभास्तदुपरि सुषमा मूलरूपात्वयोध्या,
तस्यां रामस्ससीतो विहरति सततं भृत्यसंवेष्टिते (तः)च ।
अद्वैताखण्डरूपो विमलसुखमयो ब्रह्महर्षप्रयुक्तो,
यं ध्यायन्त्येव नित्यं विधिहरिगिरिशाश्चापि सर्वे तथान्ये ॥२॥

नित्यं नौमि गुरुं गणेश्वरमजं देवीं तथा भारतीं,
शेषं चैव तथा शिवं कपिवरं व्यासं च कुम्भोद्भवम् ।
वाल्मीकिं च सुरर्षिमेव सशुकं तीर्थं सरय्वादिकं,
साकेतादिपुराणरामचरणश्चान्तःपुरानन्ददम् ॥३॥

श्रीरामायणवेदशास्त्रगदितं तत्त्वं परं नाटके,
पत्रं च स्मृतिसंहितासु मुनिभिः सारं पुराणेष्वपि ।
श्रीरामस्य रसं विरञ्चिहनुमद्व्यासादिभिः शम्भुना,
नाम्ना गुम्फति भक्तरामचरणाख्यो मालिकां तन्मयीम् ॥४॥

CLOSING: काश्मीरीतिलकालकावृतमुखं सावीक्षणं सस्मितं,
ताम्बूलाधरपल्लवं रसमयं नासाग्रमुक्ताफलम् ।
ध्यायेच्छत्रसुदिव्यचामरयुतं साकेतरत्नासने,
जानक्यंसभुजं सखीगणवृतं नित्यं निकुञ्जे स्थितम् ॥६४॥

पद

जो मन राम सुधारस पावै ।

तौ कत सकल विषय मृग जल लखि त्रिषित वृथा उठि धावै ।
अभय करो सब विधि श्रीमुख कहि सकत सरन कोउ आवै ॥
तौ कत विषय विवस सुर नर मुनि तिन कहू वादि म(भ्र)मावै ।
श्रीरघुवीर भक्ति चिन्तामणी संसृत वेगि मिटावै ॥

तेहि तजि ज्ञान जोग तप साधै श्रम फल सब श्रुति गावै ।
अमित मदनछवि राम रूप रुचि हृदय नयन लखि आवै ।।
तौ कत त्रिभुवन रूप जहां लौं लपि सठ जन्म नसावै ।
जो श्रीराम-कृपा प्रताप गुन श्रीगुर शरण लखावै ।।
तौ कत डरै लोक जमकाल ही सकल राम दरसावै ।
यह सिय वरनौं रत्नमनोहर द्वादश रस हि जनावै ।
रामचरण नित पठत सुनत जो सो रघुवर मन भावै ।।६५।।

COLOPHON : इति श्रीरामनोरत्नसारसंग्रहे श्रीरामरूपगुणप्रतापशरणागतद्वैताद्वैतभेदवर्ननं नाम नवमस्तरंगः ।।९।।

2846. विष्णुभक्तिचन्द्रोदयः

OPENING : ।।दं।। ॐ नमः परमात्मने श्रीपुरुषोत्तमाय ।

वन्दे श्रीमन्नृसिंहेशं पुण्यारण्यं गुरूत्तमम् ।
श्रीसामं मन्त्रराजं च वैष्ण......सिद्धये ।।
आविर्बभूव लोकेस्मिन् सद्भक्ताह्लाददायकः ।
श्रीविष्णुभक्तिचन्द्रोऽयं विष्णुप्रेमाब्धिवर्द्धनः ।।
यस्य श्रुतेरेककलात्मकस्य हृधाद्यनेकाद्यतमः प्रवन्धः ।
शैथिल्यमेतीन्द्रियघातशान्त्या नानान्तरायाभ्रगतैह...याम् ।।
वक्ष्ये निरन्तराशेषदुर्ज्जन्मान्धकारविध्वंसिनम् ।
स्मृत्वा प्रणम्य चादौ गुरुं श्रीविष्णुभक्तिचन्द्रोदयम् ।।

CLOSING : (on f. 81) इति श्रीनृसिंहारण्यमुनिविरचिते श्रीविष्णुभक्तिचन्द्रोदये पञ्चदशं कलापम् ।

on f. 82)

एवमाराधयेद् विष्णुं भगवन्तं श्रिया[युतम्] ।
कृतकृत्यो भवेन्नित्यं विश्वस्योद्धरणे प्रभुः ।।
श्रीविष्णुभक्तिचन्द्रोदयं स तु षोडशकलाद्भुतः ।
सेव्यतां सेव्यतां...............द्भक्तिवर्द्धनः ।।
पुण्यदोयं............मदानन्द .... ।
.........तमं चैतत् कासीसं प्रतिराजतौ ।।
..................................।
.....................ग्रन्थं महामुनिः ।।

COLOPHON : इति श्रीनृसिंहारण्य..................................समाप्तम् ।।

Post-Colophonic : श्रीः संवत् १५४८ वर्षे कार्त्तिक शु० १३ शुक्र अद्येह श्री....................
....................तीय महं कान्ह सुत महं वैकुण्ठपुत्रपौत्राणामध्ययनार्थं स्व-हस्तेन लिखितमिदम् । लेखकपाठकयोः शुभं भवतु कल्याणमस्तु ।

2848. विष्णु महोत्सवमाला

OPENING : श्रीगणेशाय नमः । श्रीकृष्णाय नमः ।

मण्डलीकृतसमस्तवल्लवः कुण्डलीकृतकदम्बपल्लवः ।
आविरस्तु हृदि मे विरोचनः, पुण्डरीकदलदीर्घलोचनः ॥१॥

श्रीमद्गोकुलचन्द्रेण नानाग्रन्थं...............।
गुथ्ये भक्तक...ढार्थं हरेरुत्सवमालिकाम् ॥

COLOPHONE : ईती श्रीमदात्रेयश्रीबालकष्ट (कृष्ण) भट(ट्ट) सूत(सुत) कविकेसरीग्रथिता श्रीविष्णोर्महोत्सवमाला समाप्तः ।

Post-Colophonic : श्री सं० १८६५ ना वर्षे पौस सूद ७ वार रवी लखीतंग मेता षसाल जगनाथ वालमज्ञाती श्रीरस्तु कल्यांणमस्तुः शुभ भवतुः श्री श्री श्री श्री नैयणे संधू समाप्ता ।

2849. शतसूत्रीयभाष्यं सटीकम्

OPENING : श्रीगणेशाय नमः ।

प्रपद्य परमं देवं श्रीस्वप्नेश्वरसूरिणा ।
शाण्डिल्यशतसूत्रीयभाष्यमाभाष्यतेऽधुना ॥१॥

गोविन्दचरणद्वन्द्वमधुनो महदद्भुतम् ।
यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः ॥२॥

CLOSING : परिवीतपीतवसनं घनोपमं शतपत्रपत्रसदृशायतेक्षणम् ।
धृतवेणुरेणुपरिमण्डितं गवां हृदि वोस्तु कौस्तुभविभूषणं महः ॥१॥

गौडक्ष्मावलये विशारद इति ख्यातादभूद्भूमणे[:],
सर्वोर्वीपतिसार्वभौमपदभाक् प्रज्ञावतामग्रणीः ।
तस्मादास जलेश्वरो बुधवरः सेनाधिपः क्ष्माभृतां,
स्वप्नेशेन कृतं तदङ्गजनुषैतद्भक्तिमीमांसनम् ॥२॥

COLOPHON : इति श्रीस्वप्नेश्वराचार्यविरचिते शतसूत्रीयभाष्ये तृतीयाध्यायस्य द्वितीयमाह्निकं समाप्तस्तृतीयोध्यायः । शुभं भूयात् ।

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखतं मया ।
यदि शुद्धमशुद्धं वा मम दोषो नीयते ॥

Post-Colophonic: संवत् १८२८ लिषतं व्यास रामरतननेन अत्मपठनार्थं मिति भाद्रव सुदि ८ शनीशरवार ।

2850. स्मरणदर्पणः सटीकः

OPENING : श्रीकृष्णचैतन्यचन्द्राय नमः ।

प्रणम्यादौ कृपादृष्टिकृतार्थकृतभूतलम् ।
सर्ववाञ्छाकल्पतरुं गुरुं श्रीपुरुषोत्तमम् ॥

प्रथमे वंदिव गुरुः वांछा कलपतरुः ।
कृष्णप्राप्तिरये हों ह्यमूल ।

CLOSING : श्रीगोपालभट्टपद हृदये मोर सतत ।
इहा विनु सार नाहि माय, केहो ना करिह रोस ।
क्षेमिया सकल दोष, येन कहि बालकेर भाष ।
सुन रे रसिक भाइ, स्मरण दर्पण एइ ।
ये कहिल रामचंद्रदास ।

COLOPHON : इति स्मरणदर्पन ग्रंथ संपूर्णः । इति ।

2851. शङ्कानिराकरणम्

OPENING : ....वान् ।
on f. 2) आहुस्तामृषयः सर्वे देवर्षिर्नारदस्तथा ॥१०॥

असितो देवलो व्यास इति गीतासु दर्शनात् ।
तापनीयश्रुतिषु च तथात्वप्रतिपादनात् ॥११॥

CLOSING : इति श्रीवल्लभाचार्यचरणाम्बुजचिन्तया ।
खलालपनविध्वंसं कृतवान् पुरुषोत्तमः ॥२६॥

COLOPHON : इति श्रीपीताम्बरतनुजश्रीपुरुषोत्तमकृतं भगवत्शृङ्गारविषयकं स्वामिन्यष्टकविषयकं सरस्वतीस्थापनविषयकं शंकानिराकरणं सम्पूर्णम् ।छ।

2923. गन्धर्वजीवदानमहापुरुषस्तोत्रम्

OPENING : श्रीश्रीकृष्णाय नमः ।

देवाः सर्वे ब्राह्मणेन मोहिता विष्णुमायया ।
प्रययुर्मालतीमूलं ब्रह्मे शानुपुरोगमाः ॥१॥

ब्रह्मा कमण्डलुजलं ददौ गात्रे शवस्य च ।
सञ्चारमनसस्तस्य चकार सुन्दरं वपुः ॥२॥

सौतिरुवाच

CLOSING: (मालावती धर्नं) भयान् मुच्येत भीतस्तु धनं नष्टधनो लभेत् ।
दस्युग्रस्तो महारण्ये हिंस्रजन्तुसमन्वितैः(ते) ॥४७॥

दावाग्निदग्धो मुच्येत निमग्नश्च जलार्णवे ।

COLOPHON : इति श्रीब्रह्मवैवर्ते महापुराणे ब्रह्मखण्डे गन्धर्वजीवदानमहापुरुषस्तोत्रप्रनयनं ना[मा]ष्टादशोऽध्यायः ।

3038. रामस्तवराजस्तोत्रं सटीकम्

OPENING :

श्रीजानकीनाथाय नमः ।

अथ राम अस्तवराज की टीका लिख्यते—दोहा—

श्रीगुर प्रथम प्रणाम करि, मंगल मोद निधान ।
रामरूप रस सिंधु मह, पीन मीन अनुमान ॥१॥

नगर दिलीप सुहावनो, परिपूरण सुखधांम ।
नृपति परीक्षत राज तह, गुण मंदिर सह वांम ॥२॥

तिनके तनय उदार गुण, कीरति विदिसिन मांहि ।
विनय सर्व जय सर्व मधि, नृप वहादुरी जाहि ॥३॥

महारानी अति विमल गुण, सील रूप जग जांन ।
श्रीरघुवर पदपदुमजुग, ललित भृंगि अनुमांन ॥४॥

तिन कृत आश्वासन सुभग, वरनौ मति अभिरांम ।
रामचन्द्र अस्तवतिलक - भाषा ललित ललांम ॥५॥

संवत् दस नव एक सुभ, जानि समय अनुकूल ।
कार्त्तिक मास सुपक्ष सित, द्वैज सकल सुखमूल ॥६॥

राम सु कृपा प्रसाद कुल, उदधि चन्द्र अवतंस ।
श्रीसीतापति जुग सरन, सुन्दर नाम प्रसंस ॥७॥

यह कृत अदभुत तिलक सुभ, जथा जोग मति पाय ।
रतनमंजरी नाम गुनि, भाषा वरनि बनाय ॥८॥

CLOSING (w.)

रामं रत्नकिरीटकुण्डलयुतं केयूरहारान्वितं,
सीतालंकृतवामभागममलं सिंहासनस्थं विभुम् ।
सुग्रीवादिहरीश्वरैः सुरगणैः संसेव्यमानं सदा,
विश्वामित्रपराशरादिमुनिभिः संस्तूयमानं प्रभुम् ॥९७॥

CLOSING (Ct.)

अर्थ—'रामं' राम जो है श्रीरघुनंदन रमणीक विग्रह तिनको हम सेवन करै । कैसे श्रीरामचन्द्र हैं ? 'रत्नकिरीटकुण्डलयुतं' स्ववर्ण को किरीट अरु कुंडल रतनन करिकै जटित सो माथे पै सोभित है जिनकै, कुंडल कानन के विषे सोभित हैं जिनके। ×××××××××××××× 'विश्वामित्रपराशरादिमुनिभिः संस्तूयमानं' विश्वामित्र परासर जावालि अत्रि गर्ग गौतम शांडिल इत्यादिक जे मुनि हैं ति करिकै अस्तूयमान हाथ जो......

3148. गोपीनाथाष्टकम्

OPENING :

श्रीगोपीनाथजी सहाय ।

आस्ये हास्यतमाधिकमस्मि वंसी, तस्यां नादपीयूषसिन्धुः ।
तद्वीचीभिर्मज्जयन् भाति गोपी गोपीनाथ[ः]पीनवक्षा गतिर्नः ॥१॥

गोपीनाथस्याष्टकं तुष्टचेता, तत्पादाब्जप्रेमपुष्टी भविष्णुः ।
योऽधीते तन्मनंत्यब्दकोटी, गोपीनाथ पीनवक्षा गतिर्नः ॥६॥

इति श्रीविश्वनाथचक्रवर्त्तिना महाशयेन विरचितः संपूर्णं १६४७ ।

3149. गोविन्दशरण-पञ्चश्लोकी

श्री सर्वेश्वराय नमः

श्रीमद्गोविन्दशरणं श्रीहरिं च कृपानिधिम् ।
नमस्कृत्य प्रवक्ष्येहं पञ्चश्लोकीं मनोहराम् ॥१॥

येषां वृन्दावने चित्तं श्रीकृष्णचरणे रतिः ।
तेषां दासस्य दासोऽहं गोविन्दशरणं भजे ॥२॥

सर्वशास्त्रार्थतत्त्वज्ञं करुणाकररूपकम् ।
सर्वोपरिकृपाकारं गोविन्दशरणं भजे ॥३॥

ज्ञानदं भगवद्रूपं महाकल्मषनाशनम् ।
हरिमन्दिरदातारं गोविन्दशरणं भजे ॥४॥

पुण्यपालं पापहरं दुष्टच्छेदनकारणम् ।
क्लेशादिदूरीकर्त्तारं गोविन्दशरणं भजे ॥५॥

वरिष्ठं वैष्णवाचार्यं सर्वानन्दप्रदायकम् ।
सर्वपूजकपूज्यं च गोविन्दशरणं भजे ॥६॥

यः पठेद् वैष्णवो नित्यं सर्वपापात् प्रमुच्यते ।
शिष्यप्रशिष्यवार्ता का सर्वमुक्तिर्न संशयः ॥७॥

COLOPHON : इति श्रीमन्निम्बार्कसम्प्रदायमुख्यश्रीमद्गोविन्दशरणस्य पु(पू)र्णदासविरचिता पंचश्लोकी संपूर्णा ।

3159. तुलजा-भवान्यष्टकम्

OPENING : श्रीगणेशाय नमः । ॐ

दुग्धं द कुन्दं जलम्यं दुराग्य, मुक्ताफलाहारविराजिताङ्गम् ।
शुभां भरं जस्य क्रिटिनेत्र, वन्देहमाद्यं तुलजा भवानी ॥१॥

CLOSING : जत्रस्य भोगः न ही तत्र मोक्षः, जत्रस्य मोक्षः न ही तत्र भोगः ।
श्रीसुन्दरं पुजनं तु पराणां, भोगस्य मोपस्य करस्य रिधम् ।
वन्देहमाद्यं तुलजा भवानी ॥८॥

इति तुलजषक सम्पूर्णं । समाप्तं ।

3160. त्रिपुरामहिम्नस्तोत्रं सटीकम्

OPENING : ....शभिः श्लोकैः संकेतसारबालाविद्याबीजत्रयस्य क्रमेण

सामर्थ्यं प्रतिपाद्येदानीं विद्याद्वयस्यान्यतरसंयुक्ता वीजाराधनेन यथेष्टफलप्राप्तिं प्रतिपादयति—

एकैकं तव मातृके परतरं संयोगि वा योगि वा,
विद्यादिप्रकटप्रभावजनकं जाड्यान्धकारापहम् ।
यन्निष्ठा च महोत्पलासनमहाविष्णुप्रहर्त्रादयो,
देवा विष्णु विधिष्वनम्य महिमा स्फूर्ति दधत्येव तत् ।।१३।।

CLOSING :

छत्रं चामरयोर्युगं व्यजनमादर्शस्तथा मर्द्दलो
भेरीशंखमृदङ्गकाहलकलां गीतं च नृत्यं तथा ।
साष्टाङ्गं प्रणतिस्तुतिर्बहुविधा चैतत्समस्तं मया
संकल्पेन समर्पितं ननु विभो संतुष्टये कल्पताम् ।।५७।।

उच्चेषु नीचेष्वपि दर्शनेषु, प्रकाशते देवि तव स्वरूपम् ।
समुज्ज्वलत्येव हि यज्ञवाटे, ...मङ्गलवेश्मन्यपि...तने वा ।।

सतां असतां च अनुग्रहार्थं गृहीतः मुनिविग्रहो येन भगवान् महानुभावः सर्वासां चतुर्वेदोक्तानां उपनिषदां तत्त्वनिरूपकानां जयति सर्वोत्कर्षेण विजयते । देशिकः प्रथमः आद्य आचार्यः ।

इति त्रैपुरं श्रीमहिम्नं गुरूक्ता, मया व्याकृतं प्रीतये सिद्धये च ।
सतां साधकानां सुविद्यैः सुधीरैश्चिरं लोकनीयं हृदा निश्चलेन ।।

यत्रैव यत्रैव मनो मदीयं, तत्रैव तत्रैव तव स्वरूपम् ।
यत्रैव यत्रैव शिरो मदीयं, तत्रैव तत्रैव पदद्वयं ते ।।

COLOPHON :

इति श्रीदुर्वाससः कृतं महिम्नं सटीक समाप्तम् ।

Post-Colophonic:

संवत् १८५० वर्षे पौष शुक्ल १५ बुधवासरेण लिखितं दधिच लेखक गौव्यंदराम बाशी नरायणा क पुस्तक लीषी नगर सवाई ज(य) नगरमध्ये पठणार्थ वोभा दुगादत्ताजी । श्रीरस्तु । कल्याणमस्तु ।

3163. दामोदराष्टकम्

नमामीश्वरं सच्चिदानन्दरूपं, लसत्कुण्डलं गोकुले भ्राजमानम् ।
यशोदाभियोलूखलाद्धावमानं, परामृष्टमन्यं ततो द्रुत्य गोप्या ।।१।।

रुदन्तं मुहुर्नेत्रयुग्मं मृजन्तं, कराम्भोजयुग्मेन सातङ्कनेत्रम् ।
मुहुः श्वासकम्पद्भि रेखाङ्ककण्ठ-स्थितग्रैव दामोदरं भक्तिबद्धम् ।।२।।

इतीदृक्स्वलीलाभिरानन्दकुण्डे, स्वघोषं निमज्जंतमाख्यापयन्तम् ।
तदीयेप्सितज्ञेषु भक्तैर्जितं त्वां, पुनः प्रेमतस्तं शतावृत्ति वन्दे ।।३।।

वरं देव मोक्षं न मोक्षावधिं वा, नवान्यं वृणेहं वरेशादपीह ।
इदं ते वपुर्बालगोपालबालं, सदा मे मनस्याविरस्तां किमन्यैः ।।४।।

इदं ते मुखाम्भोजमत्यन्तनीलै-र्वृतं कुण्डलैः स्निग्धवक्त्रैश्च गोप्यम् ।
मुहुश्चुम्बितं बिम्बरक्ताधरं मे, मनस्याविरास्तामलं त्वक्षलाभैः ॥५॥
नमो देव दामोदरानन्तविष्णो, प्रसीद प्रभो दुःखजालाब्धिमग्नम् ।
कृपादृष्टिवृष्टयातिनीतम्बतानु-गृहाणेशमामद्य मेप्यक्षि दृश्य ॥६॥
कुबेरात्मजौ बद्धमूर्त्तीव यद्वत्त्वया मोचितौ भक्तिभाजौ कृतौ च ।
तथा प्रेमभक्तिं स्वकामे प्रयच्छ, न मोक्षाग्रहो मेऽस्ति दामोदरेह ॥७॥
नमस्ते तदाम्ने स्फुरद् दीप्तिधाम्ने, त्वदीयोदरायाथ विश्वप्रदाम्ने ।
नमो राधिकायै त्वदीयप्रियायै, नमोऽनन्तलीलापदेवाय तुभ्यम् ॥८॥

इति श्रीपद्मे सत्यव्रतोक्तं दामोदराष्टकं समाप्तम् ।

3200. मधुरकुञ्जविहार्यष्टकम्

OPENING :

श्री राधाकृष्णाभ्यां नमः ।

इन्द्रनीलमणिमञ्जुलवर्णः, फुल(ल्ल)नीपकुसुमाञ्चितकर्णः ।
कृष्णलाभिरकिशोरसि हारी, सुन्दर जयति कुञ्जविहारी ॥१॥
राधिकावदनचन्द्रचकोरः, सर्वबल्लववधूधृतिचौरः ।
चर्चरीचतुरतांचितचारी, चारुतो जयति कुञ्जविहारी ॥२॥

CLOSING :

अष्टकं मधुरकुञ्जविहारी, क्रीडया पठति यः किल हारी ।
स प्रयाति विलसत् परभागं, तस्य पादकमलार्चनरागम् ॥६॥

इति श्रीमधुरकुञ्जविहार्यष्टकं संपूर्णं । शुभमस्तु । श्रीराधाकृष्णाभ्यां नमः ।

3214. यमुनाष्टक-स्तोत्रम्

कमलयोनिकमण्डलुनिर्गता, सनकमुख्यमहामुनिसम्मता ।
जगति सातिमितेपि नगत्वरी, जयति जह्नुसुता जगदीश्वरी ॥१॥
सगरनन्दनसद्गतिकारिणी, हरिपदाम्बुजरेणुविहारिणी ।
कलिनृपोद्भटसैन्यभयंकरी, जयति जह्नुसुता जगदीश्वरी ॥२॥
जलविलोलविहङ्गममण्डिता, प्रबलपापपराभवपण्डिता ।
मदनशत्रुशिरोरुहमञ्जरी, जयति जह्नुसुता जगदीश्वरी ॥३॥
तुहिनशैलशिलातलसम्भवा, श्रुतिपुराण...निर्मलसंस्तुता ।
दुरितदुःखलतादलधूमरी, जयति जह्नुसुता जगदीश्वरी ॥४॥
निजतटाश्रितवाञ्छितदायिनी, जगद्दोषविघातविधायिनी ।
अनुगतामरकिन्नरकिन्नरी, जयति जह्नुसुता जगदीश्वरी ॥५॥
सरलसारविशालरसालिनी, तरलतालतमालमृणालिनी ।
सुकृतवातक-पातकजित्वरी, जयति जह्नुसुता जगदीश्वरी ॥६॥

मदमरालमनोहरकूजिता, नरसुरासुरकिन्नरपूजिता ।
भवपयोनिधितारणमत्तरी, जयति जह्नुसुता जगदीश्वरी ॥७॥

रुचिरफेनसितस्मितशालिनी, विकचकाञ्चनपङ्कजमालिनी ।
रतिरत्नाकरसागरसुन्दरी, जयति जह्नुसुता जगदीश्वरी ॥८॥

स्तवमिमं विरचय्य हरिद्विजः, स्पृहयते फलमस्य हरिद्विजः ।
द्रुतविलम्बितमध्यतरङ्गिणी, दययतां मयि देवतरङ्गिणी ॥९॥

इति हरिद्विजविरचि(त)ज्यमुनाष्टकं समाप्तम् ।

3215. यमुनाष्टक-स्तोत्रम्

OPENING : श्रीकृष्णाय नमः ।

या गोकुलागमनसम्भ्रमदत्तमार्ग-
कृष्णाय शौरिमुदकैरपि भाव.......।
स्पृष्टं तदङ्घ्रिकमले भवदुत्तरङ्गा,
सा मन्मनोरथशतं यमुनाविधाता ॥१॥

CLOSING : उक्तं मयाष्टकमिदं तव सूरसूते,
यः सादरं त्वयि नमः प्रपठेन्निदाय ।
तस्याचला व्रजपतौ रतिराविरास्तां,
नित्यं प्रसीद मयि देवकिनन्दनेऽपि ॥९॥

COLOPHON : इति श्रीरघुनाथात्मज-श्रीदेवकीनन्दनकृतं यमुनाष्टकं समाप्तं ।

3245. रामाष्टकम्

OPENING : अथ रामाष्टक लिख्यते ।

सुग्रीवमित्रं परमं पवित्रं, सीताकलत्रं नवमेघगात्रम् ।
कारुण्यपात्रं शतपत्रनेत्रं, श्रीरामचन्द्रं सततं नमामि ॥१॥

CLOSING : खले न भीतं स्वजने विनीतं, श्यामोपगीतं मनसा प्रतीतम् ।
रागेन गीतं वचनावतीतं, श्रीरामचन्द्रं सततं नमामि ॥६॥

COLOPHON : इति श्रीरामाष्टकस्तोत्र संपूर्णं ।

3290. श्रीवृन्दावनाष्टकम्

नमः श्रीवृन्दावनाय ।

मुकुन्दमुरलीकलश्रवणफुल्लहृद्बल्लवी-
कदम्बककरम्बितप्रतिकदम्बकुञ्जान्तरा ।
कलिंदगिरिनन्दिनी कमलकन्दलान्दोलिना,
सुगन्धिरनिलेन मे शरणमस्तु वृन्दाटवी ॥१॥

विकुण्ठपुरसंश्रयाद् विपिनतोऽपि निःश्रेयसात्,
सहस्रगुणितां श्रियं प्रदुहती रसश्रेयसीम् ।
चतुर्मुखमुखैरपि स्पृहिततार्णदेहोद्भवा,
जगद्गुरुभिरग्रिमैः शरणमस्तु वृन्दाटवी ॥२॥

अनारतविकस्वरव्रततिपुञ्जपुष्पावली,
विसारिवरसौरभोद्गमभरैश्चमत्कारिणी ।
अमन्दमकरन्दभृद्विटपिवृन्दबन्दीकृत-
द्वि[रे]फकुलनन्दिता शरणमस्तु वृन्दाटवी ॥३॥

क्षणद्युतिघनश्रियोर्व्रजनवीनयूनोः पदैः,
सुवल्गुभिरलङ्कृता ललितलक्ष्मलक्ष्मीभरैः ।
तयोर्नखरमण्डलीशिखरकेलिचर्योचितै-
र्वृता किशलयाङ्कुरैः शरणमस्तु वृन्दाटवी ॥४॥

व्रजेन्द्रसखनन्दिनीशुभतराधिकारक्रिया-
प्रभावजसुखोत्सवस्फुरितजङ्गमस्थावरा ।
प्रलम्बदमनानुजध्वनितवंशिकाकाकली,
रसज्ञमृगमण्डला शरणमस्तु वृन्दाटवी ॥५॥

अमन्दमुदिराम्बुदाभ्यधिकमाधुरीमेदुर-
व्रजेन्द्रसुतवीक्षणोन्नटितनीलकण्ठोत्करा ।
दिनेशसुहृदात्मजा कृतनिजाभिमानोल्लस-
ल्लताखगमृगाङ्गना शरणमस्तु वृन्दाटवी ॥६॥

अगण्यगुणनागरीगणगरिष्ठगान्धर्विका-
मनोजरणचातुरीपिशुनकुञ्जपुञ्जोज्ज्वला ।
जगत्त्रयकलागुरोर्ललितलास्यवल्गत्पद-
प्रयोगविधिसाक्षिणी शरणमस्तु वृन्दाटवी ॥७॥

वरिष्ठहरिदासतापदसमृद्धगोवर्द्धना,
मधूद्वहवधूचमत्कृतिनिवासरासस्थला ।
अगूढगहनश्रियो मधुरिमव्रजेनोज्ज्वला,
व्रजस्य सहजेन मे शरणमस्तु वृन्दाटवी ॥८॥

इदं निखिलनिष्कुटावलिवरिष्ठवृन्दाटवी-
गुणस्मरणकारि यः पठति सुष्ठु पद्याष्टकम् ।
वसन् व्यसनमुक्तधीरनिशमत्र सद्वासनः,
स पीतवसने वशी रतिमवाप्य विक्रीडति ॥९॥

इति श्रीवृन्दावनाष्टकम् ।

3284. व्रजनवयुवद्वन्द्वाष्टकम्

श्रीराधाकृष्णौ जयतः।

अदुर्विधविदग्धतास्पदविमुग्धवेशप्रियो-
रमन्दशिखिकन्धरा कनकनिन्दिवासः श्रियोः।
स्फुरत्पुरटकेतकीकुसुमविभ्रमाभ्रप्रभा-
निभाङ्गमहसोर्भजे व्रजनवीनयूनोर्युगम् ॥१॥

समृद्धविधुमाधुरीविधुरताविधानोद्धुरै-
र्नवाम्बुरुहरम्यतामदविडम्बिनारंभिभिः।
विलिम्पदिव वर्णकावलिमहोदरैर्दिक्तटी-
मुखद्युतिभरैर्भजे व्रजनवीनयूनोर्युगम् ॥२॥

विलासकलहोद्धतिस्खलदमन्दसिन्दूरभा-
गखर्वमदनांकुशप्रकरविभ्रमैरङ्कितम्।
मदोद्धुरमिवेभयोर्मिथुनमुल्लसद्वल्लवी-
गृहोत्सवरतं भजे व्रजनवीनयूनोर्युगम् ॥३॥

घनप्रणयनिर्भरप्रसरलब्धपूर्तेर्मनो,
ह्रदस्य परिवाहितामनुसरद्भिरस्रैः प्लुतम्।
स्फुरत्तनुरुहाङ्कुरैर्नवकदम्बजृम्भश्रियं
व्रजत्तदनिशं भजे व्रजनवीनयूनोर्युगम् ॥४॥

अनङ्गरणविभ्रमे किमपि बिभ्रदाचर्य्यकं,
मिथश्चलदृगञ्चलद्युतिशलाकया कीलितम्।
जगत्यतुलधर्मभिर्मधुरनर्मभिस्तन्वतो-
र्मिथो विजयितां भजे व्रजनवीनयूनोर्युगम् ॥५॥

अदृष्टचरचातुरीचणचरित्रचित्रायितैः,
सह प्रणयिभिर्जनैर्विहरमाणयोः कानने।
परस्परमनो मृगं श्रवणचारुणा चर्चरी-
चयेन रजयद् भजे व्रजनवीनयूनोर्युगम् ॥६॥

मरन्दभरमन्दिरप्रतिनवारविन्दावली,
सुगन्धिनि विहारयोर्जलविहारविस्फूर्जितैः।
तपे सरसिवल्लभे सलिलवाद्यविद्याविधौ,
विदग्धभुजयोर्भजे व्रजनवीनयूनोर्युगम् ॥७॥

मृपाविजयकांक्षिभिः प्रथितचातुरीराशिभि-
र्गलंहस्थ हरणं हठात् प्रकटयद्भिरुच्चैर्गिरा।
तदक्षकलिदक्षयोः कलितपक्षयोः साक्षिभिः,
कुलैः स्वसुहृदां भजे व्रजनवीनयूनोर्युगम् ॥८॥

इदं वलिततुष्टयः परिपठन्ति पद्याष्टकं,
द्वयोर्गुणविकासि ये व्रजनवीनयूनोर्जनाः ।
मुहुर्नवनवोदयां प्रणयमाधुरीमेतयो-
रवाप्य निवसन्ति ते पदसरोजयुग्मान्ति[के] ॥६॥

इति श्रीव्रजनवयुवद्वन्द्वाष्टकम् ।

2846. व्रजनवयुवराजाष्टकम्

नमः श्रीगोकुलयुवराजाय ।

मुदिरमदमुदारं मर्दयन्नङ्गकान्त्या,
वसनरुचिनिरस्ताम्भोजकिञ्जल्कशोभः ।
तरुणिमतरणीक्षा विक्लवद्बाल्यचन्द्रो,
व्रजनवयुवराजः कांक्षितं मे कृषीष्टः ॥१॥

पितुरनिशमगण्यप्राणनिर्मन्थनीयः,
कलिततनुरिवाद्धामातृवात्सल्यपुञ्जः ।
अनुगुणगुरुगोष्ठी दृष्टिपीयूषवर्त्ति-,
र्व्रजजनयुवराजः कांक्षितं मे कृषीष्टः ॥२॥

अखिलजगति जाग्रन्मुग्धवैदग्ध्यचर्या,
प्रथमगुरुरुदग्रस्थामविश्रामसौधः ।
अनुपमगुणराजी रञ्जिताशेषबन्धु-
र्व्रजजनयुवराजः कांक्षितं मे कृपीष्टः ॥३॥

अपि मदनपरार्वैर्दुष्करं विक्रियोर्मि,
युवतिपु निदधानो भ्रूधनुर्धूननेन ।
प्रियसहचरवर्गप्राणमीनाम्बुराशि-
र्व्रजजनयुवराजः कांक्षितं मे कृपीष्टः ॥४॥

नयनशृणिविनोदक्षोभितानङ्गनाङ्गो-
न्मथितगहनराधाचित्तकासारगर्भः ।
प्रणयभरमरन्दास्वादलीलाषडङ्घ्रि-
र्व्रजजनयुवराजः कांक्षितं मे कृपीष्टः ॥५॥

अनुपदमुदयन्त्या राधिकासङ्गसिद्धया,
स्थगितपृथुरथाङ्गद्वन्द्वरागानुबन्धः ।
मधुरिममधुधाराधोरणीनामुदन्वान्,
व्रजजनयुवराजः कांक्षितं मे कृषीष्टः ॥६॥

अलघुकुटिलराधादृष्टिवारीनिरुद्ध-
त्रिजगदपरतन्त्रोद्दामचेतो मृगेन्द्रः ।

सुखमुखरविशाखानर्मणा स्मेरवक्त्रो,
व्रजजनयुवराजः कांक्षितं मे कृपीष्टः ॥७॥
त्वयि रहसि मिलन्त्यां सम्भ्रमन्यासभुग्ना–
प्युषसि सखि तवालीमेखला पश्य भाति ।
इति विवृतरहस्यैर्ह्लेपयन् सुष्टु राधां,
व्रजजनयुवराजः कांक्षितं मे कृपीष्टः ॥८॥
व्रजजनयुवराजस्याष्टकं तुष्टवुद्धिः,
कलितवरविलासं यः प्रयत्नादधीते ।
परिजनगणनायां नामतस्यानुरज्यन्,
विलिखति किल वृन्दारण्यराज्ञीरसज्ञः ॥९॥

इति श्रीव्रजनवयुवराजस्याष्टकम् ।

3310. सूर्याष्टकम्

श्रीसूर्याय नमः ।

यो देवः प्रतिदिनमन्धकारमग्नं,
त्रैलोक्यं प्रलयमिवोपयातमारात् ।
उद्धत्ते करनिकरेण सानुकम्पं,
मार्तण्डं गदहरणाय तं प्रपद्ये ॥१॥

यं शम्भोस्तनुमतनुं हरेश्च नेत्रं,
वेदानां विबुधगणे प्रधानमर्च्यम् ।
क्षत्राणां कुलपुरुषं च मूलमाहु-
र्मार्त्तण्डं गदहरणाय तं प्रपद्ये ॥२॥

येनाह्नो रजनियताखखाभ्रखाभ्रे-
भव्योमाङ्गरसशराक्षियोजनात्मा ।
यं गच्छत्कनकरथेन लंघ्यतेऽध्वा,
मार्तण्डं गदहरणाय तं प्रपद्ये ॥३॥

यस्मै प्रागुषसि धरामरैः प्रबुद्धै-
र्मंदेहासुरकर(?)विघ्नवारणाय ।
सायं च त्रिरहरहः प्रदीयतेऽर्घ्यं,
मार्तण्डं गदहरणाय तं प्रपद्ये ॥४॥

यस्मादञ्जलिजलदानमात्रतुष्टात्,
कुष्टाद्यामयनिकृतैरपीह मर्त्यैः ।
आरोग्यं कृतनमनाच्च लभ्यते द्राङ्,
मार्तण्डं गदहरणाय तं प्रपद्ये ॥५॥

यस्याहर्निशमुदये जनेक्षणानि,
द्रागब्जान्यपि च विकासमाप्नुवन्ति ।
मुच्यन्ते भ्रमरगणाश्च नूतनोढा,
मार्तण्डं गदहरणाय तं प्रपद्ये ॥६॥

यस्मिन् वैश्रवणदिशं प्रयाति देवे,
भव्यानां भवति हि कर्मणां प्रवृत्तिः ।
सस्यानां शमनदिशं जनिः समेषां,
मार्तण्डं गदहरणाय तं प्रपद्ये ॥७॥

श्रीभानो दिनकर भास्करोष्णरश्मे,
आदित्यारुणतरणे हिरण्यगर्भ ।
इत्येवं सततजपंतमुद्धरन्तं,
मार्तण्डं गदहरणाय तं प्रपद्ये ॥८॥

रामेण सीतोपपदेन क्लृप्तं,
सूर्याष्टकं भक्तियुतः पठेद् यः ।
नैरोग्यमायुर्धनधान्यवृद्धि-
मासाद्य मुक्ति च लभेत सोऽन्ते ॥९॥

इति श्रीपर्वणीकरोपनामक-श्रीलक्ष्मणभट्टात्मज-सतीगर्भसम्भव-श्रीसीतारामकवि विरचितं श्रीसूर्याष्टकस्तोत्रं सम्पूर्णम् ।

पञ्चानामपि देवानां गङ्गाभैरवयोर्गुरोः ।
मारुतेर्जम्बुवाहिन्याः बशस्तोत्राणि मत्कृतिः ॥१॥

श्रीसूर्यार्पणमस्तु । कल्याणमस्तु । श्रीरस्तु ॐ ।

3325. हरिरासाष्टपदी

(वसन्तरागे-एकतालि ताले)

हरिरिह व्रजयुवतिशतसङ्गे ।

विलसति करिणीगणवृतवारणवर इव रतिपतिमानभङ्गे । ध्रुवपद
विभ्रमसंभ्रमलोलविलोचनसूचितसंचितभावम् ।
कापि दृगञ्चलकुवलयनिकरैरञ्चति नं(त)कलरावम् ॥१॥

स्मितरुचिरुचिरतराननकमलमुदीक्ष्य हरि(रिं)रतिकन्दम् ।
चुम्बति कापि नितम्बवतीकरतलधृतचिबुकममन्दम् ॥२॥

उद्भटभावविभविति(व्यति)चापल मोहृत निधुवनशाली ।
रमयति कामपि पीनघनस्तनविलुलितनवघनमाली ॥३॥

निजपरिरम्भकृतेऽद्भुततरमभिवीक्ष्य हरिं सविलासम् ।
कामपि कापि बलादकरोदग्रे कुतुकेन सहासम् ॥४॥

कामपि नीविनिबन्धविमोकससम्भ्रमलज्जितनयनाम् ।
रमते सम्प्रति सुमुखी(खि)बलादपि करतलधृतनिजवसनाम् ॥५॥

प्रियपरिरम्भविपुलपुलकावलिद्विगुणितसुभगशरीरा ।
उद्गायति सखि कापि समं हरिणा रतिरणधीरा ॥६॥

विभ्रमसम्भ्रमगलदञ्चलमलयाञ्चितमङ्गमुदारम् ।
पश्यति सस्मितमतिविस्मितमनसा सुदृशा सविकारम् ॥७॥

चलि(ल)ति कयापि समं सकचग्रहमलसतरं सविलासम् ।
राधे तव पूरयतु मनोरथमुदितमिदं हरिरासम् ॥८॥

इति हरिरासाष्टपदी द्वितीया समाप्ता ।२।

3341. आनन्दचन्द्रिकास्तोत्रम्

अथ श्रीराधायाः

राधा दामोदरप्रेष्ठा राधिका माधवप्रिया ।
समस्तवल्लवीवृन्दधम्मिल्लोत्तंसमल्लिका ॥१॥

कृष्णप्रियावलीमुख्या गान्धर्वा ललिता सखी ।
विशाखासख्यसुखिनी हरिहृद्भृङ्गमञ्जरी ॥२॥

इमां वृन्दावनेश्वर्य्या दशनाममनोरमाम् ।
आनन्दचन्द्रिकां नाम यो रहस्यां स्तुतिं पठेत् ॥३॥

स क्लेशरहितो भूत्वा भूरिसौभाग्यभूषितः ।
त्वरितं करुणापात्रं राधामाधवयोर्भवेत् ॥४॥

इति आनन्दचन्द्रिकास्तोत्रम् ।

3362. उत्कलिकावल्लरीस्तोत्रम्

OPENING : अथ श्रीउत्कलिकावल्लरी—

प्रपद्य वृन्दावनमध्यमेकः क्रोशन्नसावुत्कलिकाकुलात्मा ।
उद्घाटयामि ज्वलतः कठोरां वास्यस्य मुद्रां हृदि मुद्रितस्य ॥१॥

अये वृन्दारण्य त्वरितमिह ते सेवनपराः,
परामापुः के वा न किल परमानन्दपदवीम् ।
अतो नीचैर्याचे स्वयमधिपयोरीक्षणविधे-
र्वरेण्यां मे चेतस्युपदिश दिशं हा कुरु कृपाम् ॥२॥

CLOSING : उद्गीर्णाऽभूदुत्कलिकावल्लरिरग्रे,
वृन्दाटव्यां नित्यविलासव्रतयोर्वाम् ।
वाङ्मात्रेण व्याहरतोप्युल्ललमे-
तामाकर्ण्येशौ कामितसिद्धिं कुरुतं मे ॥७१॥

चन्द्राश्वभुवने शाके(१४७१)पौषे गोकुलवासिना ।
इयमुत्कलिकापूर्वा वल्लरी निर्मिता मया ॥७२॥

COLOPHON : इति श्रीउत्कलिकावल्लरी समाप्त ।

3 68. कार्पण्यपञ्जिकास्तोत्रम्

OPENING : श्रीवृन्दावनेश्वर्यै नमः

तिष्ठन् वृन्दाटवीकुञ्जे विज्ञप्तिं विदधात्यसौ ।
वृन्दाटवीशयोः पादपद्मेषु कृपणो जनः ॥१॥
नवेन्दीवरसन्दोहसौन्दर्यस्कन्दनप्रभम् ।
चारुगोरोचनागर्वगौरवग्रासिगौरभाम् ॥२॥

CLOSING : यया वृन्दावने जन्तुरनर्होप्येष वास्यते ।
तयैव कृपया नाथौ सिद्धिं कुरुतमीप्सितम् ॥४४॥
कार्पण्यपञ्जिकामेतां सदा वृन्दाटवीनटौ ।
गिरैव जल्पतोप्यस्य जन्तोः सिद्धयतु वाञ्छितम् ॥४५॥

COLOPHON : इति कार्पण्यपञ्जिकास्तोत्रम् ।

3871. कालियदमनस्तोत्रम्

अथ कालियदमनम्—

कालियस्य फणरत्नकुट्टिमं कुट्टयन् पदसरोजघट्टनैः ॥
मङ्गलानि वितनोतु ताण्डवं पण्डितस्तव शिखण्डशेखरः

जगद्विघातसङ्गमं गरुत्मतागजङ्गमं,
भुजङ्गमण्डलीपदं पतङ्गनन्दिनीह्रदम् ।
विषाग्निदग्धनीरजं निरीक्ष्य तस्य तीरजं,
मुदाधिरुह्य दर्पतः कदम्बमुग्रसर्पतः ॥

क्षणादशंकितस्ततः पतन् गुरु समंततः,
पयोविकीर्णवानलं परिज्वलद्विषानलम् ।
धनुःशते सतां गतिर्भजोद्धताम्बुसंहतिः,
करालदृष्टिदारुणैः फणैर्मणिप्रभारुणैः ॥

युतेन लोकदाहिना विनाद्यकालियाहिना,
रुषोद्भटेन वेष्टितः प्रपन्नबालचेष्टितः ।
ततोऽद्भुतावलोकतः समेत्य तीव्रशोकत-
स्तनुस्खलत्पटालिभिः महार्त्तनादशालिभिः ॥

बलोपदेशसारतस्तदा ह्रदावतारतः,
शनैर्निवृत्तलालसैर्मुहुर्व्यथाकुलालसैः(सैः) ।

सदारवृद्धबालकैः समस्तधेनुपालकै-
विलोकितः स्मिताननः कृतोरगावमाननः ॥

प्रणुन्नभोगरोधनः सुहृद्गणाधिशोधनः,
श्रिताण्डजेन्द्रविभ्रमः स्फुरत्करालविक्रमः ।
स्वमूर्द्धरत्नपिञ्जरं निरस्य नागकुञ्जरं,
प्लुतेन तस्य रङ्गतः फणाङ्गणेषु संगतः ॥

प्रणीतदिव्यनर्त्तनः कृतोत्सवानुवर्त्तनः,
प्रसूनवृन्दवर्षिभिः खलार्द्दनेन हर्षिभिः ।
सपद्मभूपिनाकिभिः नभस्यनल्पनाकिभिः,
स्तुतो विचित्रबालकः सुलास्यतश्च लालकः ॥

सखि स्वबाल्यचञ्जलं परिभ्रमद्दिगञ्चलं,
सुशोभनाङ्गहारकं भुजङ्गदर्पदारकम् ।
प्रणीतनृत्यहस्तकं विलासकम्पिमस्तकं,
विकासिहास्यकोरकं विलोलकण्ठडोरकम् ॥

रसादमुं समग्रतः स्फुटं नटंतमग्रतः,
सुतं विलोकयाधुना त्वमीक्षणेन साधुना ।
व्रजेश्वरीति योषितां गिरं प्रमोदघोषितां,
निशम्य लब्धमोदया विलोकितो यशोदया ॥

खलप्रमर्द्दने खरः श्रिया ह्यनङ्गशेखरः,
फणव्रजे मुहुःप्लुतः फणावतीगणैः स्तुतः ।
तदातिदक्षिणाशयः फणीश्वरे कृताभयः,
क्षणादमूभिरर्चितः परार्द्धगन्धचर्चितः ॥

श्रुतिप्रसक्तकैरवः फणिव्रजेष्वभैरवः,
स्वबन्धुवृन्दनन्दनः कृतार्यपादवन्दनः ।
प्रहृर्षतोऽविलम्बया विचुम्बितस्त्वमम्बया,
जय प्रभो कृपानिधे विलासरत्नवारिधे ॥

नतार्तिपूरशातनः प्रसीद मे सनातनः ॥

कामं दामोदर मममनः पन्नगः पीनभोगो-
दुष्टाशीभिः कुटिलवलनैर्क्षोभयत्येष लोकम् ।
तद्विक्रान्तस्त्वमुदितपदद्वन्द्वपंकेरुहाङ्कं,
कुर्वन् दर्वीकरदमन हे ताण्डवैर्दण्डयामुम् ॥

अनङ्गशेखरच्छन्दः ।

3380. कृष्णप्रेमामृतरसायनस्तोत्रम्

OPENING : श्रीराधाकृष्णाभ्यां नमः

एकदा कृष्णविरहा ध्यायन्ति प्रियसङ्गमम् ।
मनोबाष्पनिरासार्थं जल्पतीदं मुहुर्मुहुः ॥१॥

कृष्ण कृष्णेन्दुरानन्दो गोविन्दो गोकुलोत्सवः ।
गोपालो गोप गोपेशो वल्लवेन्दो(न्द्रो)व्रजेश्वरः ॥२॥

CLOSING : खेलालीलापरिश्रान्तः स्वेदाम्बुरुचिराननः ।
गोपीकांगलसत् श्रीमान् मलयानिलसेवितः ॥३४॥

इत्येवं प्राणनाथस्य प्रेमामृतरसायनम् ।
यः पठेत् शृणुयाद्वापि स प्रेम लभे (भते) ध्रुवम् ॥३५॥

COLOPHON : श्रीकृष्णचैतन्यविरचितं श्रीकृष्णप्रेमामृतस्तोत्र सम्पूर्णम् ।

3381. कृष्णप्रेमामृतरसायनस्तोत्रम्

श्रीकृष्णाय नमः ।

स्फुरत्कृष्णप्रेमामृतरसभरेणातिभरिता,
विहारत्(रं)कुर्वाणा व्रजपतिविहाराब्धिषु सदा ।
प्रियागोपीभर्तुः स्फुरतु सततं वल्लभ इति,
प्रथावत्यस्माकं हृदि सुभगमूर्तिः सकरुणा ॥१॥

श्रीमद्भागवतप्रीतिपदमणिवरभावांशुभूषिता मूर्तिः ।
श्रीवल्लभाभिधानस्तनोतु निजदासस्य सौभाग्यम् ॥२॥

मायावादतमो निरस्य मधुभिः सेवाख्यवर्त्मादभुतं,
दुःप्रापं प्रकटं चकार करुणारागातिसम्मोहनम् ।
श्रीमद्गोकुलनाथसंगमसुधासंप्रापकं तत्क्षणात्,
स श्रीवल्लभभानुरुल्लसति यः श्रीवल्लवीशांतरः ॥३॥

यदंघ्रिनखमण्डलप्रसृतवारिपीयूषयुग्-
वराङ्गहृदयैः कलिस्तृणमिवेह तुच्छीकृतः ।
व्रजाधिपतिरिन्दिराप्रभृतिमृग्यपादाम्बुजः,
क्षणेन परितोषितस्तदनुगत्वमेवास्तु मे ॥४॥

अघौघतमसावृतं कलिभुजंगमासादितं,
जगद्विषयसागरे पतितमस्वधर्मे रतिम् ।
यदीक्षणसुधानिधिः समुदितो नु पङ्कामृता-
दमृत्युमकरोत् क्षणादरणमस्तु मे तत्पदम् ॥५॥

मायावादकरीन्द्रदर्पदलने नास्येन्दुराजोद्गतः,
श्रीमद्भागवताख्यदुर्लभसुधावर्षेण वेदोक्तिभिः ।
राधावल्लभसेवया तदुचितप्रेम्णोऽपि देशैरपि,
श्रीमद्वल्लभनामधेयसदृशे(शो)भावी न भूतोऽस्त्यपि ॥६॥

क्वचित् पाण्डित्यं चेन्न निगमगतिः सापि यदि न,
क्रिया सा सापि स्यात् यदि न हरिमार्गे परिचयः ।
यदि स्यात् सोऽपि श्रीव्रजपतिरतिर्नेति निखिलै-
र्गुणैरन्यः को वा विलसति विना वल्लभवरम् ॥७॥

इति विठ्ठलेश्वरविरचितं कृष्णप्रेमामृतं समाप्तः ।

3383. कृष्णलीलास्तोत्रम्

OPENING :

जीयान्नाम मुरारेः प्रेममरन्दस्य नव्यमरविन्दं,
भवति यदा भासोपि स्वातिजलं मुक्तिमुक्तायाः ॥१॥

नन्दोत्सवादयस्ताः कंसवधान्ता हरेर्महालीलाः ।
छन्दोभिर्ललिताङ्गैरष्टादशभिर्निरूप्यन्ते ॥२॥

दनुजतृणकदम्बोद्दामदावाग्निराशे,
कुसुमितरविकन्यातीरवन्याकरीन्द्र ।
मदकलपशुपालीलोचनेन्दीवरेन्दो,
भवतु तव चरित्रं मद्गिरां मण्डनाय ॥३॥

CLOSING :

तदङ्गगिरिकूटप्रभेदपविशीलः,
सुहृद्भिरपिहृष्टैर्भुजाभिरभिमृष्टः ।
सुरैश्च सुमनोभिर्वराभिरभिवृष्टः,
तनोतु मयि तुष्टिं स्ववत्सकुलपाली ॥

अपि स्फारामोदे प्रतिपदसुधाकोटिमधुरे,
पुराणग्रामान्तर्वहति तव लीलारसझरैः ।
मनोवत्सः पातुं विषयविषगर्ते विशति मे,
कृपायष्टया तूर्णं दमय तममुं तर्णकपते ॥

प्रफुल्लकुसुमावलीनामेदं छन्दः ।

3412. गङ्गालहरी (पीयूषलहरी) भाषाकवित्तसहिता

OPENING :

अथ गंगालहरी टीकासहत लीखते ।

श्लोक— समृद्धं सौभाग्यं सकलवसुधायाः किमपि तं,
महैश्वर्यं लीलाजनितजगतः खण्डपरशोः ।

श्रुतीनां सर्वस्वं स्वकृतमथ मूर्ति स्वमनसा,
स्वधासौन्दर्यं ते सलिलमशिवं नः शमयतु ॥१॥

कवत– सकल महि को पर पुरण सोभाग यहि
वेद और पुरानन को सरवस सार है।

लीला हि करकै जीन अखिल रचो है जग
ऐसे त्रपुरारीजु को वैभव उदार है।

देवन को स्वकृत अमोघ प्रघटो है सहि
स्वधा नै सरिस सो तो सोभा को अगार हैं।

सलिल तुम्हारो गंग मंगल हमारो नित
पादप अमंगल को काटन कुठार है ॥१॥

CLOSING : इलोक– इमां पीयूषलहरीं जगन्नाथेन निर्मिताम्।
यः पठेत् तस्य सर्वत्र जायन्ते जयसम्पदे(दः) ॥५३॥

छन्द गीतका– अभिरांम नाम पीयूषलहरि चलत मंगल की भरी।
यह जगन्नाथ उदार पंडतराज नै निर्मल करी।

एक दो स मिश्र उदाम सब गुणग्राम रूप स्वराम नै।
यह भात उर अभिलाष करि आयुष दइ सुखधाम नै ॥५३॥

श्री गंगादेव्यै नमः

यह देववानी सहंसकृत अतिकठिन समझ न आवहि।
मतमंद नर कल काल के किह भात अर्थ लगावहि।
यातै अर्थ अनकूल याको जगत हित मन लायकै।
समझै सकल नर भाष ता मै रच्यो ग्रंथ वषान कै ॥५४॥

यह धार आयुष सिस गुर कि बुध नीज अनुसारहि।
बलदेव वैस्य खण्डेलवाल विचार जान भाषा कहि ॥

जो पढै हिय हिअ छावहि और सुनहि श्रवण करावहि
ते अनुग्रह गंग कि जय संपदा नर पावहि ॥५६॥

COLOPHON : इति श्रीपंडतराज जगन्नाथ त्रसूली कृत गंगालहरि संपूर्णं और गंगालहरि भाषा कवत संपूर्णं।

3413. गङ्गालहरी सटीका

OPENING : श्रीगणेशाय नमः।

श्रीमच्छ्रुतिशिरोरत्ननीराजितपदाम्बुजाम्।
बुद्धिदां जडबुद्धीनां वन्दे गङ्गातरङ्गिणीम् ॥१॥

यत्पादपङ्कजं नृणां ज्ञानदं नष्टचेतसाम् ।
तं गुरुं परमानन्दं वन्दे श्रीराघवाभिधं ॥२॥

श्रीमद्दिव्यहयास्यपादकमलद्वन्द्वापचित्यारतः,
श्रीमद्रामचरित्रमानससरश्चार्यैकहंसोत्तमः ।
नित्यं श्रीवरदेशभक्तिजलधेः प्रोत्साहकर्त्तेन्दुव-
च्छ्रीमान् केशवराममलोकविदितः प्रीणातु नः सद्गुरुः ॥३॥

यो धारयति श्रीगङ्गां जटामण्डलमन्दिरे ।
सच्चिदानन्दैकरूपा तं वन्दे श्रीकरं शिवम् ॥४॥

गौतमान्वयसम्भूतो रामकृष्णात्मजः सुधीः ।
चतुर्भुजः स्वबोधाय करोत्येतां तरंगिणीम् ॥५॥

आद्याचार्यकृतप्रबन्धजलधेः सद्भावसंशीकरान्,
श्रीमत्सद्गुरुदत्तज्ञानपुटकेनाहृत्य स्वान्ते हृदि ।
श्रीगङ्गापदपद्मप्रेमविकसत्प्रोच्छूनपूरैस्ततां,
दिव्यां भावतरङ्गिणीं व्यतनवं मज्जन्तु सन्मानसाः ॥६॥

CLOSING:

तयैव दत्तया बुद्धया तत्कीर्तिविवृती कृता ।
सैव सच्चिद्घना गङ्गा तया प्रीणातु सर्वगा ॥१॥

समस्तजगदाधारां सर्वशक्त्युपबृंहिताम् ।
दीनकारुण्यसम्पूर्णां वन्दे ब्रह्मद्रवां पराम् ॥२॥

सर्वसद्गुणसम्पन्नां चिदानन्दैकरूपिणीम् ।
ईश्वरीं सर्वलोकानां गङ्गां ब्रह्मद्रवां भजे ॥३॥

रामकृष्णात्मजः श्रीमान् नाम्ना चतुर्भुजः सुधीः ।
व्याकरोद् वै शुभां टीकां गङ्गाभक्तितरङ्गिणीम् ॥४॥

मया तु निजबोधाय कृतेयं नैव सर्वतः ।
तथापि सुधियः सर्वे क्षन्तुमर्हथ मे ह्यघम् ॥५॥ इति ।

COLOPHON: इति श्रीमद्गौतमान्वयप्रसूतश्रीरामकृष्णात्मजचतुर्भुजमिश्रविरचिता श्रीगङ्गालहर्यास्तरङ्गिणी वृद्धिमगात् । श्रीमहादेव्यै गङ्गायै नमो नमः श्रीरस्तु कल्याणमस्तु लेखकपाठकयोः ।

Post-Colophonic मिति ज्येष्टकृष्णा १३ रविवासरे संवत् १९०९ पुस्तकमिदं महता श्रीअमरदासेन लिखायितम् ॥ लिप्यकृतं सालिग्रामेण ।

3414. गङ्गालहरी सटीका

OPENING:

श्रीगणेशाय नमः

भागीरथीत्रिदशसेवितपादपद्मा,
अब्जाभयामृतकरी रवराद्व्यहस्ता ।

मुक्ताविभूषणविराजितचारुदेहा
पापं विनाशयतु मे सुकृतप्रवाहा ॥१॥

दुर्गाराममहं प्रणम्य पितरं गोविन्दरामात्मजं,
साहित्यालयरङ्गनाथतनयं श्रीकृष्णभट्टं गुरुम् ।
टीकां बालमुदे करोमि विशदां गङ्गाह(ल)हर्याः पुरां,
तुष्यन्तु प्रतिभाजुपश्चपलतां वीक्ष्यार्भकस्य स्फुटाम् ॥२॥

अथ चिकीर्षितस्य पीयूषलहर्याख्यस्तवराजस्य निर्विघ्नसमाप्तिकामनया जगन्नाथाभिधेयः पण्डितवर्यः स्तवाधिष्ठात्रीं देवतां स्तौति—समृद्धचेति ।

संवद्वेदरसद्विदन्तकुमिते वर्षे शुभे माधवे,
मासे कृष्णदले शशाङ्कदिवसे श्रीद्वादशी सा तिथौ ।
दुर्गारामतनूजनिर्दलपतिर्गङ्गालहर्याः स्तुते-
ष्टीकां बालविबोधिनीं स निरमाद् भागीरथीप्रीतये ॥

इति श्रीदुर्गारामसूरिसूनु–दलपतिरामविरचिता गङ्गालहरीटीका बालबोधनीनाम्नी समाप्ता तया भागीरथी प्रीयताम् ।

3415. गङ्गास्तोत्रम्

॥ ॐ नमो गङ्गायै ॥

चिरं विरञ्चिपूज्यविष्णुपादवारिधारिणी,
प्रतापकेतुपट्टिकांह्रियष्टिकाविहारिणी ।
शशाङ्ककान्तपूरकेण पापकूटकन्दिनी,
जगत्त्रिदोषतस्तु नः पुनातु जह्नुनन्दिनी ॥१॥

शिवोत्तमाङ्गवेदिकाविहारसौख्यकारिणी,
ततो भगीरथाङ्गसङ्गमर्त्यलोकचारिणी ।
त्रिमार्गगा त्रितापहा त्रिलोकशोकखण्डिनी,
जगत्त्रिदोषतस्तु नः पुनातु जह्नुनन्दिनी ॥२॥

सुमेरुशृङ्गदेवलोकपालवासपूजिता,
पुराणवेदवादनादकालकण्ठकूजिता ।
त्रितापदुःखदीनजीवजन्मबीजमन्दिनी,
जगत्त्रिदोषतस्तु नः पुनातु जह्नुनन्दिनी ॥३॥

हिमाद्रिकन्दराविहारसिद्धचारणाङ्गना,
सुगीतनृत्यतालभेदकामकेलिनन्दना ।
सुकुञ्जपुञ्जवञ्जुलप्रफुल्लसूनगन्धिनी,
जगत्त्रिदोषतस्तु नः पुनातु जह्नुनन्दिनी ॥४॥

चकोरचक्रवाकहंसवृन्दकूलरञ्जिता,
मृणालखण्डधूतवायुपूतसत्वसञ्जिता ।
शवाङ्गपूतिगन्धहारिवारिराशिस्यन्दिनी,
जगत्त्रिदोषतस्तु नः पुनातु जह्नुनन्दिनी ॥५॥

सरस्वतीप्रपूरसूरकन्यकाम्बुसङ्गिनी,
मुनीन्द्रवृन्दवन्दिता त्रिवेणिका तरङ्गिणी ।
मुमुक्षुसङ्घसेविता सुतीर्थवृद्धिवन्दिता,
जगत्त्रिदोषतस्तु नः पुनातु जह्नुनन्दिनी ॥६॥

सुराङ्गनाङ्गलेपगन्धमत्तभृङ्गमालिनी,
नभस्वदीरिताम्बुवार्धिहस्तलास्यशालिनी ।
तटप्रवासिजन्तुशुद्धबुद्धिबोधनन्दिनी,
जगत्त्रिदोषतस्तु नः पुनातु जह्नुनन्दिनी ॥७॥

रसालवेतसीतमालसालकुञ्जपावनी,
मयूरकोकिलाप्रमत्ततीरशोभितावनी ।
अनेकदेशकूलवासिकालभीतिदंदिनी,
जगत्त्रिदोषतस्तु नः पुनातु जह्नुनन्दिनी ॥८॥

नरेन्द्रपुत्रमुक्तिदा सुरेन्द्रलोकसाधनं,
स्वसेवकाय दातृका सुतं पवित्रिका धनम् ।
नदीशपूरसङ्गमेन विश्वतापकन्दिनी,
जगत्त्रिदोषतस्तु नः पुनातु जह्नुनन्दिनी ॥९॥

तव प्रवाहसञ्चलद्विलोलवीचिदोलितं,
सुमीनकङ्ककर्षितं शृगालकाकभक्षितम् ।
नरं विलोक्य सादरं विकुण्ठलोकगामिनं,
वदन्ति देवि देवता भृशं त्वदीयविस्मयम् ॥१०॥

विधेहि देवि मे मतिं त्वदीयवारिसेवने,
शुभेतरे कदाचन प्रतीतिरस्तु मा बुधे ।
तवाम्बुपानमादरात् प्रकुर्वतः प्रदक्षिणं,
त्वदीयवारसेचिमीक्षतः प्रयातु देवि मे दिनम् ॥११॥

मुरारिपादसेविना नारायणेन सूरिणा,
सुगङ्गकाष्टकं शुभं कृतं गुरुप्रभावतः ।
नरः पठेदिदं सदा शुचिः प्रभातकालतः,
प्रयाति वाञ्छितं फलं स जाह्नवीप्रसादतः ॥१२॥

इति श्रीनारायणभट्टविरचितं श्रीगङ्गास्तोत्रं सम्पूर्णम् । शुभम् ।

3425. गोपाङ्गनाविलापस्तोत्रम्

OPENING : भाग्यैरङ्कुरितं महीमृगदृशामाकल्पमासिञ्चितं,
प्रेम्णा कंदलितं मनोरथमयीशाखाशतैः सम्भृतम् ।
लौल्यैः पल्लवितं मुदा कुसुमितं प्रत्याशया पुष्पितं,
लीलायैं फलितं भजे व्रजवधूशृङ्गारकल्पद्रुमम् ॥१॥

सुस्थिरे नीलजलदे स्थिरसौदामिनीयुते ।
स्थिरं मनो यदि भवे[त्] स्थिरं भाग्यं तदैव हि ॥१॥

CLOSING : प्रेष्ठे त्वयि प्राणयितो ममासीत्यपि नो मतिः ।
त्वदङ्गसङ्गविरहेप्यंग जीवामि यद्रसा(त्?) ॥२६॥

क्षणमपि न वियुक्ता जातु तस्माद् भविष्या,
म(म्य)हमिति हृदये मे[नि]श्चयः सर्वदासीत् ।
व्यरचि यदि ग्रहाया(हैर्यः)केवलो विप्रयोगः,
कथय किमथ कुर्यां दुःखिना जीवितेन ॥२७॥

COLOPHONE : इति श्रीविट्ठलेश्वरविरचितं विक्षिप्तः समाप्तात् ।

3437. गोविन्दगुणानुवादः सटीकः

OPENING: श्रीवल्लभाय नमः ।

ध्यात्वा श्रीयुतवल्लभं तु हृदये श्रीविट्ठलेशं प्रभुं,
शुद्धं श्रीलगुरोश्च पादयुगलं नत्वानुकम्पानिधेः ।
शब्दं संरचयाम्यहं भगवतः श्रीमज्जनानां मुदे,
श्रीगोविन्दगुणानुवादममलं सन्दर्भमानन्ददम् ॥१॥

श्रीकृष्णतज्जनगुणान् शुभदांश्च यस्मिन्,
गूढं श्रुतेश्च परमं गहनं यदर्थम् ।
सूक्ष्मं ह्यतीवसरलं खलु भाषयाहं,
संवर्णयामि तु यथामति कृष्णदासः ॥२॥

Ct. श्रीमते गोविन्दाय नमः ।

छप्पे—श्रीवल्लभ श्रीविट्ठलेश प्रभु ध्यान हीय धर,
श्रीगुरुदेव दयाल कृपानिधि चरण नमन कर ।
भगवत यश संलाप रच्यो यह ग्रंथ सुभगतर,
शुभदायक कल्याणकरण हरिजनवर तत्पर ।
कृष्णदास हरिगुण कथन बहु अपार श्रुतिसार,
सरल सूक्ष्म वरनन कीयो यथाबुद्धि अनुसार ॥१॥

श्रीवल्लभो जयतितराम् ।

एक दिन कथा वार्त्ता के प्रसंग में श्रीफतेसिंहजी भागवत-यश-अभिलाषी तथा व्रजजीवनदासजी मथुरानिवासी वैष्णवन नै प्रसंग चलायो कि कलिकाल प्रभाव करि कपिलादि सांख्य, पातञ्जलादि योग, काणादि तर्क, गौतमादि न्याय, जैमिनीय पूर्वमीमांसा, व्यासकृत उत्तरमीमांसा इन छै शास्त्रन को बहुधा प्रचार ही नही रह्यो और वेदान्त कहिये उपनिषद् और ब्रह्मसूत्र इनके व्याख्यान भाष्यादिकन को तो श्रवन ही दुर्लभ भयो। तातें प्रमाणग्रंथ तें श्रवन की पवित्रता दूर भई। वा जो लीलायुक्त भगवत्स्वरूप-प्रतिपादक प्रमेयग्रंथ तिनकी तो वार्त्ता ही कहा रही। नवीन अवैदिक मतन के प्रचार तें बुद्धि की शुद्धि गई। उदरनिमित्त जीवन को अपनो शास्त्र छोडि परविद्या अभिनिवेश होय स्वधर्म-त्याग भयो यातें चित्त को अव्याकुलता होत है। तातें कोऊ सरल भाषाग्रंथ प्रमाण-वाक्यन-सहित जामें उपास्य-उपासक-वरनन अथवा भक्ति वा भक्तिफल को निरूपण होय ऐसो कहनो चाहिये, तो मनकों स्वास्थ्य रहै। ऐसो सुनकै तैसो ही ग्रंथ बनावे कों मैं प्रवृत्त हुयो हूँ। यद्यपि मैं तुच्छ जीव कहां और अलौकिक पदार्थ को कथन कहां। छोटे मुख से वड़ी बात केसें कही जाय। तथापि वैष्णव-आज्ञा उल्लंघन अनुचित समुझि देववाणी में अतिसूक्ष्म या ग्रंथ की रचना करी और इन श्रुति-सूत्रादिकन के अर्थ आचार्यकृत-भाष्यादिकन में वडे-वडे व्याख्यान हैं और अतिकठिन हैं। इसलिये वैष्णवबोधार्थ वेदादिक को अक्षरार्थ भाषा में लिख दीनो है। इति भूमिका।

CLOSING & COLOPHON(w.)

विज्ञान्प्रणम्य सुकृताञ्जलिरेष भूयो-
भूयो विधाय विनयं विनिवेदयामि।
यत्साध्वसाधु हि भवेच्च तदत्र वुद्ध्वा,
संक्षम्यतां सुभगकृष्णगुणानुवादान् ॥४६॥

इति श्रीमद्वल्लभाचार्यकुलोद्भव-श्रीगोस्वामि-श्रीगुरुदेवगोपेश्वरपादारविन्द-मकरन्दालिन्द-कृष्णदासशर्मविरचित-भगवतसंलापपीयूषः संपूर्णम्। श्रीकृष्णाय नमः।

Ct.

सोरठा—छिमियो कवि अपराध, हाथ जोडि विनती करों।
जो कछु साधु असाध, हरिगुणकथन यतन समुझि ॥

Post-Colophonic:

इति श्रीभगवतसंलापपीयूषग्रंथ को भाषा अक्षरार्थ संपूर्णम्। आषाढस्य सिते ग्रहाः। संवत् १६४६

3447. चाटुपुष्पाञ्जलिः

OPENING:

॥ श्रीवृन्दावनेश्वर्यै नमः ॥

नवगोरोचनागौरीं प्रवरेन्दीवराम्बराम्।
मणिस्तबकविद्योतिवेणीव्यालाङ्गनाफणाम् ॥१॥
उपमानघटामानप्रहारिमुखमण्डलाम्।
नवेन्दुनिन्दिभालोद्यत्कस्तूरीतिलकश्रियम् ॥२॥

CLOSING :

भ्रूजितानङ्गकोदण्डां लोलनीलालकावलिम् ।
कज्वलोज्ज्वलताराजच्चकोरीचारुलोचनाम् ॥३॥

व्रजराजकुमारवल्लभाकुलसीमन्तमणि(णे) प्रसीद मे ।
परिवारगणस्य ते यथा पदवी मे न दवीयसी भवेत् ॥२२॥

करुणां मुहुरर्थये परं तव वृन्दावनचक्रवर्तिनी ।
अपि केशिरिपोर्यथा भवेत् स चटुप्रार्थनभाजनं जनः ॥२३॥

इमं वृन्दावनेश्वर्या जनो यः पठति स्तवम् ।
चाटुपुष्पाञ्जलि नाम स स्यादस्याः कृपास्पदम् ॥२४॥

COLOPHON : इति चाटुपुष्पाञ्जलिः ।

3448. चित्रकवितास्तोत्रम्

अथ चित्रकवित्तानि

तत्रद्व्यक्षराणि— रसासाररसुरारिः ससार सः ।
संसारासिरसौ रासे सुरिरंसुः ससारसः ॥१॥

चर्चोरुरोचिरुच्चोरा रुचिरोऽरं चराचरे ।
चौराचारोऽचिराच्चीरं रुचा चारुरचूचुरत् ॥२॥

धरे धराधरधरं धाराधरधुरारुधि(धम्) ।
धीरधीरारराधारि(धि)रोधं राधा धुरन्धरम् ॥३॥

एकाक्षरम्— निनुन्नानौननं नूनं नानूनोन्नाननोऽनुनीः ।
नानेनानां निनुन्नो(न्ने)नं नौ(ना)नौन्नानाननो नूनी(ननु) ॥४॥

चक्रबन्धः— गन्धाकृष्टगुरून्मदालिनि वने हारप्रभातिप्लुतं,
संपुष्णन्तमुपस्कृताध्वनि मयी(यमी)वीचिश्रियो रञ्जकम् ।
सद्यःस्तुङ्गितविभ्रमं सुनिभृते शीतानिलैः सौख्यदे,
देव नागभुजं सदा रसमयं तं नौमि कंचिन्मुदे ॥५॥

सर्पबन्धः— रासे सारङ्गसंघाचितनवनलिनप्रायवक्षःस्थदामा,
बर्हालङ्कारहारस्फुरदमलमहारागचित्रे जयाय ।
गोपालो दासवीथीललितहितरवस्फारहासः स्थिरात्मा,
नव्योजस्क्षणोपाश्रितविततबलो वीक्ष्य रङ्गं बभाषे ॥६॥

पद्मबन्धः— कलवाक्य सदालोक कलोदार मिलावक ।
कवलाद्याद्भुतालु(नू)क कल(नू)ताभीरबालक ॥७॥

प्रातिलोम्यानुलोम्य— तायिसारधरा(वधमा)धारातिभायातमदारिहा ।
समम्— हारिधाव(दाम)तया भाति राधामाधवसायिता ॥८॥

गोमूत्रिकाबन्धः— सा मल्लरङ्गे रमया फुल्लसारा मुदेधिता ।
श्रमनीरधरा तुष्टा वल्लवीरासदेवता ॥९॥

मुरजबन्धः— शुभासारससारश्रीः प्रभासान्द्रमसारसा(भा) ।
भाव(र)सा महसावित्ततरसा स(ग)स सारिताम् ॥१०॥

सर्वतोभद्रः— रासावहा हार(व)सारा सा ललास सलालसा ।
बलाराम मारलावहासमाददमासहा ॥११॥

बृहत्पद्मबन्धः— तारप्रस्फारतालं सरभससरलं भासुरास्यं सुभालं,
पापघ्नं गोपबालं करगाहरकलं नीरभृद्वारनीलम् ।
चारुग्रीवं रुचालं रतमदतरलं चेतसा पीतचेलं,
शीतप्रस्फीतशीलं वरय वरवलं वासुदेवं सबालम् ॥१२॥

इति चित्रकविता ।

3449. चैतन्यदेवस्तोत्राणि

[प्रथमस्तोत्रम्]

श्रीश्रीकृष्णचैतन्यनित्यानन्दौ जयतः ।

OPENING:

श्रीमदीश्वररूपेण रसामृतकृता कृता ।
स्तवमालानुजीवेन [जीवेन] समगृह्यत ॥
पूर्वं चैतन्यदेवस्य कृष्णदेवस्य तत्परम् ।
श्रीराधायास्ततः कृष्णराधयोर्लिख्यते स्तवः ॥
विरुदावली ततो नानाच्छन्दोभिः केलिसंहृतिः ।
ततश्चित्रकवित्तानि ततो गीतावली ततः ॥
ललितायमुनावृष्णिपुरीश्रीहरिभूभृताम् ।
वृन्दाटवीकृष्णनाम्नोः क्रमेण स्तवपद्धतिः ॥

तत्र श्रीचैतन्यदेवस्य—

सदोपास्यः श्रीमान् धृतमनुजकायैः प्रणयितां,
वहद्भिर्गीर्वाणैर्गिरिशपरमेष्ठिप्रभृतिभिः ।
स्वभक्तेभ्यः शुद्धां निजभजनमुद्रामुपदिशन्,
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदम् ॥१॥

सुरेशानां दुर्गं गतिरतिशयेनोपनिषदां,
मुनीनां सर्वस्वं प्रणतपटलीनां मधुरिमा ।
विनिर्यासः प्रेम्णो निखिलपशुपालाम्बुजदृशां,
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदम् ॥२॥

CLOSING:

भुवं सिञ्चन्नश्रुस्तुतिभिरभितः सान्द्रपुलकैः,
परीताङ्गो नीपस्तव कनककिञ्जल्कजयिभिः ।

घनस्वेदस्तोमस्तिमिततनुरुत्कीर्त्तनमुखी,
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदम् ॥८॥

अधीते गौरांगस्मरणपदवीमङ्गलतरं,
कृती यो विस्रम्भः स्फुरदमलधीरष्टकमिदम् ।
परानन्दे संघस्तदमलपदाम्भोजयुगले,
परिस्पा(स्फा)रा तस्य स्फुरतु नितरां प्रेमलहरी ॥६॥

[द्वितीयं स्तोत्रम्]

OPENING: श्रीकृष्णचैतन्यचन्द्राय नमः ।

कलौयं विद्वांसः स्फुटमभियजन्ते द्युतिभरा-
दकृष्णाङ्गं कृष्णं मखविधिभिरुत्कीर्त्तनमयैः ।
उपास्यं च प्राहुर्यमखिलचतुर्थाश्रमजुषां,
स देवश्चैतन्याकृतिरतितरां नः कृपयतु ॥१॥

CLOSING: शचीसूनोः कीर्त्तिस्तबकनवसौरम्यनिबिडं,
पुमान् यः प्रीतात्मा पठति किल पद्याष्टकमिदम् ।
स लक्ष्मीवानेतं निजपदसरोजे प्रणयितां,
ददानः कल्याणीमनुपदमबाधां सुखयतु ॥६॥

[तृतीयं स्तोत्रम्]

OPENING: श्रीचैतन्यचन्द्राय नमः ।

उपासितपदाम्बुजस्त्वमनुरक्तरुद्रादिभिः,
प्रपद्य पुरुषोत्तमं पदमदभ्रमुद्भ्राजितः ।
समस्तजनमण्डलीस्फुरदभीष्टकल्पद्रुमः,
शचीसूत मयि प्रभो कुरु मुक(कु)न्द मंदे कृपाम् ॥१॥

न वर्णयितुमीशते गुरुतरावतारायिता,
भवन्तमुरुवुद्धयो न खलु सार्वभौमादयः ।
परो भवतु तत्र कः पटुरतो नमस्ते परं,
शचीसुत मयि प्रभो कुरु मुकुन्द मन्देक्षणम् ॥२॥

CLOSING: अहं कनककेतकीकुसुमगौरदुष्टः क्षितौ,
न दोषलवदर्शिता विविधदोषपूर्णेऽपि ते ।
अतः प्रवणया धिया कृपणवत्सल त्वां भजे,
शचीसुत मयि प्रभो कुरु मुकुन्द मन्दे कृपाम् ॥८॥

इदं धरणिमण्डलोत्सवभवत्पदाङ्केषु ये,
निविष्टमनसो नराः परिपठन्ति पद्याष्टकम् ।

शचीहृदयनन्दन प्रकटकीर्त्तिचन्द्र प्रभो,
निजप्रणयनिर्भरं वितर देव तेभ्यः शुभम् ॥६॥
इति श्रीचैतन्यदेवस्तोत्राणि ।

3450. जन्मनक्षत्रतनयस्तोत्रम्

श्रीमते रामानुजाय नमः ।

तुलायां श्रवणे जातं काञ्च्यां काञ्चनवारिजात् ।
द्वापरे पाञ्चजन्यांशं शरोयोगिनमाश्रये ॥ १ ॥
इति शरोयोगीतनयः ।

तुलाधनिष्ठसम्भूतं भूतं कल्लोलमालिनः ।
तीरे फुल्लोत्पले मल्यां पूर्यामीडे गदांशकम् ॥ २ ॥
इति भूतयोगितनयः ।

तुलाभिर्शतभिषाजातं मयूरपुरकैरवात् ।
महान्तं महदाख्यातं वंदे श्रीनन्दकांशकम् ॥ ३ ॥
इति महदाह्वयतनयः

वृश्चिके कृत्तिकाजातं चतुष्कविशिखामणिम् ।
षट्प्रबन्धकृतं शार्ङ्गं मूर्त्ति कलिघमाश्रये ॥ ४ ॥
इति परकालतनयः ।

वृश्चिके रोहिणीजातं श्रीपाणिनिचुलापुरे ।
श्रीवत्सांशं गायकेन्द्रं मुनिवाहनमाश्रये ॥ ५ ॥
श्रीमुनिवाहतनयः ।

कोदण्डे ज्येष्ठनक्षत्रे मण्डं गुडिपुरोद्भवम् ।
चोलोर्घ्यावलमालांशं भक्तांघ्रीरेणुमाश्रये ॥ ६ ॥
श्रीभक्तांघ्रीरेणुतनयः ।

मघायां मकरे मासे चक्रांशं भार्गवोद्भवम् ।
महीसारपुराधीशं भक्तिसारमहं भजे ॥ ७ ॥
श्रीभक्तिसारतनयः ।

कुम्भे पुनर्वसौ जातं केरले चोलपट्टने ।
कौस्तुभांशं धराधीशं कुलशेखरमाश्रये ॥ ८ ॥
श्रीकुलशेखरतनयः ।

मेषार्द्रासंभवं विष्णोर्दर्शनस्थापनोत्सुकम् ।
तुण्डीरमण्डले शेषमूर्त्ति रामानुजं भजे ॥ ९ ॥
श्रीरामानुजस्वामितनयः ॥

श्रीरामानुजस्वामितनयः ।

मिथुने स्वातिजं विष्णोरथांशधन्विनः पुरे ।
प्रपद्ये स्व(श्व)सुरं विष्णोर्विष्णुच्चितपुरस्मिसम् ॥ १० ॥

श्रीभट्टनाथतनयः ।

कर्कटे पूर्वफाल्गुन्यां तुलसीकाननोद्भवाम् ।
पाण्ड्ये विश्वंभरां गोदां वन्दे श्रीरङ्गनायकीम् ॥११॥

श्रीगोदामातनयः ।

चैत्रे चित्रा च नक्षत्रे कालग्रामे शुभाह्वये ।
कुमुदांशसमुद्भूतं मधुरं कविमाश्रये ॥१२॥

श्रीमधुरकवितनयः ।

द्वादशाल्वारतनयः ।

चैत्रे श्रवणनक्षत्रे कृतावरणं विभुम् ।
विष्णुमादिगुरुं लक्ष्म्यै मन्त्ररत्नप्रदं भजे ॥१॥

श्रीमान् विष्णुतनयः ।

फाल्गुनोत्तरफाल्गुन्यां सम्भूतां श्रियमाश्रये ।
विष्णोर्दिव्यपदाम्भोजघटकां तत्पदाश्रिताम् ॥२॥

श्रीमहालक्ष्मीतनयः ।

तुलां गते दिनकरे पूर्वाषाढसमुद्भवम् ।
पद्मा पद्माम्बुजाश(स)क्तं सेनाधिपमहं भजे ॥३॥
वृषभे तु विशाखायां कुरुकापुरिकारिजम् ।
पाण्डयदेशे कलेरादौ शठारिं तमुपास्महे ॥४॥
विशाखायां समुद्भूतं वैशाखे श्रीपराङ्कुशम् ।
सेनेशचरणाम्भोजसेवयोज्ज्वलमाश्रये ॥ ५ ॥
ज्येष्ठमासे ह्यनूराधां जातं नाथमुनिं श्रये ।
यः श्रीशठारे श्रुतवान्प्रबन्धमखिलं गुरोः ॥५॥
चैत्रमासे सरोजाक्षं कृत्तिकाजातमाश्रये ।
नाथयोगिपदाम्भोजद्वन्द्वप्रवणमानसम् ॥६॥
कुम्भे मासि मघोद्भूतं राममिश्रमुपास्महे ।
पुण्डरीकाक्षपादाब्जमाश्रये मनसालिनम् ॥ ७ ॥
शुचौ मास्युत्तराषाढजातं यामुनदेशिकम् ।
श्रीराममिश्रचरणसरोजाश्रयमाश्रये ॥८ ।
धनुर्ज्येष्ठासमुद्भूतं यामुनांघ्रिसमाश्रितम् ।
महापूर्णयतीन्द्राय मन्त्ररत्नप्रदं भजे ॥ ९ ॥

चैत्राद्रयां समुद्भूतं शठकोपपदाह्वयम् ।
महापूर्णदयापात्रं यतीन्द्रमहमाश्रये ।।१०।।
वैशाखे तु विशाखायां जातं गोविन्ददेशिकम् ।
रामानुजपदाम्भोजराजहंसमुपाश्रये ।।११।।
पौषहस्तसमुद्भूतं श्रीवत्साङ्कगुरुं भजे ।
श्रीरामानुजयोगीन्द्रपादपंकजषट्पदम् ।।१२।।
माघमास्ये अनूराधाजातं भट्टार्यदेशिकम् ।
गोविन्दगुरुपादाब्जभृंगराजमहं भजे ।।१३।।
फाल्गुनोत्तरफाल्गुन्यां जातं वेदान्तिनं मुनिम् ।
श्रीपराशरभट्टार्यपादरेखामहं भजे ।।१४।।
कार्तिके कृत्तिकाजातं कलिजिद्दासमाश्रये ।
वेदान्तिमुनिपादाब्जश्रितं सूक्तिमहार्णवम् ।।१५।।
ज्येष्ठे स्वातिसमुद्भूतं जगदार्यपदाश्रयम् ।
उदकपतोलिनिलय कृष्णपादं समाश्रये ।।

श्रीकृष्णपादतनयः

तुलायां श्रवणे जातं लोकार्यमहमाश्रये ।
श्रीकृष्णपादतनयं तत्पदाम्भोजषट्पदम् ।।१७।।
विशाखायां समुद्भूतं वैशाखे मास्यहं भजे ।
श्रीशैलेशगुरुं लोकदेशिकांघ्रिसमाश्रितम् ।।१८।।
तुलामूलार्कसम्भूतं श्रीशैलेशपदाश्रयम् ।
यतीन्द्रपादप्रवणं वन्दे वरवरं मुनिम् ।।१९।।
सिंहे पुनर्वसौ जातं वरदनारायणं मुनिम् ।
रम्यजामातृयोगीन्द्रपादरेखामहं भजे ।।२०।।

श्रीजन्मनक्षत्रतनय समाप्तम् ।

3451. जयतिस्तोत्रम्

OPENING:

श्रीरामाय नमः । ॐ

जयति मीनतनपीनपावन महापुच्छस्फोटनाकृतप्रलयजलविहारी ।
लक्षजोजन महाशृङ्गधर दोरवर शेष बंधित धरणी नावधारी ।।१।।
जयति सत्यव्रजराज ऋषिहस्तगतज्ञानरत्न सप्तऋषिमानसानन्दकारी ।
असुरहत वेदउद्धारकारणकृपाधारी वरवपुप्रकटमधुकैटहा[भा]री ।।२।।
जयति सर्वबीजादिबोदि(धि)त महामत्स्यावतारविस्तारगुण कौन जाणै ।
निलिगिरि जगन्नाथ श्रुतिमाथ सोई दास माधव निरषि मन जु मानैं ।।३।।

CLOSING:

जयति योगीजनजीवनानंद पदपद्मपाणीतलविहारी ।
वेद इतिहास नैं तर्क पुराणमत आगमादिका गीत प्रीतिकारी ।।१।।

जयति प्रात शुभ काल गोपाबवल्लभ सदा कृत आरती धूम्रहारी ।
सुरनिकरसिद्धगंधर्वविद्याधरनागनरलोक सर्वजगत मंगलकारी ॥२॥
जयति निलिगिरिराजयदुसिंधुसिंधारूढरविकोटितनतेजधारी ।
नीलघनश्याममुख कमललोचन सुधादृष्टि शुभवृष्टिजनतापहारी ॥३॥
जयति राजराजेश्वराधीश जगदीश प्रभु भोगकारभीतहरि अभयदानी ।
निलिगिरिश्रीजगन्नाथ गुणगरिम महिमा महामंदमति दास माधो न जानी ॥४॥

COLOPHON : इति श्रीमाधोदासकृत जयति समाप्ता ।

3453. तालवनचरित्रस्तोत्रम्

अथ तालवनचरित्रम्—

स पातु मां यस्तृणराजराजीफलैर्विराजन्व्रजराजपुत्रः ।
सुखानि चक्राङ्ककरः सखीनां चक्रीवतां चक्रमुदस्य चक्रे ॥

जय धेनुलक्षशतगुप्तिदक्ष
वनमण्डलान्तमनुसृत्य कान्त-
मुपलब्धहर्ष कृतकेलिवर्ष
बलदेवगीतघनशाखिशीत-
वनराजिरूप पशुपालभूप
कृतपक्षिवार-चरितानुकार-
धृतमित्ररंग रसवल्गदङ्ग
पुरुमल्लयुद्ध-पटुबाहुरुद्ध-
बलदुर्दुरूढ-निजमित्रकूट
यमुनोपकूल-तरुराजिमूल-
पदभद्रसेन-कृतदुग्धफेन-
पटलानुकल्प-नवपुष्पतल्प-
वरमध्यसुप्त सुहृदालिगुप्त
वृषभानुबद्ध-मृदुरागनद्ध
कलगीतहृष्ट सुबलाभिमृष्ट-
कृतपद्मनिन्द-चरणारविन्द
विटपावतान-परिवीज्यमान
परिपक्वताल-फललुब्धबाल-
कलवाक्यरुद्ध-हसितोपगूढ-
मुखतारकेश धृतवीरवेश
घनतुङ्गताल-विपिनान्तराल-
मुपलब्ध रामसहितात्मधाम-
धुतधूर्णदग्रतृणराट्समग्र-

फलवृन्दपातकृतहर्षजात
फलशब्दरुष्ट-खररूपदुष्ट-
हरकामपालकृतहर्षमाल
तुरगारिकाल खरचक्रबाल-
तृणवीतिहोत्र रमितात्मगोत्र
हतधेनुकाद्य विबुधाभिवाद्य
तृणराजभङ्ग-भरजातरङ्ग
रिपुवर्गभीद मयि संप्रसीद

पीनापीनभरोद्गतैरनुदिनं या क्षीरपूरैर्वेला-
दम्भोजाक्ष विडम्बयन्ति निविडं क्षीराम्बुधेर्वैभवम् ।
तासां राजतगण्डशैलपटलीपाण्डुत्विषां मण्डलं
धेनूनां परिपालयन्तमटवीकुञ्जे भवन्तं भजे ।।

कलगीतनाम-छन्दः ।

3463. त्रैलोक्यविजयकवचम्

OPENING : श्रीगोपाललालजी

श्रीभगवानुवाच—

आसीनां मन्दरद्रोण्यां तुङ्गविद्यां समागता ।
पर्यपृच्छद् भक्तवरा कवचं परमाद्भुतम् ।।१।।

अनङ्गालस उवाच—

देवि मह्यं सम[ा][च]क्ष्व कवचं देवदेवयोः ।
सपूज्य प्रपठन् भक्त्या धारयामि शुचिस्मिते ।।२।।

तुङ्गविद्योवाच—

शृणु प्रिये मया प्रोक्तं वचनं ब्रह्मरूपिणम् ।
त्रैलोक्यविजयं नाम हरेर्मन्त्रौघविग्रहम् ।।३।।

CLOSING : कण्ठे वा प्रवरो नित्यं सोपि विषमो भवेत् ।
साधकः सिद्धिमाप्नोति सिद्धो मद्धाम्नि मोदते ।।४०।।
परदारपरा[त्]क्रूरात् शठात् संगमं रक्षयेत् सुधीः ।
यत्नतोऽपि पठेन्नित्यं सर्वतो मन्त्रवत् सदा ।।४१।।
अन्यथा वैपरीत्यं स्यात् तत्सर्वं प्राप्नुयात् फलम् ।

इति श्रीरत्नांतरसंहितायां नवमपटले तुङ्गविद्याप्रोक्तं त्रैलोक्यविजयं नाम कवचं सम्पूर्णम् ।

3469. दशावतारस्तोत्रम्

OPENING: ॐ श्रीनमो नारायणाय नमः । ॐ

प्रथमं मत्स्यरूपेण प्रविष्टो जलसागरे ।
हरिर्नारायणः कृष्णस्तं विष्णुं शरणं मम ॥१॥
द्वितीये कूर्मरूपेणोद्धृता पृथ्वी विशेषतः ।
कृतं समुद्रमथनं मां रक्ष शरणागतम् ॥२॥

CLOSING : मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः ।
रामो रामश्च कृष्णश्च बुध[श्च] कल्कि वै दश ॥११॥
एतानि दशनामानि प्रातरुत्थाय यः पठेत् ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥१२॥

COLOPHONE : इति श्रीदशावतारस्तोत्रं सम्पूर्णम् ।

3470. देवीकवचम्

OPENING: श्रीगणेशाय नमः ।

ॐ अस्य श्रीदेवीकवचस्य ब्रह्मा ऋषिरनुष्टुप्छन्दः श्रीमहाकाली-महालक्ष्मी-महासरस्वत्यात्मिका सकलाभीष्टार्थं काममोक्षार्थं दुर्गादेवता ह्रीं बीजं श्रीं शक्तिः चण्डिकाप्रसादसिद्ध्यर्थे जपे विनियोगः । मार्कण्डेयोवाच—

यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥ १ ॥

श्रीब्रह्मोवाच—

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥२॥

(on f. 11) प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ।
मनसा चिन्तितं कार्यं तत्सर्वं सफलं भवेत् ॥६०॥

CLOSING & COLOPHON : इति श्रीवाराहपुराणे हरिहरविरचितं देव्याः कवचम् ।

[अर्गलास्तुतिः]

(f. 12) OPENING जयन्ति मङ्गला कृष्णा भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते ॥१॥

(f. 14) CLOSING : इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ।
स तु सप्तशतीसंख्यावरमाप्नोति मानवः ॥२४॥

इत्यर्गलास्तुतिः ।

(f. 14) (उत्कीलनस्तोत्रम्)

OPENING :
विशुद्धज्ञानं देहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे ॥१॥

(f. 17)
ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः ।
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥१४॥

CLOSING & COLOPHON :
इति स्वायम्भुवागमे भगवत्या उत्कीलनस्तोत्रं सम्पूर्णं ।

3472 देवीचरित्रम्

OPENING :
×× ×× ××××××

(f. 2)
[त]स्य विघ्न[ाः] विनश्यन्ति महोत्पाताश्च दारुणाः ॥८॥
यो वै माङ्गल्यकर्मादौ गणेशाम्बिकयोर्नतिम् ।
द्वेषम्य वास्तु कुरुते न गृहं तस्यापमङ्गलम् ॥६॥
तस्मात् सर्वेश्वरीं विष्णोः त्रिकालं भक्तिसंयुतः ।
नानापुष्पैस्तथा गन्धैः पूजयेद् विविधैः फलैः ॥१०॥

CLOSING :
श्रीमहादेव उवाच—
रमाकान्त सुराधीश प्रोक्तं गुह्यतरं मया ।
नानुसूयाय वक्तव्यं मम भक्ताय माधव ॥
तद्भक्ताय च वक्तव्यं न मूर्खायाततायिने ॥२५॥
सत्यं सत्यं पुनः सत्यं मुद्धृत्यहो ममुच्यते ।
नाना(न) या सदृशी विद्या न गङ्गासदृशी नदी ।।२६॥
न वैकुण्ठात् परं धाम न मुक्तिः काशिकां विना ।
न राजा कार्त्तवीर्याद्धि एतत्सयं(त्यं)सुरेश्वर ॥२७॥

COLOPHON :
इति श्रीरुद्रयामले उत्तरखण्डे देवीचरित्रे त्रयोदशोध्यायः । शुभमस्तु

3476. द्वादशस्तोत्रम्

OPENING :
श्रीगणेशाय नमः । श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ।

वन्दे वन्द्यं सदानन्दं वासुदेवं निरञ्जनम् ।
इन्दिरापतिमाद्यादिवरदेशवरप्रदम् ॥१॥
नमामि निखिलाधीशकिरीटाद्घृष्टपीठवत् ।
द्रु(द्यु)तमःशमनेऽर्काभं श्रीपतेः पादपङ्कजम् ॥२॥
× × ×
सततं चिन्तये मंतमन्ते काले विशेषतः ।
नैवोदायुगुंणं तोंतं यद्गुणानामजादयः ।।
इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते द्वादशस्तोत्रे प्रथमोध्यायः ।
× × ×

CLOSING :

उदीर्णमजरं दिव्यं अमृतस्यन्द·· सितुः ।
आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभिवन्दितम् ॥१॥
× × ×
आनन्दतीर्थमुनिना हरेरानन्दरूपिणः ।
कृतं स्तोत्रमिदं पुण्यपठनानन्दतामियात् ॥७॥

COLOPHON : इति श्रीभगवत्पादाचार्यविरचितं द्वादशस्तोत्रे द्वादशं स्तोत्रं सम्पूर्णम् ।

[In a different hand writing]

Post-Colophonic : लिखाइतं दधीच पुरोहित देवकृष्ण भणवा के

3477. नन्दाहरणस्तोत्रम्

अथ नन्दाहरणम्—

नन्दापहारचरितस्य किरीटभृङ्ग-
भृङ्गावलीपरिचितं सलिलेश्वरस्य ।
हृद्यं सनन्दनदुरापपरागगन्धं,
वन्दे मुकुन्द तव देव पदारविन्दम् ॥१॥

नीराधिपभृत्याहृतगोपेश्वरमार्गाश्रित
लब्धाम्बुधिनाथालय पाशीडितलीलाचये
शुद्धोज्ज्वलवाणीसुध दासायितपाशायुध
मन्तुक्लमसंमार्जन [तन्निर्मितहर्षार्जन]
भक्त्यर्पितनन्देक्षण-लब्धातुलचित्तक्षण
पित्रा सह गेहं गत-मातृक्लमहारिव्रत
सर्वाद्भुतसंदर्शनचित्तान्वितनन्दानन
संकर्णितलोकोत्तर-तत्तन्निजचर्याभर-
संभावितसर्वेश्वरभावोत्सुकगोपोत्कर-
हृद्येङ्गितसंवेदन-संकल्पिततत्साधन
दिव्यह्रदमध्यार्पितगोधुग्गणसंदर्शित-
सच्चिन्मयलोकोत्तम निष्कासितगोपभ्रम
सन्धुक्षितबन्धुव्रज सञ्चारितकीर्तिध्वज
गोपीगणशर्माकर मां पालय दामोदर ।

लोको रम्यः कोऽपि वृन्दाटवीतो नास्ति क्वापीत्यञ्जसा बन्धुवर्गम् ।
वैकुण्ठं यः सुष्ठु संदर्श्य भूयो गोष्ठं निन्ये पातु स त्वां मुकुन्दः ॥

सम्फुल्लच्छन्दः ।

3480. नवरत्नप्रकाशः

OPENING :

चिन्तासन्तानहन्तारो यत्पादाम्बुजरेणवः
स्वीयानां तान्निजाचार्यान् प्रणमामि मुहुर्मुहुः ॥

ननु भगवदीयानां कथंचनोद्भेदः। इत्थं आत्मनिवेदिनो ह भगवद्भजनार्हाः नेतरे। तत्र च इहैकपारलौकिकयोः न विशिष्टं किंचिद् समर्पितं। न हि एव सन्ति देहादिनिर्वाहकेन कार्यः। किं निवेदितेनार्थेन इतरेण वा ? नाद्यः, तदीयार्थस्य तदिच्छां विना गृहीतुमशक्यत्वात् इच्छायास्तु ज्ञातुमशक्यत्वात्। वस्तुतस्तु तदिच्छायामपि सत्यां तदुपयोगोऽनुचितः सेवकस्य। × × × प्रकरणे निवेदनाभावे न भवति। च दुःखमेवंभूतान् स्वानुपदिशन्ति—चिन्ता कापि न कार्येति।

CLOSING :

भक्तिमार्गे प्रवृत्तस्य दार्ढ्यार्थमिदमुच्यते।
अन्धस्य सूर्य इव तद्विमुखस्यात्र नार्थिता॥
भक्तिमार्गे सुधासिन्धोर्विचारमथनैः स्वयम्।
स्फुटीकृतानि रत्नानि श्रीमदाचार्यपण्डितैः॥
मयो···लीकृतानीत्थं हृदि धृत्वा प्रजाधिपम्।
भजन्तु भक्त्या येनासौ न विमुंचति कर्हिचित्॥

इति श्रीनन्दाचार्यविरचितो नवरत्नप्रकाशः सम्पूर्णः। शुभमस्तु।

3484. नित्यानन्दस्तवः

OPENING

श्रीनित्यानन्दचन्द्राय नमः।

श्रीनित्यानन्द नमस्तुभ्यं चैतन्याग्रजरूपिणम्।
तव लीलाविनोदेन कृतार्थि(र्थी)कृतभूतलम्॥१॥
नित्यरूपस्वरूपश्च(ञ्च) आनन्दरसविग्रहम्।
नित्यानन्द(:) सदानन्दो नित्यानन्द(:) परात्परम्॥२॥
निजानन्द(:) सदाभोगी प्रेमानन्दप्रदायकम्।
अद्वैतहृदयानन्दं नित्यानन्दमहाप्रभुम्॥३॥

CLOSING :

सर्वजीवपरित्राणं भक्तानां सुखदायकम्।
दुष्टदर्पहरं देवं नित्यानन्द नमाम्यहम्॥१५॥
सर्वपापहरं देवं सर्वदुःखविनाशनम्।
सर्वशक्तिप्रदातारं नित्यानन्द नमाम्यहम्॥१६॥

इति श्रीशंकरघोषविरचितं श्रीनित्यानन्दस्तवरा(जः) संपूर्णम्।

3487. निम्बर्काचार्यस्तोत्रम्

OPENING:

श्रीमते सर्वविद्यानां प्रभवाय सुवर्मणे।
आचार्याय मुनीन्द्राय श्रीनिम्बाय नमो नमः॥१॥
निम्बादित्याय देवाय जगज्जन्मादिकारिणे।
सुदर्शनाय ताराय नमस्ते चक्ररूपिणे॥२॥

CLOSING:

स्थापित्वा(ता) येन द्वावंत्यां तप्तमुद्रा कलौ युगे।
निम्बार्काय नमस्तस्मै दुष्कृतामन्तकारिणे॥८॥

य इदं पठते स्तोत्रं निम्बादित्यस्य बुद्धिमान् ।
तस्य क्वापि भयं नास्ति सूर्यस्य तमसीव तु ॥ ६॥

COLOPHON : इति श्रीभगवन्निम्बादित्यस्तोत्रं संपूर्णं समाप्तम् ।

3493 नृसिंह-गण्ड-भैरुण्ड-न्यास-कवचादि

OPENING : श्रीगणेशाय नमः ।

श्रीमान् कुण्ठनाकविताकिककेशरी ।
वेदान्ताचार्यवर्यो(र्यः)संनिधत्तां सदा हृदि ॥१॥

ॐ अस्य श्रीगण्डभैरुण्डमहामन्त्रस्य भोगीन्द्रऋषिरनुष्टुप् छन्दः । अष्टमुखगण्ड-भैरुण्डनृसिंहो देवता ध्रौं बीजं श्रौ शक्तिः ग्रौं कीलकं अष्टमुखगण्डभैरुण्डनृसिंहदेवता-प्रसादसिद्धयर्थे जपे विनियोगः । × × × × × ×

वन्देऽहं घोरघोरं प्रबलतरमहागण्डभैरुण्डसिंहं,
व्याघ्रश्चक्राण्डशाखामृगखगवरो भालुकाद्यष्टवक्त्रम् ।
द्वात्रिंशत्कोटिबाहुं ज्वलमुशलगदाशंखचक्रादिहेतुं,
बिभ्राणं वज्रदंष्ट्रं शरभखगगजान् भक्षयन्तं नृसिंहम् ॥१॥

× × × × ×

(on f. 25) सनत्कुमारो(उ)वाच—

पितामहं सुरश्रेष्ठ सर्वलोकैकनायकः ।
वालीपति दयासिन्धो भगवन् भक्तवत्सलः ॥१॥

× × ×

सनत्कुमारयोगीन्द्र वक्ष्यामि शृणु मे वचः ।
अष्टास्यगण्डभैरुण्डनृसिंहस्य महात्मनः ॥

× × ×

CLOSING : अथ ध्यायें—नारसिंहं एवं च सर्वं पूर्तयेत् सर्वशत्रून् छिंदि २ हुंति २ पदं हन २ पदं व्रजत् २ ।

COLOPHON : इति श्रीगण्डभैरुण्डकवचं सम्पूर्णम् ।

Post-Colophonic लिखतं बदरिलाल टोंक का लिख छावणी मध्य शुभं भूयात्० कल्याण०

3596. पञ्चरत्नस्तोत्रं सटीकम्

OPENING : श्रीगणेशाय नमः ।

अथ शंकराचार्यकृत पंचरत्नस्तोत्र लिखियै है ।

मूल— वेदो नित्यमधीयतां तदुचितं कर्मास्व(ष्व)नुष्ठीयतां,
तच्चेतो विनिवेद्यतां च मनसा काम्ये मतिस्त्यज्यताम् ।

पापौघः परिदह्यतां भवमुखे दोषो न संधीयता-
मात्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥१॥

टीका०— श्रीभगवान् शंकराचार्यजी आपके शिष्यन को पांच सूलोक पांच रतन है। वेद के पठे विन सुरूप ग्यान उपजै नही और वेद मैं कहे जे कर्म तिनकूं नित्य ही धारणां करौ। कर्म करे विन मन सुध नहीं होइ और या मन कौं परमेसुरजी विषें लगावौ। परमेसुर मैं मन लगाये विनां संसार ते जीव तरै नहीं। मन करि कैं हु कामनां रूपी कर्म मैं बुद्धि कूं तजो। कामनारूपी कर्म ते संसार बढे है। ××××××× और यह घर है सो बंधन को दातार है सो याते विगिही निकसौ। यामैं बंधे पीछैं छूटनौं नहीं होयगौ ॥१॥

CLOSING :

मूल— ऐकान्तिकसुखमास्थितां परतरे चेतः समाधीयतां,
पूर्णात्मा हि समीक्षतां जगदिदं सम्बाधितं पश्यताम्।
प्राक्कर्मापि विलाप्यतां चितबलान्नाप्युत्तरं श्लिष्यतां,
प्रारब्धं त्विह भुज्यतामथ परं ब्रह्मात्मना स्थीयताम् ॥५॥

टीका० शि०—एकान्त मैं आसन राखनौ, सुखपूर्वक परब्रह्म परमेसुर विषैं मनकूं अछी तरै लगावौ। सब विश्व मैं आत्म पूर्ण है यह विचारौ और यह जगत् नाशवान है यह देखत रहौ। पुराचीन कर्मन कूं ग्यांन के वल ते छीन करौ। चेतना शक्ति केवल ते कोई ते उत्तार प्रत्युत्तर मति करौ और प्रारब्ध कर्मन के फल कौं भोगौ या के अनन्तर परब्रह्म परमात्मा के सुरूप कौं विचार करिकैं स्थिर होउगे ॥५॥ शि०

COLOPHON : इति शंकराचार्यकृत पंचरत्नस्तोत्रकी भाषा समाप्ता शुभं भूयात्।

Post-Colophonic : भवानीशंकरेण लिखितं स्वपठनार्थं शिवार्थं वा० शि० संवत् १९१३ का

3502. पराङ्कुश-पञ्चविंशतिस्तोत्रम्

OPENING :

श्रीमते रामानुजाय नमः।

यः पराङ्कुशमुनिं प्रसादयन्, पञ्चविंशतिमयं स्तुतिं व्यधात्।
तं वाधूलकुलभूषणं गुणैर्भूषितं वरददेशिकं भजे ॥१॥

श्रीमत्पराङ्कुशनिरंकुशतत्वबोधं,
वात्सल्यपूर्णकरुणापरिणामरूपम्।
सौशील्यसागरमनन्तगुणाकरं त्वां
संसारतापहरणं शरणं वृणेऽहम् ॥२॥

CLOSING :

अत्राप्यमुत्र करणत्रितयप्रवृत्त्या,
त्वत्पादपङ्कजजुषां विदुषां प्रसादम्।
नित्यं लभेमहि न चान्यदपेक्षितन्नः,
प्रत्यग् न केसरपरिष्कृतकारिसूनो ॥२५॥

बाधूलवेंकटपतिर्वरवार्यसूनु-
मस्मद् गुरुं तव पदप्रवणं समीक्ष्य ।
प्रज्ञं कृता···समनाथमकिञ्चनं मां
त्वत्किङ्करं शव(ठ)रिपो सततं कुरुष्व ॥३६॥

COLOPHON : इति श्रीपराङ्कुशपञ्चविंशति समाप्तम् ।

3520. भाण्डीरक्रीडनस्तोत्रम्

अथ भाण्डीरक्रीडनादि—
भाण्डीरस्य तटान्ते तरुखण्डाखण्डलस्य रणशौण्ड ।
सखि मण्डलानि वाढं विक्रीडय पुण्डरीकाक्ष ॥

सुहृदावलिपरिवीतः श्रुतिहरमुरलीगीतः
सुरभीवीथ्यनुसारी वरपीताम्बरधारी
पीनोज्ज्वलभुजदण्डः शिरसि स्फुरितशिखण्डः
शशिखण्डाभललाटः पीवरहृदयकपाटः
खरमिहिरातपवासे प्रसरत्यपि शुचिमासे
धृतमधुलक्ष्मीभारं परिहृतदावविकारं
धेनुमनोहरशादं पिककृतपञ्चमनादं
षड्जोद्गारिमयूरं विसृमरसौरभपूरं
विकसितचारुशिरीषं स्फुटमल्लीनिबिरीषं
वृन्दावनमतिहृष्टः सबलः स्वयमभिविष्टः
कल्पितभुजसङ्ग्रामः क्वचिदीहितविश्रामः
कुत्रचिदभिनवतुम्बैः क्वचिदतिकोमलकुम्भैः
क्व च परिपाकिमगुञ्जैः क्व च बिल्वामलपुञ्जैः
क्रीडन्नद्भुतचर्यः केलिषु पण्डितवर्यः
पीवरकुतुकाधारे द्वन्द्वीभावविहारे
कल्पितनिर्भरराग: कृतसखिवर्गविभागः
शीतलमरुदनुकूले भाण्डीरद्रुममूले
कृत्वा बल्लववेशं प्रविशन्तं दनुजेशं
जानन्नेव विलासी स्वीकृतवान्खलशासी
जैत्रीकृतबलपक्षः सुदुरुहक्रमदक्षः
श्रीदामप्रियकामः सुररिपुवाहितरामः
क्षपयन्प्रलम्बकायं हलिना निर्मितमायं
दैवतपरिणतलीलः सुहृदानन्दनशीलः
तत्र विदूरं याताः सुरभीर्लघुपदपाताः
सममन्विष्यन्गोपैः शंकितनिजधनलोपै-

मुञ्जाबलिविकराले विपिने क्वचन विशाले
लब्धाखिलधवलाकस्तुंगितसुखपरिपाकः
पीतभयंकरदावः प्रकटोल्लसदनुभावः
प्रणतजनोत्सवकारी त्वं भाण्डीरविहारी
गोकुलजनरससिन्धो जय जय दुर्विधबन्धो ।
कलितश्रीदामानं श्रीदामानन्दिकेलितुन्दिलितम् ।
वन्दे रामावरजं रामावरजङ्गमद्युतरुम् ।।
द्विपदिका छन्दः ।

3523. भुवनेश्वरीस्तोत्रम्

OPENING :

श्रीपरमात्मने नमः ।

ऐन्दव्या कलयावतंसितशिरोविस्तारि नादात्मकं,
तद्रूप जननि स्मरामि परमं सन्मात्रमेकं तव ।
यत्रोदेति पराभिधा भगवती भासां हि तासां पदं
पश्यन्तीमनु मध्यमा विहरति स्वैरं च सा वैखरी ॥१॥

CLOSING :

व्रतेन हीनोप्यनवाप्य मन्त्रः श्रद्धाविशुद्धोऽनुदिनं पठेद् यः ।
तस्यापि वर्षादिनवद्यपद्य-कवित्वहृद्याः प्रभवन्ति विद्याः ॥ ४३ ॥
कोऽप्यचिन्त्यः प्रभावोऽस्य स्तोत्रस्य प्रत्ययी(या)वह[ः] ।
श्रीसन्तो(गुरो)राज्ञया सर्वाः सिद्धयोऽस्मिन् प्रतिष्ठिताः ॥४४॥

COLOPHON

इति श्रीपृथ्वीधराचार्यकृतं स्तोत्रम् ।

Post-Colophonic :

संवत् १६८६ वर्षे चैत्र शु० १५......श्रीबृहत्खरतरगच्छे श्री.........लाभगणि
....................। शुभश्रेयमस्तु ।......।

3526. मत्तमयूरगोवर्द्धनस्तोत्रम्

श्रीगोवर्द्धनाय नमः ।

OPENING

गोविन्दास्योत्तंसितवंशीक्वणितोद्य-
ल्लास्योत्कण्ठामत्तमयूरव्रजवीत ।
राधाकुण्डोत्तुङ्गतरङ्गाङ्कुरिताङ्गः,
प्रत्याशां मे त्वं कुरु गोवर्धन पूर्णाम् ॥ १ ॥

CLOSING :

अद्रिश्रेणीशेखरपद्याष्टकमेतत्,
कृष्णाम्भोदप्रेष्ठ पठेद् यस्तव देही ।
प्रेमानन्दं तुन्दिलयन् क्षिप्रममन्दं,
तं हर्षेण स्वीकुरुतां ते हृदयेश ॥ ८ ॥

COLOPHON

इति मत्तमयूरकाख्यं [छन्दः]
श्रीगोवर्द्धनस्तोत्रम् ।

3529. महागणपतिस्तोत्रम्

OPENING

द्वे भार्ये सिद्धिबुद्धी तदनु सहचरी ऋद्धिवृद्धी गुणाढ्ये,
द्वौ पुत्रौ लक्षलाभौ सुकृतफलमयो मण्डपे कल्पवृक्षः ।
गेहे यस्य प्रभूतं सदशनममृतं मोदकाः खण्डमिश्रा
भूयाद् भूत्यै गणेशो जगदखिलजनानन्दकारी कुटुम्बी ॥१॥
ॐ ॐ ओंकाररूपं त्वहमिति च परं त स्वरूपं तृतीयं,
त्रैगुण्यातीतरूपं कलयति मनसा तेजसो रूपवर्त्ति ।
योगीन्द्रब्रह्मरन्ध्रे सकलगुणमयं श्रीहरीशानसंज्ञं,
गं ग गं गं गणेशं गजमुखमभितो व्यापकं चिन्तयन्ति ॥२॥
सर्वसिद्धिर्भवेत्तस्य विघ्नं क्वापि न जायते ॥११॥

CLOSING :

वक्रतुण्डमिदं स्तोत्रं त्रिकालं यः पठेत् पुमान् ।
सर्वसिद्धिर्भवेत्तस्य विघ्नं क्वापि न जायते ॥ ११ ॥
यस्य कस्य न दातव्यं वक्रतुण्डाभिधस्तवम् ।
स्तोत्रं वै विघ्नराजस्य सर्वकामफलप्रदम् ॥१२॥

COLOPHON : इति श्रीशंकराचार्यविरचितं महागणपतिस्तोत्रं समाप्तिमगमत् ।

Post-Colophonic लिखितमिदं श्रीशंकरेण महत्तरश्रीभूधरजित्पठनार्थं । शुभं भवतु ॥

3532. महालक्ष्मीहृदयस्तोत्रम्

OPENING:

श्रीगणेशाय नमः ।

ॐ अस्य श्रीलक्ष्मीहृदयस्य शिरसि भार्गवऋषये नमः मुखे त्रिष्टुप्छन्दसे नमः हृदये श्रीमहालक्ष्म्यै देवतायै नमः । इति न्यासः । × × × × × × × अथ ध्यानम्—

पीतवस्त्रां सुवर्णाङ्गीं पद्महस्तां गजान्विताम् ।
लक्ष्मीं पतिमंत्रेण स भवेत् पृथिवीपतिः ॥१॥
हस्तद्वयेन पद्मानि धारयन्तीं च लीलया ।
हारनूपुरसंयुक्तां लक्ष्मीं देवीं विचिन्तयेत् ॥२।

इति ध्यायेत् ।

CLOSING:

सुवर्णवृद्धिं कुरु मे गृहे श्रीः सुधान्यवृद्धिं कुरु मे गृहे श्रीः ।
कल्याणवृद्धिं कुरु मे गृहे श्रीः विभूतिवृद्धिं कुरु मे गृहे श्रीः ॥१०७॥

शिरो बीजानि—ओ यं हं कं लं पं श्रीः ।
ध्यायेल्लक्ष्मीं प्रहसितमुखीं कोठिबालार्कभासां,
विद्युद्वर्णाम्बरवरधरां भूषणाढ्यां सुशोभाम् ।
बीजापूरं सरसिजयुगं बिभ्रती स्वर्णपात्रं,
भर्त्रायुक्तां मुहुरभयदां मह्यमप्यच्युतश्रीः ॥१०८॥

COLOPHON : इत्यथर्वणरहस्ये आद्यादिश्रीमहालक्ष्मीहृदयस्तोत्रं सम्पूर्णम् । श्री

3534. मानसोल्लासप्रबन्धः सटीकः

OPENING: ॐ श्रीगणेशाय नमः । श्रीवरदमूर्त्तिर्जयति । ॐ ।

प्रोद्यच्छाखमहावटद्रुमतटे योगासनस्थं प्रभुं,
प्रत्यक्तत्त्वबुभुत्सुभिः प्रतिदिशं प्रोद्वीक्ष्यमाननम् ।
मुद्रां तर्कमयीं दधानममलं कर्पूरगौरं शिवं,
हृद्यन्तः कलये स्फुरन्तमनिशं श्रीदक्षिणामूर्त्तिकम् ॥१॥

नत्वाथ शंकराचार्यमुख्यान् सर्वान् गरीयसः ।
मानसोल्लासवृत्तान्तं वर्णयामि यथामति ॥२॥

इह हि भाष्यकारः श्रीमच्छङ्कराचार्यनामा मन्दमतींस्तत्त्वजिज्ञासूननुगृहीतुं दक्षिणामूर्तिस्तोत्रव्याजेन समस्तवेदान्तार्थरहस्यमाविश्चकार दशभिः पद्यबन्धैः तच्छिष्येण विश्वरूपाचार्येण सुरेश्वरापरनाम्ना तत्पद्यप्रबन्धार्थतत्त्वं तात्पर्यतो मानसोल्लासनाम्ना वार्तिकात्मना ग्रन्थसन्दर्भेणाविःकृतं तमिमं ग्रन्थं यथाशक्ति विवृणोमि । तत्र शिष्टाचारसंरक्षणाय कृतं मङ्गलाचरणं द्योतयति । अयमाद्यः श्लोकः 'मङ्गलमिति' ।

मङ्गलं दिशतु मे विनायको मङ्गलं दिशतु मे सरस्वती ।
मङ्गलं दिशतु मे महेश्वरो मङ्गलं दिशतु मे महेश्वरी ॥१॥

CLOSING & COLOPHONE: इदानीमशेषं स्तोत्रं तात्पर्यतो व्याख्याग्रन्थप्रचयविघ्नोपशान्तये शिष्टाचारसंरक्षणाय च मङ्गलं स्वेष्टदेवताप्रार्थनारूपमाचरति—

प्रकाशात्मिकया शक्त्या प्रकाशप्रभवाकरः ।
प्रकाशयति यो विश्वं प्रकाशोऽसौ प्रकाशताम् ॥२४॥

इति श्रीदक्षिणामूर्त्तिस्तोत्रार्थप्रतिपादके प्रबन्धे मानसोल्लासे दशमोल्लाससंग्रहः श्रीः श्रीः श्रीः ।

प्रकाशात्मिकयेति । आदित्यादिप्रकाशानामपि प्रभवाकर इत्यर्थः । स्वयमेव प्रकाशत इत्यर्थः । इदं श्लोकव्याख्योपसंहारश्लोक इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादक इति ।

इति श्रीमानसोल्लासप्रबन्धोऽयं यथामति ।
व्याख्यातो रामतीर्थेन गुरुदेवप्रसादतः ॥

अनेन भगवान् श्री[मद्]दक्षिणामूर्त्तिरीश्वरः ।
गुर्वात्मा प्रीयतां नित्यं तत्त्वज्ञानप्रदः सताम् ॥

इति श्रीदक्षिणामूर्त्तिस्तोत्रव्याख्या प्रबन्धमानसोल्लासवृत्तान्तविलासः सम्पूर्णः ।

Post-Colophonic संवत् १९१६ आश्विन कृष्ण ७ चन्द्रवासरे ।

3538. यमुनास्तोत्रम्

OPENING : श्रीकृष्णाय नमः ।

नमो देवि यमुने हरकृष्णमिलनान्तरायम् । ध्रु. ।
निजनाथमार्गदायिनि कुमारी कामपूरके कुरु भक्तिरायम् ।
मधुपकुलकलितकमलावलीव्यपदेशधारित-श्रीकृष्णयुतभक्तहृदये ।
सततमतिशयित-हरिभावनाजात-तत्सारूप्यगदित निजहृदये ॥१॥
निजकूलभवविधतरुकुसुमयुतनीरशोभया विलसदलिवृन्दे ।
स्मारयसि गोपीवृन्दपूजितसरसमीशवपुरानन्दकन्दे ॥२॥

CLOSING : वृन्दावने चारु वृहद्वने मन्मनोरथं पूरय सूरसूते ।
दृग्गोचरं कृष्णविहार एष स्थितिस्तदीयेषु तटेषु भूयात् ॥९॥
व्रजपरिवृढवल्लभे कदा त्वच्चरणसरोरुहमीक्षणास्पदं मे ।
तव तटगतवालुकाः कदा हंसकलनिजांगगता मुदा करिष्ये ॥१०॥

3539. यमुनास्तवः

श्रीहरिप्रियायै नमः ।

श्रीनिम्बार्कमहं वन्दे सार्वभौमपतिं विभुम् ।
सर्वाचार्यशिरोरत्नं निम्बादित्यमहं भजे ॥ १ ॥
श्रीवृन्दावनदेवं तं नत्वा सर्वेश्वरं हरिम् ।
कुर्वे रम्यं महाशुद्धं यमुनाख्याः सत स्तवम् ॥
राधादासी महाभागा कालिन्दी हंसजा शुभा ।
यमुना भासरि द्वारा मोहना मा त्रयी रमा ॥३॥
श्रीदा कृपाली रामेशा सर्वतीर्थप्रकाशिनी ।
सर्वपापहरा पुण्या सर्वतीर्थशिरोमणिः ॥४॥
राधाकृष्णरहस्यज्ञा वृन्दावननिवासिनी ।
सप्तसागरभेत्रीष्टा श्रृङ्गाररसरूपिणी ॥५॥

इति श्रीभट्टाचार्यविरचितं यमुनास्तवः समाप्तः ।

3540. युगलस्तवराजः

श्रीकृष्णाय नमः ।

OPENING : वन्दे वृन्दावनाधीशौ रसिकौ श्यामसुन्दरौ ।
सनव्यवयसा युक्तौ गौरश्याममलविग्रहौ ॥१॥

CLOSING : स्रवन्ति[त]त् मुखाम्भोजौ पादपद्मसुधामयौ ।
एवं ध्यात्वा पठेद् यस्तु युगलस्तवराजकम् ॥४७॥

रसिका प्रेयसी भु(भू) त्वा नियतं तत्र तिष्ठति ।
तत्क्षणात् लभते सत्यं सन्निकर्षमवाप्नुयात् ॥ ४८ ॥

COLOPHON: इति श्रीमद्रूपगोस्वामिविरचितो श्रीयुगलस्तवराजः सम्पूर्णम् ।

3541. रंगस्थलक्रीडास्तोत्रम्

OPENING: अथ रङ्गस्थलक्रीडा —

क्रियाद् वः कल्याणं भुजसमरशौटीर्यकणिका,
विकासेनोद्धूय प्रकटबलमल्लप्रतिभटान् ।
भजन् स्वैरी रङ्गे मदकलमृगेन्द्रस्य ललितं,
कचाकृष्टिक्रीडामथितमथुरारिर्मधुरिपुः ॥

यः पौरलोकारविन्दावलीहेलि-
रङ्गीकृतोत्तुङ्गरङ्गस्थलीकेलि-
रापीतकौशेयशोभोल्लसन्मूर्त्ति-
रावर्त्तिताशेषलोकोत्सवस्फूर्त्ति-
रुत्फुल्ललावण्यकल्लोलिनीसिन्धु-
राधिज्वराधीनदीनावलीबन्धु-
रक्षीणकण्ठीरवाकुण्ठविक्रान्ति-
रुग्रं ममर्दोरु दन्तीन्द्रमश्रान्ति ।

× × ×

CLOSING: गोपाङ्गनानेत्रपानैकभृङ्गार
पुष्पावलीलब्धसर्वाङ्गशृङ्गार
संदर्शितोदारमाधुर्यविस्तार
विध्वंसनारब्धभोजेन्दुनिस्तार ।
भो देवकीशौरिबन्धार्त्तिलुण्ठाक
दिक्चक्रपालक्वणत्कीर्त्तिघण्टाक
भक्तोग्रसेनार्पितस्फीतसप्ताङ्ग
मां रक्ष कुब्जाङ्गरागेण लिप्ताङ्ग ।
मल्लानुल्लंघ्य रङ्गे करविचलदसिर्येन मञ्चप्रपञ्चे,
केशेष्वाकृष्य कंसो विघटितमुकुटं विघ्नहेतुर्निजघ्ने ।
स त्वं सत्वाधिराजस्फुरदुरुकरुणाडम्बरालम्बिचेताः,
पातद्दुःखाब्धिपाताद् यदुकुलकमलोद्दण्डचण्डद्युतिर्माम् ॥

मनसिजफणिपु(जु)ष्टे लब्धपातोऽस्मि दुष्टे,
तिमिरगहनरूपे हन्त संसारकूपे ।
अजितनिखिलरक्षाहेतुमुद्धारदक्षा-
मुपनय मम हस्ते भक्तिरज्जुं नमस्ते ॥

समस्तपुरुषार्थतः पृथुतयाद्य भक्ति विदन्,
वदन्नपि न यद्भजेत्त्वदकृपात्र हेतुर्विभो ।
प्रसीद यमुनातटे लुठितमूर्त्तिरभ्यर्थये,
कृपां कृपणनाथ हे कुरु मुकुन्द मंदे मयि ॥
भृङ्गारच्छन्दः ।
इति कंसवधनां(धान्ता) महालीला समाप्ताः ।

3543. राधाकवचम्

OPENING : श्रीगणेशाय नमः । श्रीराधायै नमः ।

श्रीपार्वत्युवाच—
देवदेव महादेव परमप्रीतिदायक ।
श्रीराधाकवचं देव कथय प्राणवल्लभ ॥१॥

श्रीमहादेव उवाच—
साधु साधु महादेवि भद्रं भद्रं सुमङ्गलम् ।
प्रेमभावान्विता[दिव्]या ..राधायाः कवचं परम् ॥२॥
श्यामप्रेमविलासिन्या गोपिकाप्रेमसागरे ।
मनो या कवचं देवि कथयामि शृणुष्व तत् ॥३॥

CLOSING : द्विजाय भक्तिहीनाय दुष्टाय न प्रकाशयेत् ।
श्वपचाय सदा देयं यद्धि भक्तियुतो भवेत् ॥१६॥
मज्ज्ञात्वा कवचं देवी राधाकृष्णं भजेत यः ।
युगाय कृतक्लेशाय प्रेमभक्तिर्न जायते ॥२०॥

COLOPHON : इति श्रीब्रह्मना(या)मले हरगौरीसम्वादे श्रीराधाकवचं सम्पूर्णम् । शुभमस्तु ।

3553. रामप्रियस्तोत्रम्

OPENING : अयि जगनन्दन नन्दनन्दिनी विश्वविमोहनकान्तरते ।
सुरवरवन्द्य सरोजनिवासिनि हे मृदुहासिनि मन्त्रनुते ।
ईश्वरि हे निज ईशकुटुम्बिनि रूपबिठ(डं)विनि भूरिक्रमे,
जय जय हे मिथिलेश्वरनन्दिनी अम्ब सुमण्डनि रामप्रिये ॥१॥

CLOSING : मम हृदिजं रघुपतिप्रियकारिणि हे वैदेहि कदा क्रियते,
अहं न जाने तव पदमन्य[त्]जानकी दुःखं देहि घरे ।
परिदमखिलद्दसि मनोभव त्यक्त्वा पाठं स न सि कृते,
तदपि सकलसु तव कृपातः सर्वसं स्यात् समरे ।
जय जय हे मिथिलेश्वरनन्दिनि अम्ब सुमण्डिनि रामप्रिये ॥८॥

COLOPHONE : इति श्रीरामप्रियस्तोत्रंमधुकरदासे[न]विरचितायां संपूर्ण समाप्ताः ।

3559. रामरक्षास्तोत्रम्

OPENING :

ॐ। शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥१॥

ॐ अस्य श्रीरामरक्षास्तोत्रमालामन्त्रस्य श्रीभगवान् वामदेव ऋषिः, अनुष्टुप् छन्दः श्रीरामचन्द्रो(:)परमात्मा देवता, महाविष्णुरिति बीजं ×××××× इति हृदयम् अथ ध्यानम्।

ॐ। चरितं रघुनाथस्य शतकोटिप्रविस्तरम्।
एकैकमक्षरं पुंसां महापातकनाशनम् ॥१॥

श्रीरामचन्द्र रणकर्कश राम राम, श्रीराम राम भरताग्रज राम राम।
श्रीराम राम रघुनन्दन राम राम, श्रीराम राम शरणं भव राम राम ॥१॥

अथ ध्यानं।

ॐ। ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम्।
जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम् ॥१॥

CLOSING :

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरं,
काकुत्स्थं करुणाकरं गुणनिधिं विप्रप्रियं धार्मिकम्।
राजेन्द्रं सत्यसंधं दशरथतनयं श्यामलं शान्तमूर्त्तिं,
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥३५॥

राम रामेति रामेति रमे रामे मनोरमे।
सहस्रनामतत्तुल्यं रामनाम वरानने ॥३६॥

COLOPHON : इति श्रीविश्वामित्रविरचितं रामरक्षास्तोत्रं सम्पूर्णम्। श्री श्री

8560. रामरक्षास्तोत्रम्

Same as above.

3562. रामरक्षा-विवरण-कारिका

श्रीगणेशाय नमः।

OPENING :

ॐ नमः श्रीमत्परमहंसास्वादितचरणकमलचिन्मकरन्दाय भक्तजनमानसनिवासाय श्रीरामचन्द्राय।

रघूणां वंशेस्मिन् दशरथनृपादादिरभवद्,
हरिः कौशल्यायां समधिगतविद्यः कुशिकजात्।
क्रतुघ्नानुत्साद्य स्वयमजनि यो लक्ष्मणमुरु-
दधद् बाह्यं चास्त्रं भरतमपि विद्याभिरपुजत् ॥१॥

CLOSING :

इतीदं द्विर्नाम्नां दशकमिह रामायणमहा-
कथासूत्रं सा च प्रकटयति वेदान्तहृदयम्।

कथाशीर्षाद्यात्मद्विदशपदतो भूतपुरुषैः,
स्वशीर्ष्याद्यं रक्ष्यं हृदयमपि तस्या हृदयतः ॥१५॥

COLOPHON: इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरन्धरचतुर्धरवंशावतंसगोविन्दसूरिसूनोः श्रीनीलकण्ठस्य कृतिः श्रीरामरक्षाविवरणकारिकाः समाप्ताः ।

3566. रामानुजाचार्यावयव-वर्णनस्तोत्रम्

OPENING: भूतं मस्तकमक्षिणी ह्रदमहत् सूरिं च भट्टेश्वरं,
वक्त्रं भक्तिधनं गलकुलशिरोभूषं मुनिं गायकम् ।
दोर्युग्मं हरिदास यत्रज गुरो नाभिः कलिध्वंसिनं,
श्रीपादं मधुरः कविं यतिपतिं चाहुश्शठारेर्बुधाः ॥१॥

मस्तकं श्रीशठारातिं नाथाख्यं मुखमण्डलम् ।
नेत्रयुग्मं सरोजाक्षं कपोलं राघवं तथा ।
वक्षःस्थलं यामुनाख्यं कण्ठं श्रीपूर्णदेशिकम् ।
बाहुद्वयं गोष्ठिपूर्णं शैलपूर्णं स्तनद्वयम् ॥२॥

CLOSING: एवं रामानुजार्यस्यावयवा निखिलान् गुरून् ।
अवयविनं महात्मानं रामानुजमहं भजे ॥७॥
गुरुमूर्त्यात्मयोगीन्द्रं यो ध्यायेत् प्रत्यहं नरः ।
सर्वान् कामानवाप्नोति लभते च परं पदम् ॥८॥

3567. रासक्रीडास्तोत्रम्

OPENING: अथ रासक्रीडा—
परिस्फुरतु सुन्दरं चरित्रमत्र लक्ष्मीपते-
स्तथा भुवननन्दिनस्तदवतारवृन्दस्य च ।
हरेरपि चमत्कृतिप्रकरवर्द्धनः किन्तु मे,
बिभर्त्ति हृदि विस्मयं कमपि रासलीलारसः ॥

शारदविधुवीक्षणमधुवर्धितमदपूर
इष्टभजनवल्लभजनचित्तकमलसूर
गोपयुवतिमण्डलमतिमोहनकलगीत
मुक्तसकलकृत्यविकलयौवतपरिवीत
योषिदमलनेत्रकमललोभिदशनमाल
कौतुकभरनिर्मितस्व(ख)रनर्मवचनजाल
तन्निशमनसाश्रुनयनभीरुभिरनु(भि)नीत
वल्लभजनखेदशमनविभ्रमभरवीत ।

CLOSING: रम्भोरुनिकुरम्बनिर्भरपरीरम्भेण लब्धद्युते-
र्बिभ्राणस्य तडित्कदम्बविलसत्कादम्बिनीविभ्रमम् ।

क्रीडाडम्बरधूतजभ (म्भ) मथनस्तम्वेरमोरुश्रियो
रासारम्भरसार्थिनस्तव विभो वन्दे पदाम्भोरुहम् ।
ललितत्रिभङ्गी छन्दः ।
उल्लव[ब]ल्लवललनाधरपल्लवचुम्बनोल्लसितम् ।
नौमि समल्लीमाल्यं हरिमिह हल्ली (ल्ला) सकोत्फुल्लम् ॥

3570. रूपचिन्तामणिः

OPENING

श्रीकृष्णचरणचिह्नानां माहात्म्यम्—
स्वस्तिकं हन्ति सन्तापं पद्मं सद्गुणलक्षणम् ।
नान्यत्र मार्गो भक्तानामूर्ध्वरेखां तु धारणम् ॥१॥

× × ×

जम्बुवृन्दावनध्यानमम्बरं भक्तमण्डनम् ।
श्रीकृष्णपदचिह्नानां स्मरतां भक्तिप्रापकम् ॥५॥

अथ श्रीराधिकाचरणचिह्नानां माहात्म्यम्—
छत्रं त्रितापनाशाय चक्रं भक्तौघता रणे ॥१॥

× × ×

शत्रोर्विदारणं शंखं श्रीराधाचरणाब्जयोः ।
पठेच्च चिन्तयेद् यस्तु गोलोकं समवाप्नुयात् ॥

इति श्रीराधाकृष्णचरणचिह्नमाहात्म्यम् ।

जय जय श्रीमन्नित्यकुञ्जविहारीराधाकृष्णौ विजयतेतराम् ।
चन्द्रार्धं कलशं त्रिकोणधनुषी खं गोष्पदं प्रोष्ठिकां,
शंखं सव्यपदेऽथ दक्षिणपदे कोणाष्टकं स्वस्तिकम् ।
चक्रं छत्रयवांकुशं ध्वजपवी जम्बूर्ध्वरेखाम्बुजं
बिभ्राणां हरिमूनविंशति महालक्ष्म्यार्चितांघ्रि भजे ॥१॥

CLOSING:

सीमन्तरेखां स्मरचित्तचूडामणिप्रसूनावलिगुम्फचित्राम् ।
वेणीं त्रिवेणीमिव बन्धपाशां विराजदग्रामथ मन्दहास्याम् ॥३०॥

श्रीराधिकामाधवरूपचिन्तामणौ मनो द्वित्रिरथो चतुर्वा ।
आवर्त्तयेद् यो धृतिमान् पठन् सत् प्राप्नोति तद्दर्शनमाशु साक्षात् ॥३१॥

COLOPHON

इति श्रीचक्रवर्तिविरचिता रूपचिन्तामणिः सम्पूर्णा ।

Post-Colophonic:

म्हा० कृ० ३० श० १८९० रामनारायणस्य राधाकृष्णौ ।

3574. लक्ष्मीस्तोत्रम्

OPENING : अथ लक्ष्मीस्तोत्र लिपतै । रामचन्द्र उवाच—

जय त्वं कमलपत्राक्षी जय त्वं श्रीपतिप्रिये ।
जय मातु महालक्ष्मीं संसारार्णवतारिणीम् ॥१॥

CLOSING : यः पठेत् प्रातरुत्थाय श्रद्धाभक्तिसमन्वितः ।
गृहे तस्मिन्सदा तिष्ठेत् नित्यं श्रीपतिसाधये ॥२४॥
सुखसम्पत्तिसौभाग्यसम्पन्नो बुद्धिमान् भवेत् ।
पुण्यवान् गुणवान् श्रेष्ठो भोक्ता मोक्ता च मानवः ॥२५॥

COLOPHON : इति श्रीलक्ष्मीस्तोत्र सम्पूर्णम् ।

3579. वर्णमाला-स्तोत्रम् (वाक्पुष्पोपहारः)

OPENING : श्रीगुरुपादुकायै नमः ।

श्रीसत्यानन्दनाथांघ्रि नत्वाश्रित्य कृपादृशम् ।
संमाष्र्दुं मलिनं चित्तं निर्मास्ये जान्हवीं नवाम् ॥१॥

वसन्ततिलकावृत्तम्

शोणामृताब्धिपरिखीकृतशातकुम्भ-
द्वीपे कदम्बवनमध्यसुरद्रुमाढ्ये ।
चिन्तामणिप्रमुखरत्नविचित्रगेहे,
माणिक्यसिंहधृतरत्नचतुष्कवेद्याम् ॥

अ— वेधा हरीशगिरिशीकृतमञ्चपादे,
शय्या सदा शिवकृते कशिपूपबर्हे ।
कामेश्वरांकनिलयां जगतां सवित्रीं,
ध्यायामि कच्चरमनः परिशुद्धिकामः ॥

CLOSING : णो— सुधाकरतनोरिदं शकलमर्द्धमेतद् ध्रुवं,
ललाटमिति तद्बहिः श्रमजलोत्थबिन्दूपमाः ।
लसन्नलकमौक्तिकाः किमु सुधाझरी विप्रुषो,
हरन्तु हृदयात्तमो मम वचांसि सिद्धयन्तु च ॥

णौ— भ्रुवौ मदनकार्मुकं नयननीरजं यच्छरो
गुणानि मगणादयस्तिलकमैणजं मुष्टिधृक् ।
शरव्यमभवत् प्रियस्त्रिजगतां पतिः शंकर-
स्सिसृक्षयिषया भवत्वखिलवाचि सिद्धिर्मम ॥

णं— किरीटममलं मणिप्रवरमौक्तिकालंकृतं,
त्रिभिश्च मणिशेखरैररुणभाविचित्रीकृ[तम्] ।

....

3581. वस्त्रहरणस्तोत्रम्

OPENING : अथ वस्त्रहरणम्—

स्म(स्मे)राभिः सलिले कलिन्ददुहितुर्मग्नाभिराकन्धरं,
स्कन्धन्यस्तसमस्तपट्टवसनो नर्मोक्तिभङ्गीपटुः ।
निर्व्याजं व्रजकन्यकाभिरसकृद् भव्याभिरभ्यर्थितः,
पायात्तुङ्गकदम्बशाखिशिखराख्ढस्त्रिलोकीं हरिः ।

CLOSING : प्रणतमण्डलाभीष्टकामधुक् कमनबल्लवीमल्लिकामधुक् ।
त्वमखिलेश मामिन्दिरालय व्रजमहेन्द्र [हे] देव पालय ॥
विदधानयापि धवलं तव जगदेवाद्य कीर्त्तिचन्द्रिकया ।
केशव पशुपालीनां चित्रं द्विगुणीकृतो रा[गः] ॥

इन्दिरा छन्दः ।

3583. वत्सहरणादिचरितस्तोत्रम्

OPENING : अथ वत्सहरणादिचरित्रम्—

आभासोऽपि श्रुतपरिसरे तावकीनस्य नाम्नः,
सर्पन्नल्पं लघुतरमघस्तोममोक्षं करोति ।
नैतच्चित्रं सखिभिरखिलैरन्तरालं प्रविष्टो,
यद्गोविन्दः स्वयमघमयं मोक्षयस्यै(स्ये)कमेव ॥

काननान्तभुक्तिकाममुच्चनादपूरधाम-
शृङ्गबुद्धवत्सपालवल्गुबालचक्रवाल-
सङ्गलब्धतोषजालमग्रनुन्नवत्सपाल-
मद्भुतातिभूरिखेलमित्रसंगनीतवेल-
मङ्गरुद्धकाननस्य शार्वराधि(ञ्चि)ताननस्य
दावतुल्यलोचनस्य पूतिगन्धिमोचनस्य
मेघभागतानवस्य सर्परूपदानवस्य
वीक्षयातिविस्मितेन तस्य कुक्षिमाश्रितेन ।

CLOSING : यां निर्वक्तुमभूत्प्रभुर्न हि चतुर्वक्त्रोऽपि ते माधुरीं,
तामुद्घाटयताद्य यद्यपि सतां हासो मयात्म(त्मी)कृतः ।
वैयर्थ्याय तथापि देव भविता नायं ममोपक्रमः,
सर्वानर्थहरस्त्वदीयभजना[भा]सोऽपि यद्विश्रुतः ॥

अशोकमञ्जरी छन्दः ।

3587. विलासकुसुमाञ्जलिः (स्वयमुत्प्रेक्षितलीला)

OPENING श्रीकृष्णाय नमः ।

अथ स्वयमुत्प्रेक्षितलीला—

श्यामलसुन्दरसौहृदबद्धा कामिततत्पदसङ्गतिरद्धा ।
धैर्यमसौ स्मरवर्द्धितबाधा प्राप न मन्दिरकर्मणि राधा ॥१॥

तं कमलेक्षणमीक्षितुकामा सा छलतः स्वयमुज्झितधामा ।
यामुनरोधसि चारु चरन्ती दूरमविन्दत सुन्दरदन्ती ॥२॥

दोधकम् ।

प्राप्योदारां परिमलधारां कंसारातेरुदयति वाते ।
सेयं मत्ता दिशि दिशि यत्ता दृष्टिं कम्रामकिरदनम्रा ॥३॥

CLOSING : स्मितमुदितकपोलां निर्मितापाङ्गदोलां,
वरयुवतिषु राधां प्रेमपूरादगाधाम् ।
स दलितलतिकान्तर्यो निनायातिकान्तः,
स हरिरलमभीष्टप्रापणं मे कृपीष्ट ॥३०॥

मालिनी ।

इति विलासकुसुमाञ्जली, स्वयमुत्प्रेक्षितलीला ।

3595. व्रजविहारस्तोत्रम्

OPENING : श्री । गायन्तीनां गोपसीमन्तिनीनां स्फीताकांक्षामक्षिरोलम्बमालाम् ।
निश्चाञ्चल्यामात्मवक्त्रारविन्दे कुर्वन्नव्याद् देवकीनन्दनो वः ॥१॥

सुपर्णस्वर्णाद्रौ रचितमणिशृङ्गो जलधिजा-
मुखाम्भोजे भृङ्गो निगमविलसत्पञ्जरशुकः ।
त्रिलोकीकस्तूरीतिलककमनीयो वच्र(व्रज)वधू-
विहारी श्रीकृष्णो विशतु भवतां शर्म सततम् ॥२॥

CLOSING : वने वने कुञ्जवने मुरारिर्भ्रमन् भ्रमन् राजति राधिका च ।
सहैव कुञ्जे रमते च राधया पायादपायादिह कृष्ण एकः ॥१९॥

अनन्तविश्वम्भर वासुदेव समस्तदेवैरपि वन्द्यपाद ।
निरामयत्राणपते मुरारे हरे हराशेषमहाघसंघम् ॥२०॥

COLOPHON : इति श्रीधरस्वामिना विरचितं व्रजविहारकाव्य समाप्तम् ॥

मा मे स्त्रीत्वं मा च मे स्यात् कुभार्या,
मा मूर्खत्वं मा कुदेशेषु जन्म ।
मिथ्यादृष्टिर्मा च मे स्यात् कदाचिद्,
जातौ जातौ विष्णुभक्तो भवेऽहम् ॥१॥

3617. शिवमहिम्नस्तोत्रं सटीकम्

OPENING :

श्रीगणेशाय नमः ।

अथ महिम्नस्तवव्याख्याप्रारम्भः । श्रीशिवाय गुरवे नमः ।
ईशानं सर्वविद्यानां ईश्वरं पार्वतीपतिम् ।
भजामि श्रीमहादेवं सर्वदेवोत्तमोत्तमम् ॥१॥

व्यालमालमनलामलभालं शूलपालममलामलशीलम् ।
कालकालमकलाकलयामो लीलयालमनुवेलमलीलम् ॥२॥

महेश्वराराधनदत्तशीलः श्रीमन्महिम्नोऽर्थविचारशीलः ।
अहोबलः पूजितकालकीलः टीकां महिम्नस्तनुते सुशीलः ॥३॥

अथ ख-पुष्पनामा कश्चन गन्धर्वविशेषः शिवैकशरणो भूत्वा शिवप्रसादार्थं हिमवत् पर्वते तपः कृत्वा स्वतपःसन्तुष्टे शङ्करे प्रसन्ने स्वशक्त्या शिवचरणाम्बुरुहश्रीफल-दलादिभिः समभ्यर्च्य श्रीशंकरं स्तोतुमिच्छन् शङ्करगुणानामनन्तत्वादप्रमेयत्वात् गुण-कथनरूपस्तुतिकरणमशक्यमित्याशंक्य स्वानौद्धत्यं च प्रकटयन् स्तोतुमारम्यते-महिम्न इति ।

CLOSING:

श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन.
स्तोत्रेण किल्बिषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन,
सुप्रीणितो भवति भूतपतिर्महेशः ॥४१॥

इति श्रीमन्महेश्वरभजनैकध्यानेन भास्करीयवंशोद्भव-नृसिंहभट्टात्मजाहोबलेन विरचिता महिम्नस्तवव्याख्या सम्पूर्णा । श्रीगौरीशंकरार्पणमस्तु शिवं भवतु । श्रीगौरी-शंकरःप्रसन्नोऽस्तु ।

गायश्रीवल्लभत्वाद्दशरथतनयस्थापिताराधितत्वा-
च्छौरेः कैनासयात्राप्रमुदिततनयाभीष्टसन्तानदानात् ।
नेत्रेण[स्वेन]साकं दशशतकमलैर्विष्णुनाराधितत्वा-
त्तस्मै चक्रप्रदानादपि च पशुपतिः सर्वदेवप्रकृष्टः ॥

इति हेतुशतश्लोकः ।

3621. शिवमहिम्नस्तोत्रं सटीकम्

OPENING (w.)

श्रीगणेशाय नमः । ॐ नमः शिवाय ।

महिम्नः पारं ते.........

श्रीगणेशाय नमः । ॐ नमः शिवायः ।

Ct.

हे हर ! तव महिम्नो महत्वस्य परं पारमहत्यर्थमवसानमविदुषो जानतः । पुरुषस्य स्तुतिः यद्यसदृशी अननुरूपा भूयात् तर्हि ब्रह्मादीनामपि गिरो वाचः त्वयि

त्वद्विषये अवसन्नाः कुण्ठिताः । अथेति पृच्छति । सर्वः समस्तपुरुषः स्वमतिपरिणामावधि यथा भवति तथा गृणन् स्तुवन् अवाच्यः न निन्द्यः स्वमतिः स्वबुद्धिस्तस्याः परिणामः परिपाकः सोवधिः सीमा यस्मिन्निति क्रियाविशेषणं ममापि स्तोत्रे तव स्तुतौ एषः परिकरो यत्नो निरपवादो निर्दोष इति वाक्यार्थः ।.१॥

CLOSING: कृशपरिणतिचेतः..॥३१॥

इदं मदीयं चेतो मानसं किम्भूतं कृशपरिणति कृशा परिणतिः परिणामो यस्य तत् । स्वल्पविचारगोचरमित्यर्थः । तथा क्लेशवश्यं दुःखपराधीनं तर्वद्धि हि मा क्व । किम्भूता शश्वत्सर्वदा गुणसीमोल्लंघिनी गुणमर्यादामतिक्रान्ता इत्यनेन प्रकारेण चकितं भीतं मां हे वरद तव चरणयोर्भक्तिः अमन्दीकृत्य भीतिरहितं कृत्वा वाक्यपुष्पोपहारमाधात् वाक्यान्येव पुष्पाणि तेषामुपहारः पूजामकल्पयत् ॥३१॥

OPENING: समाप्तोऽयं महिम्नटीकाग्रन्थः ।

3628. श्यामादण्डकस्तोत्रम्

COLOPHON: श्रीगुरुपादुकायै नमः ।

जय मातङ्गतनये जय नीलोत्पलद्युते ।
जय संगीतरसिके जय लीलांशुकप्रिये ॥

जय जननि ! सुधासमुद्रान्तरुद्यन्मणिद्वीपसंरूढबिल्वाटवीमध्यकल्पद्रुमाकल्पकादम्बकान्तारवासप्रिये ! कृत्तिवासप्रिये ! सादरारब्धसङ्गीतसम्भावनासम्भ्रमाल्लोलनीपास्रगाबद्धचूलीसनाथत्रिके ! सानुमत्पुत्रिके ! शेखरीभूतशीतांशुरेखामयूखावलीनद्धसुस्निग्धनीलालकश्रेणिशृङ्गारिते ! लोकसम्भाविते ! कामलीलाधनुःसन्निभभ्रूलतापुष्प—हकृच्चारुगोरोचनापङ्ककेलीललमाभिरामे ! सुरामे ! रमे ! लसद्भालिकामौक्तिकश्रेणिकाचन्द्रिकामण्डलोद्भासिगण्डस्थलन्यस्तकस्तूरिकापत्ररेखासमुद्भूतसौरभ्यसम्भ्रान्तभृङ्गाङ्गनागीतसान्द्रीभवन्मन्द्रतन्त्रीस्वरे ! भास्वरे ! वल्लकीवादनप्रक्रिया लोलतालीदलाबद्धताटङ्कभूषाविशेषान्विते ! सिद्धसम्मानिते ! दिव्यहालामदोद्वेलहेलाल्लसच्चक्षुरान्दोलनश्रीःसमाक्षिप्तकर्णैकनीलोत्पले ! पूरिताशेषलोकाभिवाञ्छाफले ! स्वेदबिन्दूल्लसद्भाललावण्यनिस्पन्दसंदोहसंदेहकृन्नासिकामौक्तिके ! सर्वमंत्रात्मिके ! सर्वविश्वात्मिके ! कुन्दपुष्पद्युतिस्निग्धदन्तावलीनिर्मलालोकसम्मेलनस्मेरशोणाधरे ! चारुवीणाधरे ! मन्दमन्दस्मितोद्दारवक्त्रारविन्दोल्लसत्पूगकर्पूरताम्बूलखण्डोत्करे ! सर्वसम्पत्करे ।

CLOSING: सुरुचिरनवरत्नपीठस्थिते शङ्खपद्मद्वयोपाश्रिते विघ्नेशदुर्गावटुक्षेत्रपालैर्वृते मत्तमातङ्गकन्यासमूहाश्रिते भैरवैरष्टभिर्वेष्टिते देवि वामादिभिः शक्तिभिः सेविते देवि लक्ष्म्यादिशक्त्यष्टकैः संवृते मातृकामण्डलैर्मण्डिते पञ्चबाणेन रत्या च संभाविते प्रीतिशक्त्या वसन्तेन चानन्दिते भक्तिभाजां परं श्रेयसे कल्पसे योगिनां मानसे द्यायसे छन्दसामोजसे भ्राजसे गीतविद्याभियोगेतितृष्णेन कृष्णेन संपूज्यसे भक्तिमच्चेतसा

वेधसा स्तूयसे विश्वहृद्येन वाद्येन विद्याधरैर्गीयसे यक्षगन्धर्वसिद्धाङ्गनाभिः समभ्यर्च्यसे सर्वसौभाग्यवाञ्छावतीभिर्वधूभिः सुराणां समाराध्यसे सर्वविद्याविशेषान्वितं चाटुगाथा समुच्चारणं कण्ठमूलोल्लसद्वर्णराजित्रयं कोमलं श्यामलोद्दारपक्षद्वयं तुण्डशोभाविदूरी-भवत्किंशुकं तं शुकं लालयन्ती परिक्रीडसे देवि पाणिपद्मद्वयेनापरेणाक्षमालागुणस्फा-टिकीं ज्ञानसारात्मकं पुस्तकं बिभ्रती येन संचिन्त्यसे चेतसा गद्यपद्यात्मिका भारती तस्य वक्त्राम्बुजान्निःसरेत् येन वा यावकाभाकृतिर्भाव्यसे तस्य वश्या भवन्ति स्त्रियः पुरुषाः येन वा हेमपीतद्युतिर्ध्यायसे सोऽपि लक्ष्मीसहस्रैः परिक्रीडसे किन्न सिद्धे(द्धये)द्वपुः कोमलं श्यामलं चन्द्रचूडान्वितं तावकं ध्यायतस्तस्य लीलासरोवारिधिस्तस्य केलीवनं नन्दनं तस्य भद्रासनं भूतलं तस्य गीर्देवता किंकरी तस्य चाज्ञाकरी श्रीः स्वयं सर्वदा सेव्यते सर्वविद्यात्मिके सर्वयागात्मिके सर्वचक्रात्मिके सर्वतत्त्वात्मिके सर्वयन्त्रात्मिके सर्वतन्त्रात्मिके सर्वनादात्मिके सर्वयोगात्मिके सर्वपीठात्मिके सर्वगे सर्वस्वरूपे कोमले श्यामले भो जगन्मातृके पाहि मां पाहि मां पाहि माम् ।

माता मरकतश्यामा मातङ्गीमदशालिनी ।
कटाक्षयतु कल्याणी कदम्बवनवासिनी ॥

(In a different handwriting)

माणिक्यलीलामुपलालयन्तीं मन्दालसां मञ्जुलवाग्विलासाम् ।
महेन्द्रनीलद्युतिकोमलाङ्गीं मातङ्गकन्यां मनसा स्मरामि ॥१॥

परिस्फुटं मन्दविपञ्चिकारवैः पदे पदे दर्शितमौलिकम्पना ।
मदालसा कुवलयदामलोचना मदम्बिका जयतु कदम्बकानने ॥२॥

COLOPHON इति श्रीकालिदासविरचिते श्यामादण्डकं सम्पूर्णम् । शुभं भवतु

Post-Colophonic : संवत् १८८७ शरद्गुरुवासरे लिखितमिदं स्तोत्रं रामसुखेन स्वपठनार्थम् ।श्रीरस्तु॥श्री

3630. श्रीकृष्णस्तोत्रम् (द्वादशराशिनामगर्भितम्)

OPENING: श्रीमते रामानुजाय नमः ।

तुलाशतभिषाजातं मयूरपुरकैरवात् ।
महान्तं महदाख्यातं वन्दे श्रीनन्दकांशकम् ॥१॥

CLOSING: आषाढे पूर्वफाल्गुन्यां तुलसीकाननोद्भवाम् ।
पाण्ड्ये विश्वम्भरां गोदां वन्दे श्रीरंगनायकीम् ॥१२॥

3632. सन्न्यासज्ञानमठाम्नायस्तोत्रम्

OPENING : श्रीगणेशाय न[म]ः ।

अथ मठाम्नाय लिख्यास्ते ।

आदौ तु पश्चिमाम्नाये शारदं मठमीरितम् ।
कीटवारसम्प्रदायतीर्थाश्रमपदं स्मरेत् ॥

द्वारकांक्षेत्रमाख्यातं देवः सिद्धेश्वरो भवेत् ।
भद्रकालीति देवीं(तां)सर्वभद्रप्रदायिनी ।
ब्रह्मविष्णुस्वरूपाख्यमाधार्यं च ततः स्मरेत् ।
तीर्थं गङ्गा गोमती च तत्र सन्यासमाश्रयेत् ।।१।।

CLOSING :

नाभिः सरोत(व)रं क्षेत्रं देवः परमहंसकः ।
देवी स्यान् मनसा तत्र आचार्यस्तु सुचेतनः ।।८।।
त्रिकु(कू)टातीर्थमत्यन्तं सर्वपुण्यप्रदायकम् ।
भवपाशविनाशाय सन्न्यासमहमाश्रये ।।९।।

COLOPHON :

Post-Colophonic

इति श्रीकृष्णचैतन(न्य) विरचितं सन्न्यासज्ञानमठाम्नाय नाम सम्पूर्णं ।
लिः मुरारि कएथ पडीतं जनतीपुरि ।

3634. सप्तश्लोकी-स्तोत्रम्

OPENING :

श्रीकृष्णाय नमः ।

स्फुरत्कृष्णप्रेमामृतरसभरेणातिभरिता,
विहारान् कुर्वाणा व्रजपतिविहाराब्धिपु सदा ।
प्रियागोपीभर्त्तुः स्फुरतु सततं वल्लभ इति,
प्रथावत्यस्माकं हृदि सुभगमूर्त्तिः सकरुणा ।।१।।

CLOSING :

यद्यौय(दाघ)तमसावृतं कलिभुजङ्गमासादितं,
जगद्विषयसागरे पतितमस्वधर्मे रतम् ।
यदीक्षणसुधानिधिः समुदितोनुकम्पामृता-
दमत्पु(मृत्यु)मकरोत् क्षणादरणमस्तु मे तत्पदम् ।।७।।

COLOPHON :

इति श्रीविट्ठलेश्वरविरचिता सप्तश्लोकी समाप्ता ।

3638 सरस्वतीस्तोत्रम्

OPENING

श्रीगणपतये नमः ।

सरस्वतीस्तोत्र लीख्यते ।

सरस्वतीं नमस्यामि चेतनां हृदि संस्थिताम् ।
पद्मयोनेस्तु कण्ठस्थां ओंकारस्य प्रियां शुभाम् ।।१।।
मतिदां वरदां चैव सर्वकामफलप्रदाम् ।
केशवस्य प्रियां देवीं वीणाहस्तां वरप्रदाम् ।।२।।

CLOSING :

त्रिसन्ध्यं प्रयतो भूत्वा यस्त्विदं पठते सदा ।
तस्य कण्ठे सदा वासः करिष्यामि न संशयः ।।९।।

COLOPHON :

इति बृहस्पतिकृतं सरस्वतीस्तोत्रं संपूर्णम् ।

Post-Colophonic

माघ कृष्ण न ४ संवत् १९१३ लखितं चरनजीव बालकृष्णलालजीपठनार्थं ।
शुभं भवतु । कल्याणमस्तु ।

अथ श्रीमदग्निकुमाराः स्वस्यैवं श्रीमदाचार्याखिलमाहात्म्याभिज्ञत्वं स्थापयितुं निःसाधनदीनदैवानुद्धर्त्तुं च तत्प्रतिपादकतन्नाम्नाष्टोत्तरशतेन तां स्तुवन्ति। तत्रादौ लोकवेदातीतस्तोत्रमिति तादृशपुरुषोत्तमाख्यवस्तुनिर्देशात्मकमेव मङ्गलमाचरन्ति—

प्राकृतधर्मानाश्रयमप्राकृतनिखिलधर्मरूपमिति।
निगमप्रतिपाद्यं यत्तच्छुद्धं साकृति स्तौमि ॥१॥

CLOSING & COLOPHON :

तदप्राप्तौ वृथा मोक्षस्तदाप्तौ तद्गतार्थता।
अतःसर्वोत्तमं स्तोत्रं जप्यं कृष्णरसार्थिभिः ॥३५॥

इति श्रीमदग्निकुमारप्रोक्तं श्रीसर्वोत्तमस्तोत्रं संपूर्णम्।

स्तोत्राद्यन्यस्य साधनैर्मोक्षप्राप्तावप्येतदप्राप्तौ सर्वेन्द्रियाणां वैफल्यात् स वृथा जले निमग्नस्य जलयानवत्। अत्र त्वलौकिकरूपेण सर्वांशेन परमानन्दस्वादनमित्येतत् सिद्धिप्राप्तौ तस्य गतार्थता, न हि कश्चित् सितामास्वाद्य गुडमपेक्षते महाराज्यं वा प्राप्य वणिजादिसमृद्धिम्, अत एतदेव पठनीयमित्याहुः–अत इति। यत एव मत इदं सर्वोत्तमं सर्वेषु स्तोत्रेषूत्तमं सर्वोत्तमस्य वैकुण्ठनाथादप्युत्तमस्य लोकवेदातीतस्य रसात्मकपुरुषोत्तमस्तोत्रं तदास्यांबुजस्तुतिस्तत्स्तुतिरेवेति। तत्स्तोत्रं कृष्णरसार्थिभिः कृष्णलक्षणे यः पूर्णः शृङ्गाररसः यद्वा सदानन्दस्य रसात्मकस्यापि सारभूतो यो लीलात्मकस्तदर्थिभिर्जप्यं प्रतिनाममन्त्ररूपत्वात् गुप्ततया मन्त्रवत् जप्यम्। अन्यार्थिभिरन्यदेव जप्यम्। कृष्णरसार्थिभिस्त्वेतदेव जप्यमित्यर्थः। तन्नाम्नोक्तस्वरूपगुणलीलाध्यानपूर्वकं जप्यमित्युक्तम्।

इति श्रीविट्ठलरायात्मज-श्रीवल्लभकृता सर्वोत्तमविवृतिः सम्पूर्णम्।

Post-Colophonic

मिति आसाढ वदी १० संमत् २६३६।

3644. सुदर्शनमोचनस्तोत्रम्

OPENING :

अथ सुदर्शनमोचनम्—

विभ्रतं श्रवणसीम्नि सारदं, पद्मगुज्ज्वलकलाविशारदम्।
वल्लवीहृदयहारनायकं हन्त चित्त भज गोष्ठनायकम् ॥

CLOSING :

जयति महोत्सवविद्याविद्याधरशापमर्दिनी मूर्त्तिः।
परिभूतशंखचूडामणिरखिललोकस्य ॥

कान्तिडम्बरच्छन्दः।

3645. सुधालहरी-मिहिरस्तवः

OPENING :

श्रीगणेशाय नमः।

उल्लासः फुल्लपंकेरुहपटलपतन्मत्तपुष्पंधयानां,
निस्तारः शोकदावानलविकलहृदां कोकसीमन्तिनीनाम्।
उत्पातस्तामसानामुपहतमहसां चक्षुषां पक्षपातः,
संघातः कोऽपि धाम्नामयमुदयगिरिप्रान्ततः प्रादुरासीत् ॥१॥

CLOSING :
&
COLOPHON :

ऊर्ध्वं पापावलिभ्यः स्थित इति जगदे यस्य वेदैरुदाख्यां,
निन्ये कप्यासनाभं खलसहचरतो नेत्रयोः पुण्डरीकम् ।
गोष्ठाद्यकसायमस्य द्रुतकनकनिभश्मश्रुकेशाखिलाङ्गः,
सोऽयं सर्वान्तरात्मा तव दिशतुतरां वासरेशः शिवानि ॥३०॥

इति श्रीपण्डितरायनिर्मितः सुधालहर्याख्यो मिहिरस्तवः । शुभमस्तु
ननु परिहर कि शुकं स्वगर्वं, निजशिरसि भ्रमरोपवेशनेन ।
CLOSING : श्रीहर्षं । श्रीश्च विजयश्च प्रशस्तिश्च तासां रचना निर्माणं तस्य जनकस्य यद्वा श्रीविजयो नाम राजा कश्चित् तस्य प्रशस्तिः या रचना ग्रन्थविशेषस्तज्जनकस्य, यद्वा विष्णोः श्रीविजये प्रशस्तिरचना तज्जनकस्येत्यर्थः । वीरसेनसापत्ये वैरसेनिः अत इञ् इतीञ्प्रत्ययः । शेषं स्पष्टम् ॥१३८॥

यं प्रासूत त्रिलिंगक्षितिपतिसतताराधितांघ्रिः स्वयंभूः,
पाति प्र(प्री)त्येकसीमा सुकविनरहरिं नालमायं च माता ।

यं विद्यारण्ययोगी कलयति कृपया तत्कृतौ दीपिकायां,
स्वैरं नीराजितोभूदतिसरसकथः पञ्चमः सर्ग एषः ॥

3902. पार्श्वनाथचरित्रम्

OPENING :

श्रीजिनाय नमः ।

नाभेयाय नमस्तस्मै यस्य क्रमनखांशवः ।
मौलौ दधति नम्राणां मङ्गल्यामक्षतश्रियम् ॥१॥

+ + +

नमोस्तु गुरुचन्द्राय यत्करस्पृष्टमूर्द्धनि ।
आविर्भवति भव्येऽस्म(श्म)न्यपि वाक्यसुधारसः ॥८॥

+ + +

निबद्धमष्टभिः सर्गैः संबद्धं दशभिर्भवैः ।
चरितं कीर्त्तयिष्यामि श्रीमत्पार्श्वजिनप्रभोः ॥

CLOSING :

इति श्रीकालिकाचार्यसन्तानीयश्रीभावदेवसूरिविरचिते श्रीपार्श्वनाथचरिते महाकाव्येऽष्ट[म]सर्गे भवाङ्के भगवद्विहारनिर्वाणवर्णनो नाम अष्टमः सर्गः। ग्रंथाग्रंथ ३६४। सम्पूर्णमिदं श्रीपार्श्वनाथचरित्रम् ।

कलिकुण्डे मथुरायां स्तम्भनके चारुवप्रशंखपुरे ।
नागह्रदे लाटह्रदे स्वर्णगिरिप्रमुखतीर्थेषु ॥१॥

+ + +

आसीत्स्वामिसुधर्मसन्ततिभवो देवेन्द्रवन्द्यक्रमः,
श्रीमान् कालिकसूरिरद्भुतगुणग्रामाभिरामः पुरा ।
जीयादेष तदन्वये जिनपतिप्रासादतुङ्गाचल-
भ्राजिष्णुर्मुनिरत्नगौरवनिधिः खाण्डिल्यगच्छाम्बुधिः ॥४॥

तस्मिश्चान्द्रकुलेऽभवत्कुवलयोद्बोधैकबन्धुर्यशो-
ज्योत्स्नापूरितविष्टपो विधुरिव श्रीभावदेवो गुरुः ।
यस्याख्यानसमानमेष बहुसेव्यो वक्ष(क्ष्य)माणोऽधुना
गच्छेऽगच्छदतुच्छगूर्जरभुवि प्रष्टां (श्रेष्ठा) प्रतिष्ठामिमाम् ॥५॥

+ + +

श्रीमांस्ततो विजयसिंहगुरुर्मुनीन्द्र-
मुक्तावली विमलनायकतां वितेने ।
द्योतिस्तदुज्ज्वलतरं विकिरन् धरित्र्यां,
चित्रं नयस्तरलतां कलयांचकार ॥७॥

+ + +

तदीयपट्टेऽजनि वीरसूरिर्यन्मानसे निर्मलदर्पणाभे ।
निरूपयामास सरस्वतीयं त्रैविद्यविद्यामयमात्मरूपम् ॥१६॥

तस्मादभूत् स य पराद्यनेतां मुनीश्वरः श्रीजिनदेवसूरिः ।
यो धर्ममारोप्य गुणे विशुद्धध्यानेपुणा मोहरिपुं बिभेद ॥११॥

आद्यनामक्रमेणैवं प्रसर्पति गुरुक्रमे ।
पुनः श्रीजिनदेवाख्या बभूवुर्वरसूरयः ॥१२॥

+ + +

तेषां विनेयविनयी बहुभाववेव-
सूरिः प्रसन्नजिनदेवगुरुप्रमोदात् ।
श्रीपत्तनाख्यनगरे रविविश्ववर्षे,
पार्श्वप्रभोश्चरितरत्नमिदं ततान ॥१४॥

+ + +

ग्रन्थः सर्वाग्रमनेन प्रत्येकं वर्णसंख्यया ।
चतुःसप्तत्युपेतानि षट्सहस्राण्यनुष्टुभाम् ॥३०॥

COLOPHON: इति श्रीपार्श्वनाथचरित्रं सम्पूर्णम् ।

Post-Colophonic: लिखन्तं पूज्य दासूऋपि तस्य शिष लिखन्तं दानाऋषि आत्मार्थे सुभं भवत् । संवत् १७५६ समाणे नगरमध्ये असूसुदी द्वादशी तिथि वार सोम । श्रीपार्श्वनाथ चरित्रं संपूर्णं । ग्रंथाग्रंथ छह हजार चउहत्तारश्लोक ।

3903 प्रपन्नामृतम् (रामानुजचरित्रम्)

OPENING: ओं नमः । श्रीमते रामानुजाय नमः ।

श्रीरंगराजपदपंकजराजहंसं रामानुजार्यपदपंकजभृंगराजम् ।
श्रीशैलवंशकलशाम्बुधिपूर्णचन्द्रं श्रीरंगनाथगुरुमन्वहमाश्रयामः ॥१॥

+ + +

कौशिकान्वयसंभूतं कारुण्यामृतसागरम् ।
नृसिंहाचार्यतनयं रामानुजगुरुं भजे ॥३॥
नाधीतानि च शास्त्राणि न कृतं गुरुपूजनम् ।
वक्ष्यामि कृपया विष्णोरनुगृह्णन्तु देशिकाः ॥४॥

CLOSING : & COLOPHON: इति श्रीप्रपन्नामृते श्रीरामानुजचरिते श्रीपराशरभट्टाचार्य-श्रीवेदान्तिसंवादे गोदा-रंगेश्वरविवाहकल्याणकथनं नाम नवतितमोऽध्यायः ॥६०॥

इति श्रीप्रपन्नामृतकथानकं संपूर्णम् ।

Post-Colophonic: संवत् १८३२ शाके १६६७ का प्रवर्त्तमाने मासोत्तममासे आषाढमासे शुक्लपक्षे तिथौ नवम्यां ६ भृगुवासरे लिखितं जोसी रघुनाथ सवाई जयपुरमध्ये । लिखायतं महंत-

श्रीमोहनदासजी श्रीनृसिंहमन्दिरसन्निधौ पठनार्थं वैष्णव भरतदास। महाराजाधिराज श्री सवाई पृथ्वीसिंहजीराज्ये। शुभं भवतु। कल्याणमस्तु।

3923. रघुवंश-टीका

OPENING: ओं नमः। श्रीगणेशाय नमः। सकलपण्डितचक्रचक्रवर्तिपण्डित श्री १०८ श्रीसुग्यान-सागरगणिचरणकमलेभ्यो नमः।

वागर्थेति। कवीनां स्थितिर(रि)यं, कवयः शास्त्रादौ शास्त्रारम्भे विशिष्टेष्टदेवता नमस्कृत्याशीर्वस्तुनिर्देशान् विदधति इति हृदि कृत्वा कविः श्रीकालिदासः शास्त्रादौ काव्यरचनायां गौरीशंकरयोर्हरिहरयोर्वा नमस्कारं कुर्वन्नाह—

अहं पार्वतीपरमेश्वरौ वन्दे। पार्वती च परमेश्वरश्च पा० अथवा पा रक्षणे पार्वती(तीं) पातीति पार्वतीयो(पो) रुद्रः रमा लक्ष्मीस्तस्या ईश्वरः परमेश्वरः पार्वती परमेश्वरश्च पा० अथवा पॄ पालनपूरणयोः पार्वती पिपर्ति पालयतीति पार्वतीपरो रुद्रः माया ईश्वरो मेश्वरो हरिः पार्वतीपरश्च मेश्वरश्च पा० हरहरी तौ तावहं पार्वतीपरमेश्वरौ वन्दे। किंवि० पा० जगतः पितरौ गच्छति उद्गच्छति विनश्यतीति जगत् तस्य जगतो विश्वस्य माता च पितरौ आदेश्च द्वन्द्वः। पुनः किंवि० पा० सम्पृक्तौ सम्मिलितौ एकत्रीभूतौ अर्द्धनारीनटेश्वरत्वेन तौ काविव वागर्थाविव०।

COLOPHON: इति श्रीवाचनाचार्यमुनिप्रभगणिशिष्यधर्म्ममेरुविरचितायां रघुकाव्यटीकायां वंशप्रतिषेधराज्ञीराज्यनिवेशो नाम एकोनविंशतितमः सर्गः।१९। सम्पूर्णं। ग्रन्थाग्रन्थ १२००० सहस्रः।

Post-Colophonic: कवित्त—पंडित परमप्रवीन सुग्यांनसागर गुनधारीय,
पदरजसेवक जांनि कुस्यालसागर हितकारीय।
रघुकाव्य नी टींक प्रीति करि लेख लिखावी
बाचन अर्थहू काज भावसागर मनि भावी

चन्दु वसु संवत समै, वह्नि बांण परिमानीयै
आसोज सुदि एकादसी, भृगुवार इह जांनीये॥ १॥

इति श्रीमहाकाव्यरघुवंशटीकायां सकलपण्डितशिरोरत्न पं० श्री १०८ श्री समुद्र-सागरजी तत्शिष्य पं० श्री १०८ श्री सुग्यांनसागरजी यत्शिष्य चरणसेवीयगणी कुश्याल-सागरेण लिपीकृतं मेदपाटदेशे वैराटमण्डले संग्रामगढनगरे तथा टुंकरवाडग्रामे चतुर्थ-प्रहरे।

दुहो—वैन नैन कर थिर रहै, कटिहु बहुत दुखाय।
पुस्तिक जतनहु कीजिये, या विधि ग्रंथ लिखाय॥ १॥

3926. रघुवंशो 'राघवी' टीकोपेतः

OPENING ……पार्वती(र्तीं) पातीति पार्वतीयो(पो) रुद्रः रमाया ईश्वरो रमेश्वरः पार्वतीयश्च रमेश्वरश्च………ता नैव कदाचन। गर्भधारणपोषाभ्यां तेन माता गरीयसीति वचनात्। कस्यै वागर्थप्रति…………प्रतिपत्तिः परिज्ञानं वागर्थप्रतिपत्तिः तस्यै। किंभूतौ तौ संपृक्तौ सम्मिलितौ काविव वागर्थौ इव वाक् च अर्थश्च वागर्थौ शब्दार्थौ संपृक्तौ मिलितौ स्तः। पुनः किंभूतौ जगतः पितरौ माता च पिता च पितरौ जगतो……॥१॥

CLOSING : सन्तानायेति। सा राज्ञी मौलैर्वंशगतैः स्थविरैर्वृद्धमन्त्रिभिः सार्द्धं समं विधिवच्छास्त्रोक्तप्रकारेण राज्यमशिषत् पालयामास। किम्भूता भर्तुरव्याहताज्ञा अप्रतिहतादेशाः। पुनः किम्भूता हेमसिंहासनस्था सौवर्णसिंहासनोपविष्टा। किं कुर्वाणा राज्ञी प्रजानां भूत्यर्थं लोकानामुदयाय तं गर्भं दधाना सती बभौ शुशुभे। × × × × × अशिषदिति अत्तिशास्त्यर्त्तिभ्यश्चेत्यङ् शासिवसिघसीनां चेति षत्वं। अक्लीबे मुष्टिरिति वैजयन्त्यामुक्तत्वान्नोपमादोषः। मन्दाक्रान्तावृत्तम् ॥५७॥

COLOPHON : इति राघवीवृत्तिः समाप्ता।

Post-Colophonic (w.) लिखितं च सकलपण्डितसभाभामिनीभालस्थलतिलकायमानपंडित श्री ५ श्रीजयविजयगणितच्छिष्य-गणिश्रीविनयविजयगणितच्चरणमधुकरेण वीरमहंसेन (वीरविजयेन) स्ववाचनकृते। श्री। संवत् १७२६ वर्षे आश्विनमासे शुक्लपक्षे १३ दिने चन्द्रवासरे लेखकपाठकयोः शुभं भूयास्ताम्।

Ct. लिखिता च गणिश्रीविनयविजयगणिशिष्येण वीरमहंसे(विजये)न संवत् १७२६ वर्षे आश्विनमासे शुक्लपक्षे तृतीयातिथौ शनिवासरे स्ववाचनाय श्रीरस्तु।

3927. रघुवंशमहाकाव्यं सावचूरि

OPENING : ………………भगवतो हरस्याभिधानं कथमभ्यधायि भो विद्वन् भ……तो प्रोच्यतां। अस्मन्मनसि संशीतिः… वर्त्ति। ततः प्रतिवादी वदति स्म। भो सकलविद्वज्जनचूडामणे समाकर्णय। अत्र कामी—सा। माता सर्वोत्तमत्वात् प्रथमं श्रेष्ठतराः यदुक्तं विपश्चिद्भिः पतिता गुरवस्त्याज्या माता नैव कदाचन। गर्भधारणपोषाभ्यां तेन माता गरीयसी ।१। अत एव जगदम्बाया अभिधानं पूर्वमजल्पि। × × × × × काविव वागर्थाविव वागर्थौ संपृक्तौ तौ वर्तेते। कि…गर्थ० वागर्थपरिज्ञा… ………॥१॥

CLOSING : राज्ञी मुख्यैः वृद्धामात्यैः सह सुवर्णसिंहासनस्थिता सती राज्यं शास्त्रोक्तप्रकारेण पालयामास। कि० रा० का तस्या स्खलिताज्ञा, अपरं तं गर्भं उदरगुप्तं बिभ्राणा शुशुभे। किमर्थं प्रजानां समृद्धयर्थम्। कि० प्र० प्रसूतिकालमभिलपतीनां यथा धरित्रीमध्ये न्यस्तं बीजमुष्टिं बिभ्राणा शोभते ॥५७॥

COLOPHON : इति श्रीएकोनविंशतितमः सर्गस्य व्याख्या समाप्ता ।श्रीः।

PostColophonic — संवत् १५४७ वर्षे कार्त्तिकमासे कृष्णपक्षे एकादिस्यां तिथौ गुरुवासरे मुस्स्थल शुद्धदन्तिश्रीनगरे। राउश्रीसातल विजइ राज्ये। मंत्रीश्वरवणवीर इला। श्रीचैत्र-गच्छे भ० श्रीसोमकीर्त्तिसूरिश्वरान् भ० श्रीचारचन्द्रसूरीश्वर तत्शष्य वा० श्रीतिहुण-कीर्त्ति लिखिता।

OPENING : (on f. 2)

शास्त्रं सुनिश्चलधिया परिचिन्तनीय-
मारधितोपि नृपतिः परिशंकनीयः।
आत्मीकृतापि युवतिः परिरक्षणीया,
शास्त्रे नृपे च युवतौ च कुतः स्थिरत्वम् ॥३॥

(Ct.) ॥सं० १५४८ वर्षे मार्गशिरमासे कृष्णपक्षे⋯तिथौ सोमवासरे श्रीचैत्रगच्छे भ० श्री⋯⋯सोमकीर्त्तिसूरितत्पट्टे पूर्वाचल⋯⋯पमान श्रीचारचन्द्रसूरितच्छिष्य मुनि नरचन्द्र श्रीरघुटीका स्वपठनार्थं लिखितमस्ति। कल्याणमस्तु। श्री श्री।

3928. रघुवंशमहाकाव्यं सटीकम्

OPENING : (f. 3) ⋯⋯⋯जयमिच्छतां उद्योगिना न तु लोभेन वैरेण चेति। धर्मविजयकथनं यदुक्तम्-राजात्मद्रव्यं प्रकृति संयत्नो (पन्न) नयस्याधिष्ठाताहमेनां⋯⋯जेष्यामि इत्यभ्युद्यतो विजिगीषुः यथा 'संपन्नस्तु प्रकृतिर्महोत्साहकृतश्रमः। जेतुमेषणशीलश्च-विजिगीषुरतो मतः। अथवा—उत्साहमन्त्रप्रभुशक्तियुक्तो धीमान् विजितेन्द्रिय-भृत्यवर्गः × × × × गृहमेधिनां गृहस्थानां विवाहकारिणां गृहैर्दारैर्मेधते संगच्छते गृहमेधिनस्तेषाम् ॥७॥

COLOPHON : इति श्रीरघुवंशे महाकाव्ये पण्डितश्रीउदयाकरविरचितविवरणे एकोनविंशतितमः सर्गः समाप्तः।१६।

Post-Colophonic — संवत् १७६६ वर्षे शाके १६६४ प्रवर्त्तमाने वैशाख वदि १४ तिथौ गुरुवासरे सकलकोविदकुमुदावलीकुमुदबान्धवसकलपण्डितशिरोमणि पण्डित श्री १००० श्री जयविजयगणि-तच्छिष्यो पंडित श्री श्री श्री १०८⋯⋯विजयगणिपण्डित श्री २१ धीरविजयगणि-तच्छिष्यगणिभाग्यविजयेन लिपिकृता। ग्रन्थाग्रन्थ सर्वश्लोकसंख्या हजार १०२००।

3929. रघुवंशमहाकाव्यं 'अर्थलापनिका' टीकालङ्कृतम्

OPENING:

श्रीगणेशाय नमः।

श्रीसर्वज्ञं जिनं नत्वा गणिः समयसुन्दरः।
अर्थलापनिकावृत्तिं करोति सुभगां रघोः ॥१॥

CLOSING : प्राप्तानु० राजा दशरथः सपदि शीघ्रं निवृत्तः। किं० राजा प्राप्तानुगः प्राप्ता अनुगाः सेवका यस्य सः प्राप्धानुगः : किं कृत्वा निवृत्तः। अस्य मुनेः शासनं सम्पद्य कृत्वा। किं० भूतो राजा पातकविलुप्तधृतिः पातकेन विलुप्ता गाना (गता) धृति यस्य

सः । राजा किं कुर्वन् शापं दधन् । कि० ष्टं शा० अन्तर्निविष्टपदं अन्तर्मध्ये निविष्टं पदं स्थानं यस्य सः अन्तर्निविष्टपदस्तं । पुनः किं० शापं आत्मविनाशहेतुं आत्मनो विनाशस्य हेतुः आत्मविनाशहेतुस्तं आ० । कः कमिव इव यथा अम्बुराशिः समुद्र ऊर्वं (र्व्वं) दावानलं ज्वलनं वह्नि दधन् वर्त्तते ॥६१॥

COLOPHON: इति श्रीकालिदासकृतौ रघुवंशे महाकाव्ये मृगयाविहारो नाम नवमः सर्गः समाप्तः ॥६॥

रघु० कृता० अ० पूर्णा नवमसर्गाङ्के ।

[रघुवंशे महाकाव्ये कृता समयसुन्दरैः
अर्थलापनिकावृत्तिः पूर्णा नवमसर्गके ।]

3930. रघुवंशमहाकाव्यम् 'सुगमान्वयप्रबोधिका'टीकायुक्तम्

OPENING: (on f. 199)

[द्वादशसर्गे] निर्विष्टविषयस्नेहः स दशांतमुपेयिवान् ।
आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि ॥१॥

व्या०—स दशरथः उषसि प्रभाते प्रदीपार्चिः प्रदीपकान्तिः इव आसीत् बभूव । कथम्भूतः स निर्विष्टविषयस्नेहः । पुनः कथम्भूतः स दशान्तं वार्धिकं उपेयिवान् प्राप्तवान् । पुनः कथम्भूतः स आसन्ननिर्वाणः निकटमोक्षः इत्यन्वयः । × × × × × श्लिष्टोपमालंकारः । तैलं स्नेहोऽभ्यंजनं चेत्यभिधानचिन्तामणिः । निर्वाणं निर्वृतौ मोक्षे विनाशे इति । आस उपवेशने अस्तेरीडित्यनेनेडागमः आसीदिति अर्चिः पुंल्लिगः ॥१॥

CLOSING & COLOPHON: इति श्रीरघुवंशे महाकाव्ये कविकालिदासकृतौ पण्डितसुमतिविजयविरचितायां सुगमान्वयप्रबोधिकायां एकोनविंशतितमः सर्गः । श्रीः ।१९।

श्रीमन्नन्दिजयाख्यानां पाठका(को)नाम भूधरः ।
शिष्यः पुण्यकुमारेतिनामा स पुण्यवारिधिः ॥१॥

तस्याऽभवन् विनेयाश्च राजसारास्तु वाचकाः ।
सज्जिनो(ज्जना)स्तु क्रियायुक्ता वैराग्यरसरञ्जिताः ॥२॥

शिष्यमुख्यास्तु तेषां तु हेमधर्माः सदाह्वयाः ।
शिष्टदिष्टा गुणाभीष्टा बभूव(वुः)साधुमण्डले ॥३॥

साम्प्रतं तद्विनेयाश्च जीयासुः धीधनाः चिरम् ।
पाठका वादिवृन्देन्द्राः श्रीमद्विनयमेरवः ।
सुमतिविजयेनेयं विहिता सुगमान्वया ॥४॥

वृत्तिर्बालावबोधार्थं तेषां शिष्येण धीमता ॥५॥

विक्रमाख्ये पुरे रम्येऽभीष्टदेवप्रसादतः ।
रघुकाव्यस्य टीका(के)यं कृता पूर्णा मया शुभा ॥६॥

[A Geneology of the Rajhuvamsi kings and शकुनावलीमंत्र is also given in the end.]

PostColophonic

संवत् १६०१ वर्षे शाके १७६६ प्रवर्तमाने मासोत्तममासे शुभे फाल्गुनमासे शुभे कृष्णपक्षे त्रयोदश्यां तिथौ गुरुवासरे लिखितमिदं पुस्तकं विरधीचंदेण। बीकानेर नगरमध्ये।

3936. शान्तिनाथचरित्रम्

OPENING:

श्रीसर्वज्ञाय नमः।

श्रेयोरत्नाकरो······मर्हल्लक्ष्मीमुपास्महे।
स्पृहयन्ति नाकं यस्यैव शेषश्रीविरताशया ॥१॥

वृषेण भाति यो ब्रह्मकृता लक्ष्मगतेन वा।
इत्यन्वर्थाय तस्मै श्रीवृषभस्वामिने नमः ॥२॥

× × +

गृहिव्रतोपमा यस्य भवाः श्रोतृशुभावहाः।
शान्तिनाथस्य तस्यैव चरितं कीर्त्तयाम्यहम् ॥५॥

CLOSING :

इत्थं शान्तिजिनेश्वरस्य मयका प्रोक्ता भवा द्वादश,
श्राद्धद्वादशसंख्यसद्व्रतकथा संलेषनाबन्धुरा।
सच्चक्रायुधनामधेयगणवद्व्याख्यानसंवर्द्धितो,
व्याख्यातं सकलं चरित्रमपि तन्नाम्न्येव तीर्थेशितुः ॥१८॥

यस्योपसर्गाः स्मरणे प्रयान्ति विश्वे यदीयाश्च गुणा न मान्ति।
यस्यांगलक्ष्मीः कनकस्य कान्तिः संघस्य शान्तिं स करोत्र(तु)शान्तिः ॥१६२६॥

COLOPHON :

इत्याचार्यश्रीअजितप्रभसूरिविरचिते श्रीशान्तिनाथचरिते द्वादशभववर्णनो[नाम] षष्ठः प्रस्तावः। इति श्रीशान्तिनाथचरित्रं सम्पूर्णमिति।

Post-Colophonic

॥संवत् १६५३ वर्षे काती सुक्ल अष्ठमीतिथौ सोमे। श्रेयोत्र। श्री।

॥संवत् १७५४ वर्षे द्वितीय कार्त्तिकमासे शुक्लपक्षे द्वितीयायां तिथौ भोमवासरे। बाविलगोत्रे सा० वच्छाकेन तत्पुत्र जयमल्लान्वितेन प्रतिरियं शान्तिनाथचरित्रस्य वहिरापिता सुचेतसा। इयं वाच्यमाना चिरं नन्दतु। कल्याणमस्तु। भद्रं भूयात् वाचकानाम्।

3946. हरिविलासकाव्यम्

OPENING :

श्रीगणेशाय नमः। ओम्

रचयति सहसा यश्चित्रमेतं प्रपञ्चं
प्रशमयति च तद्वत्केनचित् कौतुकेन।
अविदितमपरैस्तच्चण्डमुण्डादिनाना-
दनुजदलनदक्षं शर्वं सर्वस्वमव्यात् ॥१॥

यदपि मत्कविता गुणवर्जिता तदपि साधु सुखाय भविष्यति ।
इह निमित्तमिदं यदुदीर्यते हरिकथा कलिकल्मषनाशिनी ॥२॥

CLOSING : नानागुणैरवनिमण्डलमण्डनस्य
श्रीसूर्यसूनुहरिभूमिभुजो नियोगात् ।
त्रैलोक्यकौतुककरं क्रियते स्म काव्यं
लोलिम्बराजकविना कविनायकेन ॥३१॥

COLOPHON : इति श्रीसूर्यपण्डितकुलालंकार-हरिहरमहाराजाधिराजोद्योतितलोलिम्बराज-विरचिते हरिविलासे महाकाव्ये कृष्णबालक्रीडावर्णनं नाम प्रथमसर्गः ।

नन्दः स्वनन्दनमवेक्ष्य वयोविशेषः,
संशोभमानवपुषं बहुयुक्तियुक्तः ।
वृन्दावने बहुलबालतृणाभिरामे,
रामेण सार्द्धमव गास्तनयेत्यभाणीत् ॥१॥

3949 अन्यापदेशशतकम्

OPENING : (f. 2) नोच्चैर्जल्पति वारिदो(दस्)तदधुना कासारत्वमा(ममलात्म) मनो-
मालिन्यं समुपैहि हन्त महतां नैसर्गिकोऽयं क्रमः ।
काले वर्षितुमुद्यतो यदि भवेदेकक्षणार्द्धं तदा,
युष्माकं कियती तृषा त्रिजगती पूर्णा भविष्यत्यसौ ॥१३॥

CLOSING : लेभे यं शुभदा तपोभिरमलैः श्रीपद्मनाभात्सुतं,
यद्वंशो मिथुलाखिलावनितलालंकारचूडामणिः ।
तेनेदं मधुसूदनेन कविना विद्यावता निर्मितं,
श्लोकानां शतकं मुदे सुकृतिनामन्यापदेशाह्वयम् ॥१०९॥

निरवद्यपद्यशतमेतदपि प्रकटार्थवर्णपदसंवलितम् ।
दुजतीकुलाम्बुजवनीरविनाम मधुसूदनेन रचितम् ॥१२०॥

COLOPHON : इति मधुसूदनविरचितमन्यापदेशशतकम् ।

Post-Colophonic लिखितं दादेपंथी अभैरांम श्रीमन्नागपुरे स्वपठनार्थम् ।

3652 अमरुशतकम् 'भावचिन्तामणि' टीकामण्डितम्

OPENING : श्रीकृष्णाय नमः ।

एकां चुम्बति योऽपराऽधररसं गृह्णाति संश्लिष्यति,
प्रायोन्यामपरां प्रसादयति यः संप्रेक्षतेऽयं मुहुः ।
कस्याश्चिच्च(च्चि)कुरग्रहं प्रकुरुते संसेवते योऽनिशं
शृङ्गारं त्विति तं नमामि सततं गोपालबालं हरिम् ॥१॥

इह ग्रन्थारंभे विघ्नविघाताय शिष्टाचारपरिप्राप्तं मंगलमाचरति—ज्याकृष्टेति ।

CLOSING :

काम्पिल्ये स्वधुंनीनीरसूरतीरतटास्थिते ।
चतुर्भुजेन वसता भावचिंतामणि(णिः)कृतः ॥१॥
अमरुककविना रचितं शृङ्गारशतकं यथामति मयैतत् ।
व्याख्यातं भो रसिका आस्याम्बुविवृद्धये भवताम् ॥२॥
अमरुशतकस्येयं टीका संशोध्यतां बुधैः ।
परोपकरणशुद्धान्तःकरणा हि·········ते ॥३॥

COLOPHON : इति श्रीमिश्रचतुर्भुजकृता भावचिन्तामणिनाम्ना अमरुकशतटीका समाप्ता ।

Post-Colophonic संवत् १८२० का ।

3953 अमरुशतकम् 'रसिकसंजीवनी' व्याख्योपेतम्

OPENING:

श्रीगणेशाय नमः ।

ज्याकृष्टेति । मृडान्याः दुर्गायाः कटाक्षः अपाङ्गदर्शनं त्वां पातु इति सम्बन्धः । कीदृशः कटाक्षः ज्याकृष्टिबद्धः मौर्वीकर्षणाय संजातखटकामुखपाणिः खटकामुखो नाम धनुराकर्षणहस्तविशेषः । उक्तञ्च—तर्जनी मध्यमा मध्ये(न्यस्ता)गुष्ठेन पीडयते । यस्मिन्ननामिकयोगात् स हस्तः खटकामुखः ॥१॥ तस्य पृष्ठे पश्चाद्भागे प्रेंखंतश्चलन्तः नखानां अंशवो नखांशवः तेषां चयः समूहः तेन संवलितो मिश्रितः । × × × × × × यतः शृङ्गाररसात्मिका···········मुखाशंकाया देव्या ध्यानं विवक्षितवान्, न तु वीररसमङ्गीकृतवान् । उक्तं च त्रिपुरासारसिन्धौ···संधाय सुमनोबाणं······ ······वं धनुः । जगज्जेतां जवारक्तां देवीं वश्यमुखां भजे ॥१॥ वश्यमुखाया ध्यानेन शृङ्गारस्फूर्त्तिरेव भविष्यतीति कृत्वा वीररसाभिव्यञ्जकत्वमदोषः ॥१॥

COLOPHON

इति श्रीसकलपण्डितमण्डितमहोपाध्यायभूमण्डलप्रतिष्ठितभट्टरामकृष्णशेखरविरचितायां रसिकसंजीविन्यां टीकायां नाम्नि अमरुकशतटीका समाप्ता । शुभं भवतु ।

अतिचारुचमत्कारचञ्चलीकृतचेतसा ।
चन्द्रेश्वरेण लिखित पुस्तकं सकलं त्विदम् ॥

Post-Colophonic मिति माघशुक्लपक्षपूर्णिमायां गुरौ संवत् १८४४ ॥ शुभं भवतु । कल्याणमस्तु लेखकपाठकयोः ।

3956. उद्धवसन्देशप्रबन्धः

OPENING :

श्रीगणेशाय नमः ।

सान्द्रीभूतैर्नवविटपिनां पुष्पितानां वितानै-
लेक्ष्मीवत्तां दधति मथुरापत्तने दत्तनेत्रः ।
कृष्णः क्रीडाभवनवड(ल)भीमूर्ध्नि विद्योतमानो,
दध्यौ सद्यस्तरलहृदये गोकुलारण्यमैत्रीः ॥१॥

CLOSING :

गोष्ठक्रीडोल्लसितमनसो निर्व्यलीकानुरागात्,
कुर्वाणस्य प्रथितमथुरामण्डले ताण्डवानि ।

भूयो रूपाश्रयपदसरोजन्मनः स्वामिनोऽयं,
तस्योद्दामं वहतु हृदयानन्दपूरं प्रबन्धः ॥१३०॥

COLOPHON : इति श्रीमद्रूपगोस्वामिविरचितः उद्धवसंदेशाख्यः प्रबन्धः समाप्तः । शुभमस्तु ।

3957. उपदेशशतकम् (चारुचर्या)

OPENING श्रीलाभसुभगः सत्यासक्तः स्वर्गापवर्गदः ।
जयतात् त्रिजगत्पूज्यः सदाचार इवाच्युतः ॥१॥
ब्राह्मे मुहूर्ते पुरुषस्त्यजेन्निद्रामतन्द्रितः ।
प्रातः प्रबुद्धं कमलमाश्रयेच्छ्रीगुणाश्रया ॥४॥

CLOSING : अन्ते सन्तोषदं विष्णुं स्मरेद्धन्तारमापदाम् ।
शरतल्पगतो भीष्मः सस्मार गरुडध्वजम् ॥९९॥
श्राव्या श्रीव्यासदासेन समासेन सतां मता ।
क्षेमेन्द्रेण विचार्येयं चारुचर्या प्रकाशिता ॥१००॥

COLOPHON : इति श्रीमन्महामाहेश्वराचार्यवर्यक्षेमेन्द्रेण कृतं उपदेशशतकं चारुचर्याभिधं सम्पूर्णम् ।

Post-Colophonic शतकं चारुचर्याख्यं रसाग्न्यंकेन्दुहायने ।
लिखितं गोपरामेण शुक्लकृष्णेऽग्निभूतिथौ ॥१॥ शु०

3958. कृष्णानन्दम् (कर्णानन्दम्) 'अर्थकौमुदी' टीकासंवलितम्

OPENING : स्फुरद्वदनपङ्कजः कनककूटदेहद्युति-
(w.) प्रशस्तसुखसम्पदां निधिरपूर्वमानप्रदः ।
सकृष्णवृषभानुजाचरणमाधुरीचञ्चुरः,
सदा मधुरवाक्पटुर्जयति साधुवंयासक्तिः ॥१॥

Ct. श्रीराधावल्लभो जयति ।
यच्छ्रद्धालवललितं हृदयं जानाति तत्त्वमक्लिष्टम् ।
तस्य हरेः पदकमलं वन्दे तारोदराब्धिरत्नस्य ॥१॥
कलिताक्षरसम्भाषा कृष्णकीर्तिविघुश्रिता ।
बोधचक्षुःप्रसादस्य हेतुरेषार्थकौमुदी ॥२॥
मिताक्षरार्थगम्भीरा धीरान्तर्मोदवायिनी ।
व्याकृतिस्तन्यते श्रीमत्कर्णानन्दप्रकाशिनी ॥३॥

CLOSING : सदा राधाजानेश्चरणभजनानन्दतुच्छीकृतान्यो,
(w.) गुरुर्यस्य द्वेधा सुमतिहरिवंशो महात्मा प्रसिद्धः ।
प्रसूः श्रीरुक्मिण्यप्रतिमसहजा चाभिधा कृष्णदासो
गिरां तस्य क्रीडा हरिरतियुजां साधुचित्तं धिनोतु ॥१८८॥

श्रीकृष्णेति प्रणयपराणां तद्गाथाभिः सफलितवाचाम् ।
मादृग्दीनोद्धरणबलानां कर्णानन्दो विशतु सभायाम् ॥१८६॥
कर्णानन्दोऽर्थकौमुद्यभिधसुरसमट्टीकया संयुतोऽयं,
कृष्णाष्टम्यां शकाब्दे गगनगगनबाणेन्दुसंख्ये व्यतीते ।
श्रीराधावल्लभाह्लंघ्रिबुरुहपरिसरे ग्रन्थ आविर्बभूव,
श्रीवृन्दाकानने तत् सतृपितमतेः श्रीमतः कृष्णदासात् ॥१८६०॥

(Ct.) कर्णानन्दाभिधो ग्रन्थः कृष्णदासेन निर्मितः ।
तट्टीका च तदारब्धा श्रीप्रबोधेन पूरिता ॥१८६०॥

Post-Colophonic संवत् १८०६ पौष सुदि अष्टमी ब्रहस्पति ।

3959 कृष्णगणोद्देशदीपिका

OPENING : श्रीराधाकृष्णाभ्यां नमः ।

ये सूत्रिताः सतां रत्या प्रसिद्धो लोकशास्त्रयोः ।
व्याह्रियन्ते परीवारास्ते वृन्दावननाथयोः ॥१॥
मान्या भ्रात्रादयस्तस्य वयस्याः सेवकादयः ।
श्रीगोष्ठयुवराजस्य प्रेयस्यश्च पुरः क्रमात् ॥२॥

CLOSING : शाके दृशश्च शक्रे नभसि नभोमणिदिने षष्ठ्याम् ।
व्रजपतिसद्मनि राधाकृष्णगणोद्देशदीपिकाऽदीपि ॥३६॥

COLOPHON : इति श्रीकृष्णगणोद्देशदीपिका समाप्तिमगात् । श्रीरस्तु ।

3960 कृष्णप्रशस्तिकाव्यम्

OPENING वेणुः श्रीमुरजिन्मुखाम्बुजसरच्छ्रीमन्मरुत्पूरण-
प्रोद्भूताद्भुतनिःस्वनः स दिशतु श्रेयांसि वः सर्वदा ।
यत्क्वाणश्रवणाद् व्रजाम्बुजदृशामानन्दमूर्त्तौ हरा-
वेकाग्रीकृतचेतसां चिरमभूदानन्दसान्द्रो लयः ॥१॥

CLOSING : आनन्ददाखिलसतामसतामुदारं,
हृद्दाहिनी कविकुलोत्सववाहिनीयम् ।
पद्यैः प्रशस्तिरनघै रचिताद्य विद्या-
रामेण वामविभवा विदुषां मुदे स्तात् ॥३४॥

COLOPHON : इति विद्यारामकृता प्रशस्तिः । श्रीरामो जयति ।

3980 गीतगोविन्दम् 'बालबोधिनी' व्याख्यावलितम्

OPENING ; श्रीकृष्णचैतन्यचन्द्राय नमः ।

श्रीचैतन्यकृपासीधुकणोन्मत्तेन केनचित् ।
टीका संगृह्यते गीतगोविन्दस्य समासतः ॥१॥

स्वयं बोद्धुमभिप्रायं जयदेवमहामतेः।
क्रमेणोपक्रमादेषा ग्रथ्यते बालबोधिनी ॥२॥

CLOSING : श्रीगोविन्दपादसेवाप्रभावादुदिता स्वयम्।
चैतन्यदासेन बालबोधिनी स्यात् सतां मुदे ॥१॥

COLOPHON इति श्रीगीतगोविन्दस्य बालबोधिनी टीका समाप्ता। श्रीकृष्णचैतन्यचन्द्राय नमः।

Post-Colophonic : पुस्तक लिखी श्रीमथुराजी मध्ये श्रीजमुनाजी तट श्रीगोविंदघाट उपर।
संवत् १८७७ मिती वैसाख वदी २।

3981 गीतगोमिन्दम् 'रसकदम्बकल्लोलिनी'टीकान्वितम्

OPENING : श्रीकृष्णाय नमः।

सम्भ्रान्तो राधिकाया नयनविलसितैर्विभ्रमद्भ्रूविलासैः,
किञ्जल्कव्रातकान्तेष्कनकनिकषवरपट्टमञ्जुच्छटाभाः।
बिभ्राणो मञ्जुकेलीर्मधुरमधुरया राधया कृष्णचन्द्रः,
कन्दर्पाह्लादवर्द्धी जयति घनवने वृन्दया लक्षिते सः ॥१॥

CLOSING : प्रफुल्लभगवज्जनं रसकदम्बकल्लोलिनी,
प्रफुल्लयतु मोहने भजनतानसंवर्द्धिनी।
समस्तपटुचातुरीवलितगीतगोविन्दतः,
प्रशस्तरसदीपिका मधुरपुञ्जमञ्जूषिका ॥१॥

गीतगोविन्दतः षष्ठ्यन्तं पदं सार्वविभक्तिक[स्त]सिविधानात्।

श्रीमद्वृन्दावनेश्वरीप्रियकुच्चरणपंकेरुहमकरन्दास्वादनपटुचंचरीकसंभाषणमध्वा-···दोलचपलहृदयेन श्रीमद्भगवद्दासेन भगवज्जनपरितोषाय विरचितेयं रसकदम्ब-कल्लोलिनी श्रीमद्रसवेदिभिर्भगवत्प्रियैरानन्दसन्दोहसंदीपितपरमोज्ज्वलरसावगाहि-मनसाऽहर्निशं विचारणीया।

COLOPHON : इति श्रीगीतगोविन्दस्य रसकदम्बकल्लोलिनी टीका समाप्ता।

Post-Colophonic संवत् १८३५ श्रावणे मासे कृष्णपक्षे अष्टम्यां भृगौ समाप्तेयम्।

3982. गीतगोविन्दम् 'साहित्यरत्नमाला'मालितम्

OPENING : ओम् नमः श्रीगणाधिपतये।

तव करकमलस्थां स्फाटिकीमक्षमालां,
नखकिरणविभिन्नां दाडिमीबीजबुद्धया।
अनुकलमनुकर्षन् येन कीरो निरुद्धः,
स भवतु मम भूत्यै वाणि ते मन्दहासः ॥१॥

× × ×

पदवाक्यप्रमाणेषु प्रतिवादिविभेदनम् ।
पितरं मेग(घ)नाथार्यं ह्यालाम्बां च नमाम्यहम् ॥५॥

श्रीगीतगोविन्दसमुद्रजानि सद्भावरत्नानि रसैकसूत्रे ।
ग्रथ्नाति शेषःकमलाकरोऽयं परीक्ष्यतां तानि विदग्धराजी ॥६॥

CLOSING : यन्नित्यैर्वचनैर्विरञ्चिगिरिजाप्राणेशमुख्यैर्मुहु-
र्नानाकारविचारसारचतुरैर्नाद्यापि निश्चीयते ।
तद्भावैर्जयदेवकाव्यघटितैर्मत्सूक्तिसंशोधितै-
राद्यं वस्तु चकास्ति चेतसि परं सारस्य सीमाजुषाम् ॥१॥

मतिप्रसूता गहनार्थशास्त्रैः संवर्द्धिता सूक्तिकुमारिकेयम् ।
औचित्यतारुण्यभरोल्लसन्ती कान्तं पतिं प्राप्य यशःप्रसूताम्(तम्) ॥२॥

COLOPHON : इति श्रीशेषकमलाकरविरचितायां गीतगोविन्दव्याख्यायां साहित्यरत्नमालायां द्वादशः सर्गः ।

Post-Colophonic लिखितं मथेन हरचंद वासी रूपनगरमध्ये । मीती काती वदि ११ वुधवार संवत् १८३० का । शुभं भवतु ।

3987. गीतावली नायिकाभेदादिसहिता

OPENING : श्रीगोविन्दाय नमः । श्रीहरिः

अथ गीतावली, प्रथम नन्दोत्सवादि भैरवरागेण—
पुत्रमुदारमसूत यशोदा समजनि वल्लवततिरतिमोदा । ध्रु०
कोप्युपनयति विविधमुपहारं नृत्यति कोऽपि जनो बहुवारम् ॥१॥

कोऽपि मधुरमुपगायति गीतं विकिरति को[पि सदधि नवनीतम् ।
कोऽपि तनोति मनोरथपूर्तिं पश्यति कोऽपि सनातनमूर्त्तिम् ॥२॥

CLOSING धानश्री राधे निजकुण्डपयसि तुंगीकुरु रङ्गं,
किञ्च सिञ्च पिञ्छमुकुटमङ्गीकृतभङ्गम् । ध्रु०
अस्य पश्य फुल्लकुसुमरचितोज्ज्वलचूडा,
भित्तिभिरतिनीलनिविडकुन्तलमनुगूढा ॥१॥

धातुरचितचित्रवीथिरंभसि परिलीना
मालापतिशिथिलवृत्ति रजनि भृङ्गहीना ।
श्रीसनातनमणिरत्नमंशुभिरपि चण्डं
भेजे प्रतिबिम्बभावदम्भात्तव गण्डम् ॥२॥

COLOPHON इति श्रीगीतावली समाप्ता

3991. घटकर्परकाव्यम् 'अर्थप्रकाशिका' व्याख्यावलितम्

OPENING : (f. 4) ·········भो कुन्दसमानदन्ति । अथ वर्षागमे हंसाः श्वेतपक्षिकाणः द्रवन्ति

गच्छन्ति मानः सोवर इत्यर्थः । अथवा हंसाः संन्यासिनः द्रवन्ति च्यवन्ति किमन्ये इति व्यंङ्ग्यम् । यद्वा हंसाश्च हंस्यश्चेज्ये(श्चेत्ये)कशेपः पुमान् स्त्रियो(यः)ते एवं च वैरागि एषः स्त्रियोऽपि द्रवन्तीति व्यंग्यम् । यद्वा हंसाः परलोकसाधका मन्त्राः द्व अस्मिन् समये परलोकसाधकाः ब्रह्मोपदेशाल(द)पि वृथा भवन्तीत्यर्थः । ×××××
इति कविसम्प्रदायः । उक्तं च कविकल्पलतायां—वर्षासु घनिशिखिस्मययहंसगमाः पंककन्दलोद्भेदो इति । उपजातिच्छन्दः ॥२॥

CLOSING:

विद्वद्वृन्दशिरोविभूषणमणिर्गीर्वाणभक्ताग्रणी[:],
प्रत्यक्षो दिविषद्गुरुर्भुवि महादेवो(वः)प्रदीपान्वितः ।
कृष्णाख्यस्य कृतौ कवीश्वरमणेरेषा विशमंजता,
काव्यश्रीघटखर्परार्थ······सौकर्यतो बोधिका ॥१॥

COLOPHON: श्रीमनोहरकृष्णशकृतौ घटखर्परार्थप्रकाशः समाप्त

Post-Colophonic संवत् १८४० अषाढ कृष्णपक्षे ४ वारे बुधवार नै लिखी ५४५

3997 द्रौपदीवस्त्रदानप्रबन्धः

OPENING

श्रीगणेशाय नमः

यो गोपनारीपरिहासहारी यो गोपकोपाहितदर्पदारी ।
संगोपनायाचलराजधारी पायात् स वः कुञ्जविहारकारी ॥१॥
कोपाकुलः कौरवकामवर्षी सपिण्डहासावमतेरमर्षी ।
राज्ये हृते पाण्डुयशोधराणां कान्तामपि द्यूतपरो जहार ॥२॥

CLOSING:

गङ्गागयागोप(म)तिपुष्करेषु स्नानोपवासामरपूजिता यैः ।
यत् प्रा[प्य]ते पुण्यफलं[सु]यज्ञैस्तच्छृण्वतां द्रौपदी(दि)वस्त्रदानम् ॥७३॥

COLOPHON: इति श्रीगोवर्द्धनकृतौ द्रौपदीवस्त्रदानो नाम प्रबन्धः । श्रीसदाशिवो जयति ।

Post-Colophonic: सं० १८१४ वर्षे फाल्गुनशुदि २ शनौ । श्री ।

3999. नलोदयनावयं(काव्यं)सटीकम्

OPENING:

श्रीगणेशाय नमः ।

Ct.

हृदयेति । हे हृदय हे चित्त सदा सर्वकाले सर्वावस्थायां च दुरासदायाः दुःसहायाः पापानामटव्याः अरण्यस्य दवतः दवाग्नेः दवदावो वनानल इति हैमः, सार्वविभक्तिकस्तसिः अटव्यरण्यं विपिनमित्यमरः । ××××× स्मरेण प्रद्युम्नेन दायादवतः सुतवतः दायादौ सुतसपिण्डाविति हैमः । यादवतः कृष्णात् मा गाः मा गच्छ तत्रैव निरन्तरं वसेत्यर्थः ॥१॥

COLOPHON: इति श्रीनृसिंहाश्रमविरचितायां कालिदासकृतनलोदयकाव्यटीकायां चतुर्थः सर्गः ।

Post-Colophonic संवत् १८५५ मिति माघ सुदि पंचमी रविवार भरतपुरमध्ये गुर्जर मनसारामेण स्वपठनार्थं परार्थं वा लिखितं ग्रंथसंख्या १२३५

4000. नलोदयकाव्यं 'साहित्यदीपिका'दीपितम्

OPENING : श्रीजिनः

हृदयेति । हे हृदय यादवतः यदुकुलोद्भवात् पुरुषोत्तमान्मा गाः सदा मा गच्छ तत्रैव निरन्तरं रमस्वेत्यर्थः। किंविधाद् यादवतः दुरासदायाः पापाटव्या दवतः दुःखेनापि सोढुमशक्यायाः पापाटव्याः अंहःकाननस्य दवाग्नेः । पुनः किंविधात् अरिसमुदायादवतः किं त्रिजगत् । पुनः किंविधात् स्मरेण दायादवतः दायादौ सुतबान्धवावित्यमरः ॥१॥

COLOPHON : इति श्रीमत्कविशेखरकेशवविरचिता नलोदयस्य टीका साहित्यदीपिका समाप्ता। सम्पूर्णम् ।

Post-Colophonic संवत् १८३५ मिति वैशाखकृष्ण ५ बृहस्पतिवारे लिखितं विदुषा वखतरामेण श्रीजिनो जयतितराम् ।

4001. नलोदयकाव्यं 'दीपिका'टीकाञ्चितम्

OPENING : श्रीगणेशाय नमः । निर्विघ्नमस्तु ।

अपारविद्योदधिपारमेतुं सेतुं सुरेन्द्रादिशुभैकहेतुम् ।
येरम्ब(स्मेरं व)हन्वो धिषणाभिलाषं हेरम्बसेवां समुपाश्रयन्तु ॥१॥

प्रायो नलोदयमिदं निपुणैकगम्यं,
नानारसैकनिलयं यमकातिरम्यम् ।
व्याख्यां विना न सुखबोधविधाय काव्यं,
धीरः पयस्तरतु कश्चरणेन नाव्यम् ।
अस्यानवद्यतरपद्यमनोहरस्य,
व्याख्याकृतेऽहमधिकं प्रयते वरस्य ।
विश्वस्य मार्गमुपदर्शयतो नरस्य,
शम्भुः कृतिं न किमु दर्शयितातरस्य ।।३॥

CLOSING (f. 24) इति श्रीमदात्रेयत्रेय(गोत्रिय)गोविन्दभट्टविरचितायां नलोदयदीपिकायां तृतीयः सर्गः।

(f. 25) तत्रापणयिति । ततस्तदनन्तरं भैमी ततस्तस्मान्नगरात् ततस्वनयाद् विस्तीर्णं-निजपतिव्रतधर्मात्तात्र कुण्डिनपुरे तस्य नलस्यागमनाय आयतत यत्नमकरोम् । ×× ×× पुनः किंभूताय आगमनाय सर्त्तुपर्णाय सर्त्तुपर्णाय ऋतुपर्णेन सहिताय साकृत-सामान्येन आ...............।

4002. नलोदय-'विबुधचन्द्रिका'टीका

OPENING : श्रीभारत्यै नमः ।

नत्वा हरिं कमलशंखगदारिपाणिं,
लक्ष्मीनखांकविलसद्हृदयं दयाब्धिम् ।

वागीश्वरीमथ गुरुश्च परापरेषां,
टीकां मनोरथकविः स्वधिया विधत्ते ॥१॥

नलोदयपदाबोधाद् बुधः खेदं विमुञ्चत ।
मनोरथकृतां टीकां शुद्धां सम्प्रति पश्यत ॥२॥

CLOSING : नागेवासरभाभिधे विधुपतौ स्वःसिद्धतीरे वसन्,
वाग्देवीचरणाम्बुजद्वयरजोरज्य···दिंदीवरः ।
श्रीमच्छित्तापनन्दनो वरवय(चः)टीकां स्वबुद्धया सुधीः ॥१॥

नलोदयमहाकाव्यटीका विबुधचन्द्रिका ।
आचन्द्रतारकं यावद् भूयादानन्दवर्धिनी ॥२॥

एकेन यमकालापो निस्तरीतुं सुदुःशकः ।
तस्मात् सन्तो दयावन्तः स्निह्यन्तु मयि निर्भर(राः) ॥३॥

COLOPHON : इति श्रीमन्मनोरथविरचितायां विबुधचन्द्रिकायां नलोदयमहाकाव्यटीकायां चतुर्थ आश्वासः ।४। समाप्तः । शुभं भवतु । कल्याणं भूयात् ॥

4006. पञ्चदण्डातपत्रच्छत्रप्रबन्धः

OPENING : श्रीसरस्वत्यै नमः ।

प्रणम्य जगदानन्ददायकान् जिननायकान् ।
गणेशान् गौतमाद्यांश्च गुरून् संसारतारकान् ॥१॥

सज्जनान् शोभनाचारान् शास्त्रबोधनकारकान् ।
पञ्चदण्डातपत्रस्य कथां वक्षे(क्ष्ये) समासतः ॥२॥

CLOSING : (f. 23) श्रीविक्रमार्कस्य नरेश्वरस्य श्रीपञ्चदण्डातपत्रछत्रप्रबन्धे ।
पद्ये महाश्चर्यकरे यथोक्ते प्रस्ताव एषः तृतीयो बभूव ॥२६॥

ग्रंथाग्रंथ ७६९ अक्षर २१ ।

अथ श्रीविक्रमादित्य[:]कार्यं कृत्वा तृतीयकम् ।
चतुर्थकार्यकरणे आदेशं याचतेऽनया ॥१॥

CLOSING : (f. 29) रम्या रसवती यत्र लभ्यते द्रव्यदानतः ।
न द्रव्यास्तु पुनः स्वल्पद्रव्यदानाच्च मध्यमम् ॥३९१॥

निस्वारंकाव·································

4007. प्रशस्तिमुक्तावली

OPENING : (on f. 2) ·······हस्य दीक्षाप्रकारनिर्विकारमानसे॰ मानसैवैकचञ्चुचारुचातुर्मधुर्यधीस्तये॰ रतमेदिनीतलवर्त्तिनिखिलमानवमनोनुरञ्जनचमत्कारपरमे॰ परमेश्वरानुचिन्तननिस्तीर्णं भवसागरतरंगायमानलोभमोहादिप्रसरे॰ श्री ३ अमुकनामनि सदुपदेशनिष्ठाकनिष्ठीकृत वशिष्ठाद्युपदिष्टसमुदीयसमाचारचणे ।

COLOPHON

इति पदवाक्यार्थप्रमाणपारावारीणकविकुलचूडामणिमयूरमंजरीनीराजितचरण-कमलसकलकलानिधानदेवर्षिकविकलानिधिश्रीकृष्णभट्टविरचिता प्रशस्तिमुक्तावली संपूर्णा। श्रीहयाननो जयति।

4012. भावकल्पतरुः

OPENING:

श्रीमद्व्यासनन्दनाय नमः।

श्रीमद्व्यासकुमारगौरकथितः श्यामो भवांश्चेत्तदा,
श्यामोक्तः खलु गौर एव रुचिरः संभासते केवलम्।
गौरश्याम इहास्ति नाम तदहो श्रीपुष्पहासप्रभो,
प्रोन्मीलत्परमोन्मदिष्णुरसद प्राणेश तुभ्यं नमः ॥१॥

CLOSING:

श्रीमद्वृन्दारण्ये हितालवालेस्मभावकल्पतरुः।
गौरश्यालफ(मक)लोऽयं चेद् रसिकाः सेव्यतां शुकभवद्भिः ॥१६७॥

श्रीराधावरनामधेयमधुरोन्मीलत्सुधादीधितिः,
पूर्णप्रेमरसात्मभक्तिविलसत्सच्चन्द्रिकां स्फारयन्।
स्वानन्दामृतवर्षणः स्वजनताहृत्कैरवं स्फोटयन्,
नित्यं चेतसि यो(द्यो)ततां नभसि नः कौञ्जा(ब्जा)यनीं दर्शयन् ॥१६८॥

श्रीमद्राधावल्लभश्रीहितरूपानुगतेन नमस्ते।
स्वस्तकेन प्रयतां प्रेम्णा विरचितभावकल्पतरुणा ॥१६९॥

COLOPHON:

इति श्रीमहामधुररसिकसभामण्डनतन्मण्डलाखण्डलश्रीमद्धितहरिवंशचन्द्रगोस्वामिनः केनापि कारुण्यप्रकारेण प्रोज्जृम्भितश्च मधुरशर्मेति यो रसिकस्तत्प्रेरणतया तत्तथाभूतानां सर्वेषां रसिकभक्तानामास्वादनाय लिखितोऽयं भावकल्पतरुनामा स्तवः सम्पूर्णः सर्वेषां मङ्गलकारी भवतु। श्री।

4017. मधुकेलिवल्ली

OPENING

नमः श्रीगोकुलेन्द्रनन्दनाय।

होलीमासदिनेषु मञ्जुलतमेष्वादेशतः श्रीव्रजा-
धीशस्योन्नतरागिणः प्रमुदितः संत्यक्तगोचारणः।
निःशंकं कुलबालिकाभिरभितः केलि(ली)कलाबु(भ्यु)त्सुको
वृन्दारण्यपुरन्दरो विजयते श्रीराधिकानिर्जितः ॥१॥

मर्त्यः को विदधाति गोकुलयुवद्वन्द्वस्य लोकत्रये
वक्तुं चित्रचरित्रमत्र हृदये पाण्डित्यवानप्यहो।
किन्तु श्रीमति रूपपादरजसि श्रद्धायुतस्तु स्फुटं,
मन्दोऽपि प्रथयत्यमन्दचरितं श्रीराधिकाकृष्णयोः ॥२॥

CLOSING: (f. 36)

इति श्रीगोवर्द्धनेन विरचितायां मधुकेलिवल्ल्यां राधामाधवोत्कण्ठितो नाम चतुर्थो विटपः ॥४॥

(on f. 37) तूष्णीं भूत्वा वदर्य्याश्रम इति शनकैः सूचिवान्नन्दसूनु-
रेषा केत्यन्वपृच्छद् व्रजवरवनितां तर्जनीमुन्नमय्य ।
तत्रोद्यद्गौरवेण द्रुतमथ ललितां हन्त संबोध्य वुद्धया,
वुध्वा प्रश्नं मुनेः सा विनयचययुतोवाच गोपेन्द्रसूनुम् ॥८॥

स्वामिन् श्रीयोगिवर्य व्रजभुवि महितो गोदुहां यः प्रसिद्धो,
यस्याऽऽस्ते कीर्त्तिदाख्या पर·················

4029. मेघदूतं-सटीकम्

OPENING: श्रीगणेशाय नमः ।

कश्चित्कान्तेत्यादि । कश्चिद् यक्षो रामगिर्याश्रमेषु वसतिं चकार निवासमकरोत् वसती रात्रिवेश्मनोरित्यमरः । रामोपलक्षितो गिरी रामगिरिस्तस्याश्रमा रामगिर्याश्रमास्तेषु । कथंभूतो यक्षः गमितमहिमा गमितो महिमा महत्त्वं यस्य सः । कं अस्तं विनाशं । केन शापेन । कस्य भर्तुः । कथम्भूतेन शापेन वर्षभोग्येण वर्षं भोग्यो वर्षभोग्यस्तेन कालाध्वनोरत्यन्तसंयोग इति सूत्राद् वर्षमिति द्वितीयातत्पुरुषो युक्तः । ×××××× किंवाश्रमेषु इति बहुवचनं कथं ? तत्राह—अरत्युपेतस्यैकत्रावस्थातुमशक्यत्वात् विरहाधिक्यद्योतनार्थमिति सर्वं सुस्थम् ॥१॥

CLOSING: आसीन्निर्मलपद्मवंशयतरणिः स्वाचारचिन्तामणिः,
सद्विद्यासरणिर्भवाब्धितरणिः श्रीसोमनाथो द्विजः ।
सूनुस्तस्य धनेश्वरो व्यरचयट्टीकां शिशुद्बोधिनीं,
काव्येऽस्मिन् सरसप्रबन्धविषमे श्रीमेघदूताभिधे ॥१॥

PostColophonic वैशाखस्यासिते पक्षे तिथौ नवम्यां च बुधवासरे लिखिता टीकेयं मेघदूताभिधस्य काव्यस्य दयार्षिणा श्री·········ऋषिशिष्येण समस्तु लेखकपाठकयोः संवत् १७६३ वर्षे शुभमस्तु ।

4030. मेघदूतं सटीकम्

OPENING: श्रीगणेशाय नमः ।

कश्चिदिति । स्वाधिकारात् स्वनियोगात् प्रमत्तोऽनवहितः अत एव अपराधाद्धेतोः कान्ताविरहेण प्रियावियोगेन गुरुणा दुर्भरेण दुस्तरेणेत्यर्थः । वर्षं संवत्सरं भोग्येन भोक्तुं योग्येन भर्तुः स्वामिनः शापेनास्तं नाशं गमितः महिमा सामर्थ्यं यस्य सोऽस्तं गमितमहिमा । अस्तमिति मकारान्तमव्ययम् । ××××× गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भर इति शब्दार्णवे । स्निग्धं तु मसृणे सान्द्रा छाया वृक्षो न मेरुः स्यात् इति शाश्वतः । अत्र सर्वत्र काव्ये मन्दाक्रान्तावृत्तम् । मन्दाक्रान्ता जलधिषड्गैम्भौन्तौ ताद्गुरू चेति लक्षणात् ॥१॥

CLOSING: श्रीवैकुण्ठाभिधगुरुवचो लब्धतत्त्वावबोधो,
वाराणस्यां विबुधनिकरालंकृतायां यतीन्द्रः ।

पूर्णानन्दश्चतुररचनां मेघदूतस्य टीकां,
काव्यच्छन्दोनिगमनिपुणो बालबुद्धयै व्यतानीत् ॥१२३॥

4031. मेघदूतकाव्यम् 'पंजिका' टीकासहितम्

OPENING: श्रीमद्वीरं महावीरं कर्मसीरं मनोहरम् ।
जगत्तारं गुणाधारं दुष्टवारं स्तुवे ह्यरम् ॥१॥
कालिदासकृतः क्वात्र क्व च मे बुद्धिवैभवम् ।
तदिदं वेश्मरत्नेन कुर्वे विश्वावलोकनम् ॥२॥
मेघदूताभिधे काव्ये करिष्ये पंजिकामिमाम् ।
श्रीमल्लक्ष्मीनिवासोऽहं नाम्ना शिष्यहितैषिणीम् ॥३॥

CLOSING: इति श्रीमेघदूतमहाकाव्यस्यावचूरि संपूर्णम् ।

Post-Colophonic संवत् १८०७ वर्षे शाके १५७२ प्र० कार्त्तिक वदि ६ दिने सकलपंडितशिरोमणि-पंडितश्रीकल्याणहंसजीगणिशिष्य-अमरहंसलिपीकृतम् ।

4033 मेघदूतं सटीकम्

OPENING: नमो जिनाय ।

कश्चित्कान्तेति । व्या० कश्चिदनिर्दिष्टनामा यक्षो रामगिर्याश्रमेषु वसतिं चक्रे निवासं कृतवान् रामो दाशरथात्मजः सीतासमन्वितो रामस्तेनाश्रितो यो गिरिः पूर्वं तत्राश्रमांस्तपोधननिवासांस्ते रामगिर्याश्रमास्तेषु रामगिर्याश्रमेषु । × × × × × इयं चित्रकथा न पौराणिका । पुरा कवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासः । श्रेव्या(अद्या)पि तत्साम्यकवेरभावादनामिका सार्थवती बभूव ॥१॥

CLOSING: श्रुत्वा वार्तामिति । व्या० तावद्धनेशोपि धनदोपि जलदकथितां वार्तां श्रुत्वा सद्यस्तत्कालमेव शापस्यान्तं संविधाय कृत्वा पतौ दम्पती संयोज्यश्च शश्वदनवरतं अभिमतसुखं यथा भवति तवे(थे)ष्टान् अभीष्टान् भोगान् भोजयामास । कथंभूतो धनदः सदयदयः । पुनः कथंभूतो धनदः अस्तकोपः । कथंभूतो(तौ) दम्पती विगलितशुचौ गतदुःखौ अत एव हृष्टचित्तौ प्रीतमनस्कौ जातौ इति मन्दाक्रान्ताछन्दः ॥१२६॥

COLOPHON इति श्रीकालिदासविरचितं मेघदूताभिधानं काव्यं सम्पूर्णम् । ग्रंथाग्रंथ १५०० ऋ० हरजीनी नेश्राइं ।

4037. मेघदूतं सटीकम्

ऐं नमः ।

OPENING: कश्चिदित्यादि । इह यद्यपि गिरिनगरसागरसरित्सरोवरकमलाकरवसन्तोत्सवमलयानिलजलक्रीडापुष्पावचयचन्द्रसूर्यास्तसमयसर्गबन्धादीनां महाकाव्यलक्षणादीनामभावः तथापि महाकविश्रीकालिदासविरचितत्वात् इदं महाकाव्यमुच्यते । कश्चिद-

निर्दिष्टनामा यक्षः रामगिर्याश्रमेषु रामो दशरथात्मजस्तेन प्राश्रमतो गिरिः पूर्वं सीता-समन्वितो रामः तत्र स्थितवान् अतएव रामगिरिः × × × × × ननु किमर्थमत्र तदीयनामप्रकाशो न विहितः ? सत्यं अत्र नामनिर्देशेन कविसु(श्रु)तकथाप्रतिपादनं नु इयं पौराणी कथा न तु पूर्वकथाप्रसंगः स्यात् ॥१॥

CLOSING : इत्थंभूतं सुचरितपदमित्यादि ॥१२५॥

COLOPHON : इति श्रीकालिदासकविकृतं मेघदूताभिधानं नाम काव्यं संपूर्णः टीका संपूर्ण ।

Post-Colophonic संवत् १६८३ वर्षे पोस शुदि ११ रविवासरे लिखितम् ।

4038. मेघदूतटीका

श्रीगुरवे नमः ।

Opening and Closing same as no. 4037

COLOPHON इति श्रीकविकालिदासविरचितं मेघदूताभिधानं काव्यं तस्य टीका समाप्ता ।

Post-Colophonic संवत् १७५२ वर्षे माघमासे कृष्णपक्षे दशम्यां तिथौ मित्रवासरे श्रीविजयगच्छे भट्टारकश्रीसुमतिसागरसूरिशिष्यमुनिश्रीतेजपालस्तच्चरणाम्बुजचंचरीकेण मुनिलाल-चन्द्रेण व्यलेखि पुस्तकमिदं स्वपठनाय । पाटलिपुरपत्तने । लेखकपाठकश्रोतॄणां शुभं भवतु ॥

4046. राक्षकाव्यं 'विद्वज्जनाभिरामा'टीकान्वितम्

OPENING : श्रीगणाधिपतये नमः ।

कश्चिद्वनमिति । कश्चिदनिर्दिष्टनामा पुरुषः वनितां इमां गां वाचां अग्रे वक्ष्य-माणां बभाषे उक्तवान् । किं कुर्वन् किं कृत्वा तर्वर्यरिप्रदं समुपस्थितं उदीक्ष्य दृष्ट्वा-इत्यर्थः तरवो वृक्षास्तेषामरिः अग्निः तर्वरेररिः तर्वर्यरिः उदकं तर्वर्यरिं प्रददातीति तर्वर्यरिप्रदो मेघस्तं तर्वर्यरिप्रदं उदीक्ष(क्ष्य) । × × × वयस्यस्तरुणो युवा इत्यमरः । पुनः कथंभूतो नागः मदकलः मदेन हर्षेण कलः कामवशग इत्यर्थः ॥१॥

COLOPHON : इति राक्षसकाव्यस्य टीका समाप्ता । अपरनाम विद्वज्जनाभिरामाख्यविद्वज्जन-विनोद इति केचित् ।

4047. राक्षसकाव्य-'सुबोधिका'टीका

OPENING : गुरुं श्रीगोपीनाथाख्यं गिरं चापि गरीयसीम् ।
नत्वा राक्षसकाव्यस्य व्याख्यानं लिख्यते मया ॥१॥

COLOPHON : इति श्रीमद्विद्वचंद्रजीमण्डनओसवंशज्ञातितिलकभट्टश्रीगोपीनाथजीसुत सूरदेव-विरचिता राक्षसकाव्यटीका सुखबोधिकानाम्नी संपूर्णः ।

Post-Colophonic लिपिकृता रविवर्द्धनेन ।

4048 राधाकृष्णप्रेमसम्पुटकाव्यम्

OPENING : श्रीचैतन्यचन्द्राय नमः ।

प्रातः कदाचिदुररीकृतचारुरामा-
वेषो हरिः प्रियतमाभवनप्रयाणे ।
गत्वारुणांशुकतटेन पिधाय वक्त्रं,
नोवीनलोचनयुगः सहसावतस्थे ? ॥१॥

पाराद् विलोक्य तमथो वृषभानुपुत्री,
प्रोवाच हन्त ललिते सखि पश्य केयम् ।
स्वस्यांशुभिर्हरिमणिमयतामनो(नं)षत्,
मत्पद्मपद्मवदनाद्भुतभूषणाढ्या ॥२॥

CLOSING : पट्शून्यसत्ववनिभिर्गुणिते तपस्ये
श्रीरूपवाङ्मधुरिमामृतपानपुष्टः ।
राधागिरीन्द्रधरयोः सरसोस्तटान्ते
तत्प्रेमसम्पुटमविन्दत कोपि काव्यम् ॥१४१॥

इति श्रीराधाकृष्णयोः प्रेमसम्पुटकाव्यं समाप्तम् । ग्रंथसंख्या २६७ । प्रेमसंपुट-काव्य पाना १७

4049. राधासुधासिन्धुः 'रसकुल्या'टीकासहितः

श्रीराधावल्लभो जयति ।

OPENING : (Ct.)

राधैवेष्टं सम्प्रदायैककर्त्ताचार्यो राधामन्त्रदः सद्गुरुश्च ।
मंत्रो राधा यस्य सर्वात्मनैतं वन्दे राधापादपद्मप्रधानम् ॥१॥

अथ सकलश्रुतिशिरोगोपनीयतममपि प्रस्तूयमानरहोमाधुर्यरससकललोकानुग्रहिष्णुः श्रीवृन्दावनेश्वरीकृपाविर्भूतः श्रीहरिवंशाख्यो व्यासनन्दनः सहृदयरसिकभावुकानामास्वादयितुं तत्कृपैकलब्धं तन्नामपूर्वकसुधानिधिनामस्तोत्रमाविश्चकार । इदानीं कश्चिदपि तत्प्रयोज्यो जनः तन्निधिद्विशतसप्ततिपद्यतरंगव्याख्यालेशं सजातीयाशयानन्दार्थं स्वमनोनुरंजनाय च समारभ्यते ।

(w.)

यस्याः कदापि वसनांचलखेलनोत्थ-
धन्यातिधन्यपवनेन कृतार्थमानी ।
योगीन्द्रदुर्गमगतिर्मधुसूदनोऽपि,
तस्या नमोस्तु वृषभानुभुवो दिशेऽपि ॥१॥

नमः श्रीहरिवंशाय कृपाव्यक्तिमुपेयुषे ।
प्रादुर्भूतो यदास्येन्दो राधारससुधानिधिः ॥१॥

श्रीमत्किशोरीलालाख्यगुरवे हितरूपिणे ।
तदादेशसहायेन प्रवृत्तिर्मम तद्रसे ।

श्रीमद्राधासुधासिधुव्याख्येयं रसकुल्यका ।
निवेदितास्तु श्रीराधावल्लभांह्रिसरोरुहे ॥३॥

× × ×

नमः श्रीहरिवंशाय श्रीराधावल्लभाय च ।
श्रीमत्किशोरीलालाख्यगुरवे हितरूपिणे ॥२६॥

COLOPHON

इति श्रीमद्वृन्दावनेश्वरीचरणकृपामात्रविजृंभितश्रीराधारससुधानिधिस्तवः श्रीहित-हरिवंशगोस्वामिना विरचितः समाप्तस्तस्येयं रसकुल्याख्या व्याख्या संपूर्णा। श्रीहित गुरुचरणरजःकृपयैवेति शुभं भूयात् ।

Post-Colophonic

संवदष्टादशशते पंचत्रिंशे स्मरोत्सवे ।
समारब्धात्र लिखिता पुष्करस्योपकण्ठतः ।
श्रीमद्वृन्दावने बह्वी लिखिता पुनरत्र च ।
एकोनचत्वा..............................

4064. वृन्दावनशतकम्

श्रीराधामोहनो जयति ।

OPENING:

नमस्तस्मै कस्मैचिदपि पुरुषायाद्भुतमहा-
महिम्ने विभ्राजत्कनकरुचिधाम्ने स्वकृपया ।
असंकोचेनैवाश्वपचमखिलेभ्यः स्वयमहो,
ददौ यः सद्भक्ति विमलतरनानारसमयीम् ॥१॥

CLOSING :

वृन्दारण्योत्तमं नास्ति नास्ति मत्तोऽधमः क्वचित् ।
राधानाम्नः प्रतापेन यदि स्यान्मिलनं तयोः ॥१२५॥

श्रीमद्वृन्दावनेश्वर्याः सकृन्नामैकमङ्गलम् ।
सर्वाश्चर्यानन्तशक्ति मुखे विजयतां मम ॥१२६॥

COLOPHON :

इति श्रीप्रबोधानन्दसरस्वतीकृतं श्रीवृन्दावनशतकं समाप्तम् ।

4077. वैराग्यशतकं सस्तबकम्

OPENING :

सर्वदर्शिनमानम्य रूपचन्द्रयतिः[कविः] ।
वैराग्यशतकस्यास्य ब्रूतेऽर्थं लोकभाषया ॥१॥

CLOSING & COLOPHON :

इति श्रीभर्तृहरिकविविरचित वैराग्यशतक पूर्ण हुओ ।

Post-Colophonic

संवत् १७६६ वर्षे आश्विन सुदि २ दिने । शनिवासरे । श्रीकालाऊना ग्राम-मध्ये लिखितं वा० रूपचन्द्रेण । भर्तृहरिशतकत्रयं सूत्रतः संपूर्णम् ।

सतरै सै अठयासीयै, सोभित सहर सुथांन ।
काती वदि तेरसि कीयो, पूरण ग्रंथ प्रधांन ॥१॥

कवित्त— तहँहिं···खरतरगच्छ जिणभगतिसूरिगुर।
विजयमान वड वखत खेमसाखा मधि सद्धर।
वाणारस गुणवंत सुक्खवरधन अति सुजस।
वाणारस विरुदाल श्रीदयासिंघ शिष्य तस।
तसु चरणरेणु सेवातणैं, भल प्रसाद मन भाविया।
इम रूपचंद परगट अरथ, सतक तीन समझाविया ॥२॥

छत्रपति कमधां छात सकल राजा राजेसर।
महाराजकुल-मुगट श्रीग्रभैसिंघ नरेसर।
विजैराज तसु वीर सकल हुजदार सिरोमणि।
जीवराज घण जांण प्रसिध मंत्री वीरप्पणि।
मनरूप पुत्र तसु प्रवल मति, आग्रह तसु आरंभिया।
इम रूपचंद परगट अरथ, सतक तीन समझाविया ॥३॥ श्रीः

4080. शृङ्गारमाला

OPENING : श्रीमते रामानुजाय नमः।

अथ शृङ्गारमाला लिख्यते—

अरुणिमरविनखचन्द्रं पावकभौमंबुधमणिभिः सुरुचि ॥१॥
सुमहिमगुरुकविवन्द्यं मन्दगमवतु पदपङ्कजं देव्याः ॥१॥

CLOSING : श्रीगुरुदेवः— संसारसर्पमुखमर्दनतार्क्ष्यरूपाः,
विज्ञानतापटलपाटितमोहकूपाः।
येषां कटाक्षकलिताः फलिता लसन्ति
गंगेशमिश्रगुरवः सततं जयन्ति ॥१०९॥

अथ कविवंशवर्णनम्—

पानीयप्रस्थात् परतस्तु मार्गो षट्क्रोशमध्ये हि घटोत्कचस्य।
ग्रामो घरौंडे प्रसिद्धनामा पूर्वे स्थितास्तत्र पुरा मदीयाः ॥११०॥

श्रीविष्णुदत्तः स्वकुलाब्जभानुर्नारायणस्तत्तनुजो बभूव।
कौशल्यगोत्रो यजुषामधीता माध्यन्दिनीयो द्विजगौड-जोसी ॥१११॥

तस्यात्मजोऽस्मादगमत्तु काश्यां षड्दर्शिनो वैरमपुत्रमंत्री।
दामोदरो वैद्यकग्रन्थकर्ता श्रीरामकृष्णस्तदपत्यमासीत् ॥११२॥

तुलसी-माधव-गंगारामाख्यास्तत्तनूद्भवाश्चासन्।
माधवरामसुपुत्रो हृदयराम इति सुगीयते मनुजैः ॥११३॥

साहित्ये रसग्रन्थकृद् बुधवरस्तस्यांगजातः कवि-
र्बाबूराय इति प्रसिद्धिमगमद् वासी पुरे बागले,

तत्पुत्रेण मया कृता रसमयी माला रसोपासका-
ज्जप्ता प्रापयितुं गुणैरपि युता क(कु)ल्या रसब्रह्मणि ॥११४॥

सुखलालेन सुकविना रचिता शृंगारमणिमयी माला ।
कण्ठे सा रसिकानां सगुणसुवर्णा विलासमातनुताम् ॥११५॥

सुधांशुव्योमवस्विन्दौ वर्षे ज्येष्ठसिते रसे ।
शुभा शृङ्गारमालेयं रविपुष्ये सुगुम्फिता ॥११६॥

COLOPHON : इति श्रीमत्साहित्यशास्त्रानुभवरसिकगौडविप्रवरबाबूरायमिश्रसूनुसुखलालमिश्रेण विरचितायां शृङ्गारमालायां संकीर्णवर्णनं नाम तृतीयं विरचनम् ॥श्रीः

4092. शृंगारशतकं सस्तबकम्

OPENING : सर्वदर्शिनमानम्य रूपचन्द्रयतिः कविः ।
शृङ्गारशतकस्यास्य ब्रूतेऽर्थं लोकभाषया ॥१॥

CLOSING : & COLOPHON इति श्रीभर्तृहरिराजकवीश्वर कीधो दूजो शृङ्गारशतक पूर्ण हुओ ॥१॥

Post-Colophonic Same as no. 4077

4096. सेवाशतकं सटीकम्

OPENING : श्रीराधावल्लभो जयति ।

श्रीराधावल्लभेष्टः सकमलनयनः सद्गुरुः श्रीविहारी-
लालो विद्वान् पितास्ते जननविमलभूर्यस्य वृन्दावनं च ।
आचार्यो व्याससूनुः प्रथिततमगुणो गौडगोस्वामिभूपः,
सोऽहं कुर्वेऽनवद्यं निजजनसुखदं स्वामिसेवाविचारम् ॥१॥

श्रीराधिकावल्लभमिष्टदेवं नत्वा गुरुश्रीहरिवंशमुख्यान् ।
स्वनिर्मितस्य ब्रजलालशर्मा सेवाविचारस्य करोमि टीकाम् ॥२॥

CLOSING : बाणबाणर्षिचन्द्राख्ये संवत्याचार्यजन्मनि ।
गोस्वामिव्रजलालेन सेवाशतमिदं कृतम् ॥१०१॥

ग्रन्थसमाप्तिसमयो निरूप्यते—गोस्वामिना व्रजलालेनेदं सेवाशतं कृतम् । कदा बाणाः पञ्च, पुनर्बाणाः पंचर्षयः सप्त, चन्द्रश्चैकस्तदाख्ये तन्नाम्नि संवति विक्रमादित्यराज्यातीतसंवति १७५५ अंकानां वामतो गतिरिति रीत्या ज्ञेयमिदम् । तत्राप्याचार्यस्य पूर्वं ग्रन्थादौ कथितस्य श्रीहरिवंशगोस्वामिनो जन्मनीति जन्मदिने लक्षणया बोध्यं वैशाखशुक्लैकादशीदिने कृतमिदं सेवाशतम् ॥१०१॥

COLOPHON : इति श्रीराधावल्लभभजनानन्दविचारं रसिकजनग्राह्यं श्रीहरिवंशगोस्वामिनः-प्रपौत्रकृतं सेवाप्रकारशतकं समाप्तमिदं श्रीगोस्वामिचन्द्रलालजीकेषां पुस्तकेन लिखितं ।

Post-Colophonic लिपीकृतं स्वेताम्बर नानिगराम सरूपनगरमध्ये व्यासजी श्रीहरलालजीवाचनार्थं सं० १८२४ मार्गसिर कृष्णे १२ बुधवासरे ।

4099. अनर्घराघवटीका

OPENING (f. 41)

..............स पृष्टत्वे निरूपिताः । सौखप्रसुप्तिक इति पृच्छतो सुस्नातादित्य-इति०— किरणमालिनि सूर्ये गर्भितेपि संजातगर्भेपि सति तारकादित्वादिति च गगनांगणतिरोहितेपीत्यर्थः । यद्वा गर्भं इवाचरति सर्वप्रातिपदिकेभ्यः क्विबा(ब्वा)वक्तव्य इति क्विपि कृते क्तः । कीदृशे दिशां मण्डली दिङ्मण्डली दिक्समूहः तस्या यन्मुकुटी(टः)शिरोलंकारभेदस्तस्य मण्डनः शोभयिता यः पद्मरागः कुद्मण्डार्थेभ्यश्चेति कर्त्तरि युवकरणे वा ल्युट् । पद्मरागश्चासौ रत्नं चेति कर्मधारयः । तस्यांकुरे अंकुर इव रूपके । एतेनाभरणाभरणत्वेनातिमनोहारित्वमुक्तम् । यदाह कालिदासः—आभरणस्याभरणं प्रसाधनविधेः ।

COLOPHON

इति समस्तप्रक्रियाविराजमानहरिनारायणपदसमलंकृतिमहाराजाधिराजराजश्रीमद्भैरवसिंहदेवप्रोत्साहितवैजोलीग्रामवास्तव्य-खौआलकुलोद्भवश्रीरुचिपतिमहोपाध्यायविरचितायामनर्घराघवटीकायां सप्तमोऽङ्कः संपूर्णः । समाप्ता । शुभं भवतु । कल्याणमस्तु । श्रीमहादेवजीप्रसादात् ।

Post-Colophonic

आसुज सुद दसमु संवत् १८४२ लीखतं दवे विश्वेश्वर गोलवाल जेपुरमध्ये लीखतं श्रीरस्तु ।

4111. मुद्राराक्षसनाटकं सटीकम्

OPENING:

श्रीगणेशाय नमः ।

सिन्दूरारुणगण्डमण्डलमदामोदभ्रमद्भृङ्गिका-
भंकारेण कलेन कर्णमुरजध्वानेन मन्द्रेण च ।
तत्तौर्यत्रिकरीति मे···शिरसः शश्वन्मदांदोलनं,
यस्य श्रीगणनायकः स दिशतु श्रेयांसि भूयांसि वः ।।१।।

× × ×

ढुण्ढिनाम्ना बुधेनेदं मुद्राराक्षसनाटकम् ।
साङ्गमद्भुतवृत्तं तत् स्फुटं व्याख्या[य]तेऽधुना ।।२।।

श्रीमद्गोसलवंशभूपतिकुलामात्येषु विख्यातिमान्,
भारद्वाजकुलार्णवेन्दुरुदभूद्वाबाजिरग्न्याहितः ।
पुत्रस्तस्य किलैकभूपतिमणेर्मंत्री सदैवादृत-
स्तेनासीद् गुरुवत्प्रगल्भधिषणो गंगाधराख्योऽध्वरी ।।३।।

तस्य द्वौ तनयावुदारचरितौ कृष्णाम्बिकागर्भजा-
वेकश्मापतिपालितौ गुरुपदे चारोप्य सम्मानितौ ।
तत्पुत्रेण च शाहजीक्षितिभृता ज्येष्ठानुवृत्त्यादृतौ,
तत्तादृग्विविधाग्रहारकरणाद् विद्वत्प्रतिष्ठापितौ ।।४।।

ज्येष्ठस्तत्र सदावदातचरितः श्रीमान् नृसिंहाध्वरी,
गायत्री समुपासनादिभिरपि श्रौतैश्च सत्कर्मभिः ।

आत्मानं परिभूय तं सुचरितैः पुत्रैः प्रतिष्ठाप्य च,
त्रैधा ब्रह्महिताप(य)सत्कृतिचितीन् स ब्रह्मलोकानगात् ॥५॥
तस्यात्मत्रितये स्त्रजस्तु धृतिमानानन्दरायाध्वरी,
कौमारात् प्रभृति प्रगल्भधिषणः श्रीशाहराजादृतः ।
इष्टापूर्तसदन्नदानसुहितत्रैविद्यवृद्धैः सह
श्रुत्युक्तार्थपरिष्क्रपा(ष्क्रिया)पटुमतिः सत्कर्मनिष्णातधीः ॥६॥

× × ×

ज्येष्ठे तत्र नृसिंहयज्वनि दिवं यातेऽनुजस्तत्सुतान्,
पश्यन्पुत्रवदग्रजाय चितिमप्यानन्दराजे दधत् ।
वैतानानिव कारयन् सुचरितान्येतैः स्वपुत्रेण च,
श्रीमानत्र महाग्निचिद् विजयते श्रीत्र्यम्बकाऽऽर्योऽध्वरी ॥८॥

× × ×

तत्रोच्चैरुपचार्य नीवृदधिपैरेनं स्वपञ्चादरात्,
प्रत्युद्गम्य समादधाद् गुणविदामग्रेसरः शाहराट् ।
स त्यागेशसरूपतामथ गतस्तत्पादपद्मार्चना[द्]
यत्तत्स्वान्ततया पपा(यया)तिनलमांधात्रादिभिर्दुर्लभाम् ॥१२॥
भ्राता तस्य महोन्नतिः शरभजीराजः प्रशास्ति क्षितिं,
विश्वानन्दविधायिभिर्गुणगणैरारागर्जयन् विष्टपम् ।
वृत्तीर्ब्रह्महिताय शाहजी(जि)महाराजार्पिताः पालय-
न्नाधिक्येन सदादृतद्विजवराशीर्वद्धितप्राभवः ॥१३॥

× × ×

बुधो ढुण्ढि(ढुण्ढी)नाम्ना जगति विदितो लक्ष्मणसुधी-
मणेः श्रीमद्व्यासान्वयजलधिचन्द्रस्य तनयः ।
दधन्मुद्राङ्कं राक्षसमिति नवं नाम शुभसं-
विधानं व्याचष्टेऽद्भुतरसन(म)यं नाटकवरम् ॥२२॥
श्रीमद्विशाखदत्तीये मुद्राराक्षसनाटके ।
कथोपोद्घातमाचष्टे संविधाना विबुद्धये ॥२३॥

CLOSING :

श्रीमद्विशाखकविवर्यकृतिर्मयैषा,
श्रीत्र्यम्बकानुमतितो विवृता यथावत् ।
श्रीस्वामिशैलवसतिर्भगवान् विशाखो,
देवोऽनया मुदमुपैतु सनत्कुमारः ॥१॥
बाणाग्न्यृतुमहीसंख्यामितेऽब्दे जयनामके ।
ढुण्ढिना व्याकृतं जीयात् मुद्राराक्षसनाटकम् ॥२॥

COLOPHON : १६३५ शालिवाहनशाकब्दाः जयसंवत्सरफाल्गुने मासि विरचितमिदं मुद्राराक्षसनाटकव्याख्यामं(नं) जीयादित्यर्थः ।

4113. रामहनुमन्नाटकम्

OPENING : श्रीरामे दशरथेन कैकेयीवाक् पात्रावन वनं प्रेष्यमाणे लक्ष्मणस्य भावः—

निर्यातमाकर्ण्य वनाय रामं सौमित्रिरुत्तंभितकोपकम्पः ।
विश्रान्तदृष्टिः किल चापयष्टौ दध्यौ स वैलक्ष्यमिदं हृदन्तः ॥१॥

CLOSING : रकारादीनि नामानि शृण्वतो मम पार्वति ।
मनः प्रसन्नतामेति रामनामाभिशंकया ॥८८॥

COLOPHON : इति श्रीरामहनूमतं नाटकं ।

Post-Colophonic हर्षहंसमुनिनाऽलेखि ।

4129. पुष्पवाटिका

OPENING ; (f. 2)

·················भिनियुक्तो बहिरन्तरम् ।
तदाज्ञया करोम्येतं स एवानेन तुष्यताम् ॥१३॥

\+ × +

तदीयकाले तद्देशपालस्य परिवर्णने ।
स्वराजश्रीमहाराजविश्वनाथगुणस्तुतिः ॥२०॥

शाहजादस्तुतौ राजकुमारपरिवर्णनम् ।
तन्मंत्री(त्रि)वर्णने मिश्ररूपरामपरस्तुतिः ॥२१॥

\+ + +

एवं मक्कादियात्रासु जगन्नाथादिकीर्त्तनैः ।
यमनीं मि(गि)रमुद्धृत्य रचिता पुण्यसंस्कृतिः ॥२४॥

\+ + +

पुरोक्तस्तु स एवार्थो धृतो यत्र कथान्तरे ।
अरबीभाषया चोक्तः पुनरुक्तो गिरन्तरे ॥२५॥

(f4. a) ++++ मण्डलैकचक्रवर्त्तिशूरवीराणां शाहनशाहपरमोत्साहद्वितीयाऽऽलमगीराणां समस्तभूशासनविधानेषता ++++

(f. 8a) श्रीकृष्णस्य प्रमोदायारचयत् पुष्पवाटिका ।
भीमपुर्यां रामधनो विदुषां बुद्धिवृद्धये ॥७॥

CLOSING : कुलटा स्थाविरा किं कुर्यात् यत्प्रजाखेदनाद् हस्तं नोत्थापयेत् । प०

यूनो हि भगवद्भक्त्यै वरमेकान्तसेवनम् ।
वृद्धः स्वयं समुत्था··················॥

4131. युगलचरितामृतकथा

OPENING:

श्रीराधाविहारी जयति ।

आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजभावयुक्तम् ।
योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमदगुरुं नित्यमहं स्मरामि ॥४॥

× × ×

तदज्ञानव्युदासाय सद्भक्तेविग्रहाय च ।
विष्णुस्वामीति प्रथितः स्वयं विष्णुर्बभूव ह ।

× × ×

गोस्वामी पदवी यस्य विख्याता भारताजिरे ।
किशोरीरमणो यस्य सेव्यरूपः स्वयं प्रभुः ॥
तद्वंशोद्भवगोस्वामी श्रीप्रद्युम्नो महाप्रभुः ।
दिगन्तकीर्त्तिर्यस्यास्ति भक्तिमार्गप्रवर्तिनी ॥
तस्माद् वंशीधराचार्यः समक्षं प्रेमसद्वपुः ।
श्रीराधालालनपरो वृषभानुरिवापरः ॥
वृन्दारण्यनिकुञ्जे तु स्थित्वामृश्य सुनिश्चितम् ।
युग्मचारित्रपीयूषं ग्रन्थं कुर्वे सुखप्रदम् ॥

CLOSING:

त्वद्रूपगुणनाम्नां च स्मरणेऽस्तु सदा शिरः ।
पादाभिवन्दने नासा त्वन्निर्माल्यसुगन्धके ॥
जिह्वा त्वदर्पितान्नेषु दृष्टिः साधुजनेक्षणे ।
त्वत्स्थानगमने पादौ·····························

4136. संस्कृतमञ्जरी

OPENING

श्रीगणेशाय नमः ।

कुत्रत्या भवन्तः, कस्मादागताः, कां दिशं अलंकुर्वन्ति स्म, कां दिशं अलंकर्तुं-मीहन्ते, कुत आगताः, कर्णाटदेशादागताः । कस्माद्देशादागता भवन्तः, माहाराष्ट्र-देशात् समागता वयं । के यूयं, वयं गौडदेशिकाः । किमागमनकारणं, किमागमनप्रयो-जनमुद्दिश्य समागतं युष्माभिः ।

CLOSING:

संस्कृते मञ्जरी ख्याता ह्यनन्तेन विपश्चिता ।
बालबुद्धिप्रबोधाय प्रोतूरेण(?)समन्विता ॥१॥

COLOPHON:

इति श्रीसंस्कृतमञ्जरी सम्पूर्णतामगात् ।

4143. संस्कृतमञ्जरी

OPENING:

श्रीगणेशाय नमः ।

नत्वा वक्रेश्वरं देवं आशातीतं परात्परम् ।
वक्ष्येऽहं बालबोधाय इमां संस्कृतमञ्जरीम् ॥ १॥

भवा(म्वा)दिः अत्र आगम्यतां आगम्यते गच्छतां गच्छेत क्रियतां क्रियते कुत्र निवासो वर्तते गम्यतां गम्यते भोजनं दीयताम् दीयते आचार्यस्य तत्र पृच्छतां पृच्छते अत्र स्थीयते ।

COLOPHON इति श्रीमहेश्वरेण विरचितायां संस्कृतमञ्जरी समाप्ता ।

Post-Colophonic संवत् १९२५ ।

4152. याथातथ्यनिर्णयः

OPENING : नारद उवाच— जीवहत्यां कथं रक्षेदभक्ष(क्ष्य)श्च किमुच्यते ।
किं त्यज्यतेऽस्मिन्संसारे को धर्मोद्दिमवा(दिवमा)प्नुयात् ॥१॥

अत्र जीवदयाविचारः— जीवाज्जीवः समुद्भूतो जीवो जीवेन रक्षितः ।
जीवेन वर्द्धते जीवो जीवेनैव क्षयं गतः ॥२॥

CLOSING : आत्मा संयोगशुद्धोऽयं विमुक्तोऽयं नं(र)विर्भवेत् ।
पुण्यपापे लेपे जंतौ आत्मा जानीत किं व... ॥३२॥

COLOPHON : इति याथातथ्यनिर्णयो दृष्टान्तवाक्येन प्रोक्तम् ।

4153. वज्रालयः

OPENING : अर्हम् । श्रीसर्वज्ञाय नमः । श्रीगौतमाय नमः ।

सव्वण्णवयणपंकयनिवासिणि पणमिऊण सुयदेविं ।
धम्मा इति वग्गजुयं सुयणाण-सुहासियं वोच्छं ॥१॥

विवहकइविरइयाहिं गाहाणं बहुकुलाइं धित्तूणं ।
रइयं विज्जालग्गं विहिणा जयवल्लहं नाम ॥२॥

CLOSING: किं सुरगिरिणोत्तुंगत्तणाण किं तीए कणगरिद्धीए ।
पासे सुभमंतंमित्तमंडलं जस्स अच्छमइ ॥३॥

COLOPHON : विज्जालउ ।

4154. सभारञ्जनग्रन्थः

OPENING : श्रीगणेशाय नमः । ओम् ।

इभवक्त्रं नमस्कृत्य सारदां विट्ठलं पति[म्] ।
सभारञ्जनग्रन्थोऽयं स्फुटश्लोकीति कथ्यते ॥१॥

COLOPHON : इति श्रीनानाग्रन्थानुसारेण नानायुक्तिप्रयुक्तिचारिभाषणं नाम सभारञ्जनोयं ग्रन्थः समाप्तः ।

Post-Colophonic लिपीकृतं रामनारायणेन संवत् १९१४ फाल्गु० शु० १० मं० ।

4158. सुभाषितसंग्रहः

OPENING: ....ण जनकं धीरैः सदा सेवितम् ।
सम्यग्दर्शनज्ञानवृत्तगुणसद्भाण्डं पवित्रं परं,
चात्राऽमुत्र हि सौख्यगेहमपरं त्वं ब्रह्मचर्यं भज ॥३६॥
शीलव्रतसमायुक्तः पूज्यो नीलीव सोऽमरैः ।
निन्दनीयो विना तेन प्राणीवारक्षकादिवत् ॥३७॥

CLOSING: जिनवरमुखजातं ग्रन्थितं ग्रन्थितं श्रीगणेन्द्रै-
स्त्रिभुवनपतिसेव्यं विश्वतत्त्वैकदीपम् ।
ग्रमृतमिव सुमिष्टं धर्मबीजं पवित्रं
सकलजिनहितार्थं ज्ञानतीर्थं हि जीयात् ॥३९०॥

COLOPHON: इति सुभाषितमहाग्रन्थः समाप्तः । शुभं भवतु । लेखकवाचकयोः ।

Post-Colophonic: स्वस्तिश्री संवत् १५९६ वर्षे फागुणसुदि १० शुभदिने । मेडताशुभस्थाने मंडला-चार्यश्रीभुवनकीर्त्तितत्शिष्य-ग्राचार्यश्रीविशालकीर्त्ति[ना] ग्रात्मपठनार्थं लिखापितम् । शुभं भवतु ।

4165 सुभाषितसंग्रहः

श्रीगौतमाय नमः । श्रीगुरुभ्यो नमः ।
सविनयास्तनया दयिता हिता नयभवो विभवः सगुणागमः ।
वपुरनाधिसमाधि रतिर्नृणां शुभतरोः प्रथमां कुरु का इमे ॥१॥

CLOSING: ग्रत्र भ्रष्टो तत्र भ्रष्टो किं निरिष्य(रीक्ष)सि जम्बुके ।
गृध्रपंखी(पक्षि)हतं मांसं मीनोऽपि सलिले गता(तः) ॥६॥

4168 सुभाषित-सूक्तावली

OPENING: वीरं विश्वगुरुं नत्वा कृत्वा यत्नेन संग्रहम् ।
सदोपकारिसूक्ताली स्वान्यपाठाय लिख्यते ॥१॥

CLOSING: ग्राराधयेद्धर्ममनन्यकर्म प्रायः प्रसादावधिरेव सर्वः ।
ग्रारादु(द्धु)मेनन्तकृतप्रसादं कस्यापि विस्फूर्ति निर्यत्रि चेतः ॥४॥

COLOPHON: इति ग्रधिकारबद्धसूक्तावली समाप्ता ।

तपागच्छाधिराजश्रीमुनिसुन्दरसूरिशिष्यपण्डितप्रकाण्डपं०शुभसुन्दरगणिशिष्य-लवचन्द्रधर्मगणियोग्या । लिखितं वृद्धग्रामे ।

4181 नीतिशतकं सस्तबकम्

OPENING: सर्वदर्शिनमानम्य रूपचन्द्रयतिः कविः ।
सन्नीतिशतकस्यास्य ब्रूतेऽर्थं लोकभाषया ॥१॥

COLOPHON: इति श्रीभर्तृहरि राजा री कीधी नीतिशतक पूरी हूश्री ।

Post-Colophonic श्रीबृहत्खरतरगच्छे । वा० रूपचंद लिखितम् ।

Same as no. 4077

4184 आलापपद्धतिः

OPENING: अथ आलापपद्धतिर्लिख्यते—बालानां गीर्वाणभाषायां परिचयार्थम् ।

ननु भो के यूयं ब्राह्मणा व क्षत्रिया वा वैश्या वा वैष्णवा वा जैना वा वेदान्तिनो वा शाक्ता वा, कुतस्त्याः कस्माद्देशात् समागताः अंग-वंग-कलिंग-सिन्धु-सौवीर-कुरु-विदेह-पाञ्चाल-मरु-मालव-मेदपाट-लाट-भोट-खादिराट-कच्छ-गुर्जर - कुंकण - कन्हड-वसड-ढुंढाहड-बागडादयो देशाः बहवः सन्ति ।

CLOSING: तथैव सर्वभाषाभ्यः गीर्वाणभाषा प्रशस्ता कठिनतरा वर्तते । गीर्वाणभाषायाः परिचयार्थं केचित् केचित् शब्दा यथायुक्तिज्ञापनार्थं विशदीकृत्य लिखिता श्रीकृष्ण-भक्त-स(द्)धर्मसक्त-कृष्णदत्तप्रार्थनया शब्दशब्दार्थप्रतिबोधकविज्ञानार्थं विलासपूर्वक-मालापपद्धतिर्वचनरचनाविज्ञानायावधारिता सुशिष्यैः अत्यादरेण वाचनीया धारणीया इति मंगलं भूयात् ।

Post-Colophonic: संवति १८१० चैत सुदि ३ भौम शुभमस्तु ।

4185 विट्ठलनाथस्य पत्रम्

स्वस्ति श्रीविट्ठलदीक्षितानां गिरिधरस्य च श्रीगोविन्द-बालकृष्ण-श्रीवल्लभ-रघु-नाथ-यदुनाथ-घनश्यामेषु गिरिधरस्य भवतां च पुत्रेष्वाशिषः । शमिह, भावत्कं सुभद्र-माशास्महे । टोडाग्रामपर्यन्तं श्रीगोकुलनाथेन कुशलेन समानीताः स्मोऽत्रैव दोलोत्सवः कारितः । गिरिधरविपयिष्यस्वद्वि उभयत्रापि सेवा सम्यक् कार्या कारणीया च । स्वदेहरक्षा सर्वैः प्रकारैः कार्या । यद् द्रव्यमागमिष्यति तन्मध्ये तत्कालानुरूपव्ययोप-योगि यावद् भवति तावत् स्थापयित्वा शेषेणावश्यमृणशोधनं कार्यं । व्ययश्च साव-धानतया करणीयः । निशि यामिकाः सावधानाः स्थापनीयाः । इति प्रेषितोऽश्वो गोविन्दभट्टेभ्यो दत्तोस्त्यस्माभिस्तं विक्रीय तद्द्रव्यं तैर्ग्राह्यम् । पत्रं मुहुः प्रेषणीयम् । तत्र सर्वोऽपि वृत्तान्तो लेखनीयः । गिरिधरापत्यानां विशेषतः कुशलं लेख्यम् । चिन्ता काऽपि न कार्या । श्रीगोवर्द्धननाथोऽस्मत्कुलपतिरस्मद्धितमेव करिष्यति । किमधिकम् ।

गोविन्दभट्टेषु गणेशभट्टेषु वासुदेवभट्टेषु चाशिषः । श्रीमद्गोविन्ददासेषु भगवत्स्म-रणं वाच्यम् । मदनसिंहादिषु कृष्णदासादिष्वाशिषो वाच्याः । वासुदेवभट्टैरागन्तव्यं पुरोहिता ग्रामात् । वैंकटिप्रभृतिषु कृष्णरायादिष्वाशिषः ।

किं ब्रुवाणि सखिश्रेष्ठ विरहानलदाहिताः ।
जीवामि(मी)त्येतदेवालं निरपत्रपतास्पदम् ॥१॥
सख्येतल्लिखनीयं त्वयाति यत्नेन राधिकानाथः ।
किं कृपयिष्यत्यथवा मनोरथेनैव कालनिर्वाहः ॥२॥

श्रीगोवर्धननाथचरणकमलयोर्नतयो निवेदनीयाः ।

4186 सदोपकारि-सूक्तावली

OPENING :

वीरं विश्वगुरुं नत्वा कृत्वा यत्नेन संग्रहम् ।
सदोपकारिसूक्ताली स्वान्यपाठाय लिख्यते ॥१॥

पूज्यपूजा दया दानं तीर्थयात्रा जपस्तपः ।
श्रुतं परोपकारञ्च मर्त्यजन्मफलाष्टकम् ॥२॥

CLOSING :

प्रभासपुराणे — पद्मासनसमासीनः श्याममूर्त्तिर्दिगम्बरः ।
नेमिनाथः शिवेत्याख्या नाम चक्रेऽस्य वामनः ॥

वामनावतारे हि वामनेन रैवते श्रीनेमिनाथाग्रे बलिबन्धनसामर्थ्यार्थं तपस्तेपे इति तत्र कथा । प्रभास एवेशो गौरीं प्रति । ग्रंथ० ४०१०

4187 सद्भाषितावली

OPENING:

ॐ नमो वीतरागाय नमः ।

जिनाधीशं नमस्कृत्य संसाराम्बुधितारकम् ।
स्वान्यस्य हितमुद्दिश्य वक्षे(क्ष्ये)सद्भाषितावली ॥१॥

CLOSING:

अमरपतिसुसेव्यो लोकनाथः शरण्यः,
प्रकटकृतसुधर्मः पूर्वपूर्वे विदेहे ।
मुनिगणधरसेव्यो वर्त्तमाने हि काले
विमलगुणसमुद्रः पातु सीमंधरो वः ॥३८२॥

रागो यस्य न सन्ति केचिदपि सद्वस्त्रादिसंगो जना-
दस्त्रादे[ः]परिवर्जनाच्च विविधा दोष······स्या······

4193. गाथासप्तशती (गाथाकोषः) सटीका

श्रीमहागणाधिपतये नमः ।

OPENING :

नत्वा धुडि(ढुंढि)पदाब्जं गंगाधरभट्टनिर्मिता टीका ।
सप्तशतकनावलेशप्रकाशिका शोध्यतां विज्ञैः ॥

अथ तत्र भगवान्प्राकृतकविकुमुदकुमुदिनीनायकः शालिवाहनश्चिकीर्पितगाथाकोशस्य विघ्नपरिसमाप्तये कृतं मंगलं श्रोतृहितार्थमुपनिबध्नाति 'पसुवइणविति' ।

CLOSING :

तइआ इति । तदा कृतार्थं मधुकरनपरमसे अन्यासु पुष्पजातिषु बद्धफलभारगुर्वीमाच्छतिमिदानीं परित्यज्यसि कुतः अर्घः पूजाविधिर्येन कृतादरेति यावत् 'मूल्ये पूजाविधावर्घं' इत्यमरः । क अदग्धेति पाठे कृतघ्नेत्यर्थः । बद्धेन फलभारेण गुर्वीमित्यनेन लतायाः मकरन्दराहित्यं नायिकायाश्च विपरीतरताक्षमत्वं व्यज्यते । तेन प्रथम तथा चाटुराव्दप्रपञ्चितप्रणयस्य तवेदं स्वार्थपरतामात्रमनुचितमित्युपमालम्भो व्यंग्यः । सम्प्रति नोपभोगयोग्येति जारं प्रतिहृत्या उक्तिरिति कश्चित् ॥९२॥

4239. वाक्यपदी सटीका

OPENING : (w.)

श्रीगोविन्ददेवो जयति ।

यस्मिन्नर्थे विधीयन्ते त्यादितव्यादितद्धिताः ।
समासो वा भवेद् यत्र स उक्तः प्रथमा ततः ॥१॥

(Ct.) श्रीगणेशाय नमः । त्यादितव्यादितद्धिताः प्रत्ययाः यस्मिन्नर्थे विधीयन्ते समासो वा यत्र भवेत् सोऽर्थं उक्तो भवति तत उक्तात्प्रथमा वेदितव्या । अंकुरो भवति, वर्द्धते विधुः, राज्ञा जीयते शत्रुः, अवगाह्यते सरः कुंजरेण × × × × × × एवं कृतकटो देवदत्तः, दत्तभोजनो ब्राह्मणः, उच्छन्नजनपदो देशः, चित्रगुर्ब्राह्मणः, बहूदका नदीत्यादयः ॥१॥

CLOSING : (w.)

सम्बन्धे कारकेष्ट(ा)दे भावे गोत्रपरत्र च ।
कथ्यंते तद्धिताल्ढाः समासान्ताव्यया अपि ॥१॥

COLOPHON (w.) इति तद्धितोद्देशः । समाप्तश्चायं ग्रन्थः । शुभमस्तु वः ।

Ct. इति श्रीपण्डितगंगादासविरचितायां वाक्यपद्यां सम्बन्धोपदेशः षष्ठः तद्धितोपदेशः समाप्तः । समाप्ताश्चायं ग्रंथः । शुभमस्तु पाठकश्रोतॄणाम् ।

Post-Colophonic मासोत्तममासे ज्येष्ठमासे शुभे शुक्लपक्षे एकादश्यां बुधवासरायां संवत् १८६३ ।

यादृशं पुस्तकं दृष्टवा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा विद्वांसः शोधयन्तु तत् ॥२॥

4261. कलापप्रक्रिया-व्याकरणम्

OPENING :

श्रीगणेशाय नमः ।

वाणीं नत्वा स्वभक्तानामज्ञानध्वान्तहारिणीम् ।
कालापप्रक्रिया बालबोधनाय विधीयते ॥१॥

COLOPHON : इति श्रीमन्नृपतिशिरोमणिरामसिंहाज्ञया गुर्वाशानन्दोपदेशस्फुरितबुद्धिबलदेवकृता कालापप्रक्रिया क्षत्रियबालकवुद्धिवृद्ध्यर्थम् । श्रीजगन्नाथो जयतितराम् ।

बाणखांकेन्दुकमिते विक्रमादित्यतो गते ।
वर्षेऽद्य रामसिंहाज्ञाप्रेरितेन द्विजेन वै ॥१॥
बलदेवेन रचिता कालापप्र[क्रि]या शुभा ।
उपदेशाद् गुरोराशानन्दोत्थाद्भाग्ययोगतः ॥२॥

4337. सारस्वतं सारप्रदीपिका-टीका-सहितम्

OPENING ;

श्रीगणाधिपतये नमः ।

अथ भुजंगप्रयातच्छन्द—

गणेशं शिवं पार्वतीं भानुपुत्रीं मनोवाक्शरीरेण नत्वा गुरुं च ।
·········बुद्धि·········धार्थं गिरो भाषया प्रक्रियायाः क्रमेण ॥१॥

छन्दः सूत्रैस्तदुद्दामै रूनाथा स्थवु……… ।
टीकां चा………दृष्ट्वा स्वेनां सारप्रदीपिकाम् ॥२॥

+ + +

अहं कहिये हों जो हों अनुभूतिस्वरूपाचार्य सो सरस्वतीजूनै सातसै ७०० सूत्र-पाठ को जो क्रम हैं ताकै अनुसार सौं कही जो प्रक्रिया, प्रकृति-प्रत्ययादि विभाग करिकै उत्पन्न करियें शब्द जा करि सो प्रक्रिया कहियै । ताहि तदुक्तं सारप्रदीपिकायां ।

CLOSING : द्वयं त्रयमित्यत्राऽयद् कृते यस्य लोप इती लोपः द्वितयी त्रितयी इत्यत्र नदादित्वादीप् । द्वयी त्रयी इत्यत्र तु अयटष्टित्वात् ष्टिन्नव इतीप् । केचित्तु तयायडाविति पठित्वा डित्वादिटिलोपे नदादित्वादे वेप् इत्याहुः तद...त् यस्य लोप इत्येव सिद्धे डित्ववैयर्थ्यप्रसंगादिति ।५६।

इति सारस्वतभाषाटीका ।

4342. सारस्वतप्रक्रियावृत्तिः

OPENING : ओं नमः शारदायै नमः । ओं श्रीगुरुभ्यो नमः । ओं श्रीवरदमूर्त्तिर्जयतु । श्रीइष्टदेवाय नमः ।

सूत्रं सप्तशतं यस्मै ददौ साक्ष्या(क्षा)त्सरस्वतिः(ती) ।
अनुभूतिस्वरूपायेः(य) तस्मै श्रीगुरुव्ये(वे) नमः ॥१॥
वन्दे ब्रह्म शिवं वन्दे वन्दे देवि(वीं) सरस्वतिः(तीम्) ।
लक्ष्मी वन्दे हरी(रिं) वन्दे वन्दे सिद्धार्थदेवताम् ॥२॥

इदानीं शास्त्रसंग्रहं करोमि ।

COLOPHON : इति श्रीनरेन्द्रपुरीविरचितां सारस्वतीं प्रक्रियाः तृतीयवृत्त समाप्ताः ।

Post-Colophonic संवत् १६०७ वर्षे मिति द्वितिय वैशाख भदि ६ भौमवासरैः प्रातः काले समाप्तं । लिखितं रामदास । कविरपंथि । पुर नंग्र मध्ये ।

4345. सारस्वतं सटिप्पणम्

OPENING: आख्यातप्रत्ययान् विवक्षुः प्रतिज्ञां करोति । आख्यायन्ते कथ्यन्ते भ्वादीनां रूपाणि येन तदाख्यातम् । प्रतीयते ज्ञायतेऽर्थो येभ्यस्ते प्रत्ययाः आख्यातसंज्ञकाः प्रत्यया आख्यात-प्रत्यया निरूप्यन्ते कथ्यन्ते । वक्ष्यन्ते कथयिष्यन्ते ये ते वक्ष्यमाणाः ।

COLOPHON & Post-Colophonic इति कृत्प्रक्रियाव्याख्या । लिखिता मुनितेजपालेन शिष्यलालचन्द्रपठनकृते सिलीवदग्रामे संवत् १७४७ वर्षे मार्गशीर्षमासे कृष्णपक्षे मंगलवासरे द्वादश्यां तिथौ श्री शान्तिनाथचैत्यालये शुभं भवतु लेखकपाठकयोः ।

4347. सारस्वतं बालावबोधसहितम्

OPENING : (f. 2) ………धीवृद्धिसिद्धये बालक० मुखं तिणांरी धी क० बुद्धि तिणरी वृद्धि क० वधणो तिणरी सिद्धये क० व्युत्पत्ति भणी । कथंभतां प्रक्रियां क० किसीक छै

प्रक्रियां नातिविस्तरां क० नही छै अति विस्तार जिणरो। प्रकर्षेण नत्वा इति प्रणम्य परमश्चासौ आत्मा च परमात्मा तं परमात्मानं धियो वृद्धिः धीवृद्धिः × × × ।

CLOSING : × × × मह्यां अतिशयेन रौतीति मयूरः, मही अग्रे रः इसो मंड्यो पछै ह्रस्य यत्वं इस्य उत्वं हकारने यत्व हुवो, इकार नें ऊत्व हुवो तद मयूरः इसो सिद्ध हुवो। भ्रमन् सन् अतिशयेन रौतीति [भ्र]मरः, भ्रमत् अग्रे रः इसो मंड्यो पछै निपातनात्तकारलोपः तद पृषोदर इसो सिद्ध हुवो। इति वीसर्गसिद्धी।

COLOPHON : इति पंचसंद्धबालाबोद्ध संपूर्णम्।

4385. सिद्धहेमशब्दानुशासन-धातुपाठावचूर्णिका

OPENING : अर्हं नमः।

प्रणम्य णमं प्रह्वत्वे, णम् पाठे धात्वादेर्णो नः। नम् धातो(तुः)पूजार्थः। प्रपूर्वि-प्रणमनं पूर्वं प्रणम्य प्राक्काले क्त्वा प्र० अनञ् क्त्वो ल्यप् ११ अव्ययस्य सिलोपः। अदुरपसर्गा णन्। परमश्चासावात्मा च परमात्मा तं परमात्मानं द्वितीयैक अम्, निदीर्घः दीर्घत्वं, प्रपूर्वि शंसू स्तुतौ च शन्स् प्रशस्यत इति।

CLOSING: एतद् १३ आ द्वेरः। द अ। लुग० अलोपः। जस इः। इवर्णस्येव ए अस्मद् ६१। डङ साते मे मे। पितृ १३ अर्डौ च अर्। लोकात् असहिता। सारुः। सरेफुः। रः पदान्ते विसर्गः।१२५।

COLOPHON : इति षष्ठपादावचूरिः समाप्ता। छ। इति भद्रम्। छ। शुभं भवतु लेखकपाठकयोः।

4401. अकृतापदेशकारिकावृत्तिः

OPENING : (w.) (ct.)

रामो रामस्य रामाभ्यामित्येतद् दूषणत्रयम्।
नागेशदीक्षितप्रोक्तं तत्रोद्धारं ब्रवीम्यहम् ॥१॥

श्रीगणेशाय नमः। रामः रामस्येति दूषणमिति दीक्षितः, रामाभ्यामित्यपि दूषणमिति नागेशः। तत्र केचिद् अकृतव्यूहपरिभाषया राम इत्यत्र न दूषणमित्यरुचेराह—रामस्येति। वदन्ति अन्ये तु विसर्गे कृतेपि तस्य शर्पाठादकृतव्यूहपरिभाषया प्राप्तौ द्विर्बद्धं सुबद्धमिति न्यायेनैव दूषणमित्याहुस्तदुभयमप्यन्धस्येव अन्धलग्नस्येति न्यायेन असंगतमेत्वविधायकदृष्ट्या विसर्गादीनां असिद्धत्वेन परिभाषायाः प्राप्तेरेवाऽभावात्। तत्प्राप्तिपूर्वकविसर्गे कृतेपि इत्यस्यादूरापास्तत्वाच्चेत्यरुचिपूर्वकदूषणत्रयाशयवर्णनपूर्वकं तत्खण्डनं कर्तुः प्रथमपदेन प्रतिजानीते। रामो रामस्येत्यादि ब्रवीमि अहमित्यन्तेन द्वितीयेन वृत्तेनोद्धारमाह ॥१॥

CLOSING: दिशां दशत्वादिह तत्प्रकाशा कृतादशेवात्र हि कारिका सा।
भवन्तु विद्वन्मनसो विकाशा-लसद्रवीपालकसूरिणो या ॥

COLOPHON : इति कारिका समाप्ताः।

Ct. इति श्रीपण्डितमण्डली-तमूठियाग्रामवासि-गोपालबलकृता ह्यकृतावेशकारिकावृत्तिः। ओं नमः शिवाय । वैद्यनाथाय नमो नमः। शिवं भजेत् हे कृष्ण मां त्राहि। रामः।

Post-Colophonic मिति वैशाखशुक्ला १ रविवासरे। का० मो० को० क्षे० लिखी गणेश।

4404 अनिट्कारिका

OPENING :

अनिट्स्वरान्तो भवतीति दृश्यतामिमांस्तु सेटः प्रवदन्ति तद्विदः।
अदंतमृदतमृतां च वृङ्वृञौ श्विडीङ्विवर्णेष्वथ शीङ्श्रिञावपि॥

स्वरान्तो धातुरनिट् भवति। न इट् यस्मात्सोऽनिट् इति भवद्भिर्दृश्यतां ज्ञायतां तु पुनः स्वरान्तेष्विमान् धातून् सेटः प्रवदन्ति ×+×+ कथ्यते शीङ् स्वप्ने, श्रिञ् सेवायामिति ॥१॥

CLOSING

पचिं वचिं विचि-रिचि-रंचि-पृच्छतीन् निजिं सिचिं मुचि-भजि-भंजि-भृज्जतीन्।
त्यजिं यजिं युजि-रुजि-संजि-मज्जतीन् भुजिं स्वजिं सृजि-वृजि-विध्यविट्-स्वरान् ॥११

न विद्यते इट् स्वरो येभ्यस्ते अनिट्स्वरा तान धातून् त्वं विद्धि जानीहि। तान् आह पचि डुपचषपाके, पचि व्यक्तीकरणे चानिट्। ××××× विजिर् पृथग्भावे, ओ विजी भयचलनयोः तौदादिकः सेट् चान्ताः षटस्वान्त एकः जाताः पञ्चदश ॥११॥

इत्यनिट्कारिका। कल्याणमस्तु।श्री।

4419. कारकचक्रपरीक्षा

OPENING :

श्रीपार्श्वनाथाय नमः।

सुप्तिङन्तं पदम्। अत्र सुबिति स्वादयः सप्त विभक्तय एव उच्यंते। तत्र प्रथमा-वगतत्वात् प्रथमायाः प्रथमतैव तावद्विचार्यंते। का पुनरियं प्रथमा सु उ जसिति प्रथमा। तस्याः पुनरेतल्लक्षणं प्रातिपादकार्थलिंगपरिमाणवचनमात्रे प्रथमेति।

CLOSING :

स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे।
क्रियाणामभिनिष्पत्तौ समर्थं साधनं विदुः॥१॥

अतएवं निमित्तं कारकम्।

COLOPHON : राठीय-श्रीमहोपाध्यायपशुपतिविरचिते कारकपरीक्षा संपूर्णा। श्रीरस्तु।

4420. कारकविलासः

OPENING :

श्रीगणेशाय नमः।

कर्त्ता कर्म च करणं संप्रदानं तथैव च।
अपादानाधिकरणमित्याहुः कारकाणि षट्॥१॥

क्रियाकारकसम्बन्धं ये न जानन्ति मानवाः।
पशुभिः सह तुल्या[:] खुरशृङ्गविवर्जिताः॥२॥

CLOSING : सामीपकं यथा गंगायां घोषः, प्रतिविशति जले, तिष्ठन्ति वृक्षाः, गंगायां सामीपक-आधारे सप्तमी, सर्वत्राधारोधिकरणसंज्ञा । अधिकरणसंज्ञायां सप्तम्यधिकरणे चेति सप्तमीविभक्तिर्भवति ।

COLOPHON इति कारकविलासः समाप्तः । भद्रमस्तु ।

Post-Colophonic संवत् १९२० का फाल्गुनशुक्लपक्षे पंचम्यां शनिवासरे समाप्तोऽयं ग्रन्थः ।

4434. लक्षणावली

OPENING: श्रीगणेशाय नमः ।

अथ लक्षणावलिर्लिख्यते—

ननु गणेशत्वं नाम किम् विघ्नविनाशनानुकूलव्यापारविशिष्टत्वं ।१। वा एकत्व-संख्यावच्छिन्नरदनविशिष्टत्वं ।२। करीन्द्रसदृशाननविशिष्टत्वे सत्य[पि] सर्वमानवशरीर विशिष्टत्व ।३। इभमस्तकविशिष्टत्वे सति गजेन्द्रभिन्नत्वं वा गणेशत्वम् ।४।

CLOSING : तद्धितोद्भवकर्मणः किं लक्षणं प्रकृतिजन्यबोधे प्रकारो भावः ।११३। तद्धितत्वं नाम किं न तस्मै पदसाधनहितम् । इतीति तद्धि ।११४।

COLOPHON इति श्रीमद्धिराब्राह्मभयोवतीयविरचिता लक्षणावलि संपूर्णं ।

Post-Colophonic सं० १९३९ वैसाष वद ८ भोम लिखीतं ब्राह्म जगन्नाथ पठनार्थं मुखियाजी संतोकलालजी प्रतापगड नगरे मंदिर श्रीगोवर्धननाथजी के मंदर बीठलदासजी ।।

4435. लक्षणावली

Opeing & closing same as above

COLOPHON इति श्रीमद्व्रोरावतभपार्वतीयविरचितं लक्षणावलिः समाप्तिता मंगलमत् १।।

4439. शब्दशोभा

OPENING श्रीशारदायै नमः ।

सानन्दं शतशो नत्वा शिवयोश्चरणद्वयम् ।
शब्दशोभां वयं कुर्मः शिशुव्युत्पत्तिसंपदे ।।१।।

CLOSING : यद्यपि खलबहुलोर्वी न वृथा क्लेशस्तदर्थेशः[सः] ।
तुष्यतु तदे[व] तेजो विलसति यस्य प्रसादोऽयम् ।।१।।
शुक्लजनार्दनपुत्रो वच्छाचार्यस्य दौहित्रः ।
अभ्यस्तशब्दशास्त्रो भट्टोजिदीक्षितच्छात्रः (?) ।।२।।
हीराभिधानव्रतमहसि प्राप्तनिजजन्मा ।
कविनीलकण्ठशर्मा निर्मितमेनां विनिर्ममे शैवः ।।३।।
त्रिनवषडेकमितेऽब्देऽतिक्रान्ते विक्रमादित्यात् ।
शिवरात्री शिवपदयोर्निजकृतिराधायि नीलकण्ठः ।।४।।

COLOPHON : इति कृत्प्रक्रिया । शुक्लश्रीनीलकंठविरचिता शब्दशोभा समाप्ता ।

Post-Colophonic

संवत् १७२१ वर्षे माहसुदि १५ तिथौ शनिवासरे श्रीसांगानेरमध्ये । साहा वंगा पठनाथ लिपीचक्रे । शुभमस्तु । लेखकपाठकयोः श्रेयोस्तूभयत्र । ग्रंथाग्रंथसंख्या १६५१ सूत्रस्य ।

4455. अनेकार्थध्वनिमञ्जरी

OPENING: श्रीगणेशाय नमः ।

अथ अनेकार्थमञ्जरी लिख्यते—

शब्दाम्भोधेर्यतोऽनन्तः कृतोऽथ गदितो मया ।
तमुवाचैकचितो(त्तो) यस्तस्मै वागात्मने नमः ॥१॥
सरस्वत्या[:] प्रसादेन कविर्बध्नाति यत्पदम् ।
प्रसिद्धमप्रसिद्धं वा तत्प्रमाणं च साधुभिः ॥२॥
शुद्धवर्णमनेकार्थं शब्दमौक्तिकमुत्तमम् ।
कण्ठे कुर्वन्ति विद्वांसः श्रद्दधाना अहर्निशम् ॥३॥

CLOSING: हायनं वर्षमोजश्च प्रज्ञा बुद्धिश्च चिह्नयोः ।
उरयाधीगमौ प्राप्तौ वह्निः सूर्यो विभावसुः ॥२३॥
करोके मषकः भीरुः प्लवंगः कपिभेकयोः ।

COLOPHON इत्यमरसिंहकृतौ अनेकार्थध्वनिमंजर्यां चतुष्पदश्लोकाधिकार तृतीय काण्ड समाप्तम् ।३।

Post-Colophonic लिखितं अवाडी नाथुरामेण ज्ञाती पल्लीवाल संवत् १८७४ का श्रावणमासे शुक्लपक्षे तिथौ १० गुरुवासरे । शुभं भवतु । कल्याणमस्तु ।

4502. अमरकोश-'अमरचन्द्रिका' टीका

OPENING श्रीगणेशाय नमः ।

विशेष्येत्यादिवक्ष्यमाणेऽत्र सामान्यकाण्डे विशेष्यनिघ्नादिभिः पंचभिर्वर्गा वक्ष्यन्ते, ते च न स्वतन्त्राः किन्तु वर्गाः पूर्वोक्तस्वर्गादिवर्गाः संश्रय आश्रयो येषां तादृशाः । तथाहि—विशेष्यनिघ्नाः विशेष्यायत्ताः सुकृत्यादयो देवा सुरमनुष्येष्वेव विशेषणतया संबध्यन्ते ।

CLOSING & COLOPHON इत्यमरचन्द्रिकायां रायमुकुटसारोद्धारे लिंगादिसंग्रहवर्गविवरणम् । समाप्तश्चायं तृतीयः सामान्यकाण्ड इति ।

श्रीकृष्णचरणसेवकविष्णुपुरीवण्डिनोऽपत्यम् ।
यदकृत परमानन्दः सज्जनहृदयं तदा वसतु ॥

स्वल्पं घनो वर्षति भूरि वारि वा जलं समुद्रस्य किमम्बुदस्य ।
तथाप्युपस्कर्तृ रपां समुद्रान्न मन्यते कोऽस्य महोपकारम् ॥

Post-Colophonic शुभमस्तु । सं० १७८३ वर्षे भा० सुदि ७ दिने ।

4503 अमरकोश-'पञ्जिका' टीका

OPENING:

अध्यास्ते यः सर्वं ध्रुव ईदृश इत्यगोचरो वचसः ।
अहमिति संविद्विषयः............पुरातनो जयति ॥१॥

अभीष्टदेवतानमस्काराद्युपनीतमदृष्टं हि विघ्नापरना.........प्रतिवन्धकाधर्मति-रोधानद्वारा प्रारीप्सितंपरिसमापयतीति प्रामाणिक...तो.........ग्रन्थकारः प्रथमं पद्यं निबबंध—यस्येति ।

COLOPHON:

इति श्रीमहितापनीयं कविचक्रवर्त्तिराजपण्डितसार्वभौमकविपण्डितचूडामणि-महाचार्यरायमुकुटमणिश्रीमद्वृहस्पतिकृतायाममरकोषपञ्जिकायां पदचन्द्रिकायां शूद्र-प्रधानो वर्गः भूम्यादिकाण्डो नाम द्वितीयः समाप्तम् । श्री । शुभमस्तु । श्रीरस्तु । कल्याणमस्तु ।

4524. शब्दप्रभेदः सटीकः

OPENING:

श्रीगणेशाय नमः ।

श्रीमन्तं भगवन्तमन्वहमहं श्रीशान्तिनाथं जिनं,
नुत्वा भक्तिमतां मनीषितमहासत्कर्मशान्तिप्रदम् ।

CLOSING:

त्रैलोक्ये समवाप यः पटुतरां विख्यातिमम्बाऽचिरा-
गर्भस्थेन च येन दुःखविगमश्चक्रे जनस्य क्षणात् ॥१॥

× × ×

श्रीमदभयदेवाह्वान् सूरीन् जिनदत्तसूरिराजांश्च ।
वन्दित्वा शुभकर्तॄन् श्रीमज्जिनकुशलसूरींश्च ॥३॥
विश्वप्रकाश-भागुरि-विजयन्त-व्याडि-शाश्वतादीनाम् ।
शास्त्राणि वीक्ष्य पथ्यापथ्याभिधं सन्निघण्टुं च ॥४॥
श्रीमन्महेश्वरसुधीविनिर्मिते शब्दशास्त्रमूढानाम् ।
शब्दप्रभेदशास्त्रे करोमि वृत्तिं प्रबोधाय ॥५॥ पञ्चभिः कुलकम्
शास्त्राणां हुण्डिकालेखो न कृतोऽस्माभिरत्र च ।
शास्त्रेषु शब्दशास्त्रज्ञैर्ग्रन्थगौरवभीरुभिः ॥६॥

CLOSING & COLOPHON:

इति श्रीमद्वृहद्खरतगच्छे श्रीजिनराजसूरिशिष्यश्रीजयसागरमहोपाध्याय-सन्ताने वाचनाचार्यधुर्यश्रीभानुमेरुगणिशिष्यश्रीज्ञानविमलमहोपाध्यायविरचिता शब्दप्र-भेदप्रकाशटीका समाप्ता । श्रीरस्तु ।

श्रीमद्विक्रमतो ह्यशीतिसहितेऽब्दानां सहस्रे वरे-
ऽतिक्रान्ते स बभूव सत्खरतराख्यः सद्गणो भूतले ।
दृप्यच्चैत्यनिवासिदर्पदलनाच्छ्रीदुर्लभक्ष्माभृदा-
स्थाने सूरिजिनेश्वरेण गुरुणा विख्यातिमाप्तो हि यः ॥१॥
स्थानांगादिनवाङ्गवृत्तिकरणप्राप्तप्रतिष्ठोदयाः,
श्रीमन्तोऽभयदेवसूरिगुरवो रेजुश्चिरं तत्र वै ।

श्रीमत्स्तम्भनपार्श्वनाथजिनपप्राकट्यकृत्सद्गुणा-
स्त्रैलोक्यप्रथितावदातयशसो लोकप्रमोदप्रदाः ॥२॥
तत्पदे च विरेजुः कर्मग्रन्थादिशास्त्रकर्त्तारः ।
वैराग्यैकनिधानाः श्रीमज्जिनवल्लभाचार्याः ॥३॥
तत्पट्टपूर्वाचलतिग्मरश्मयो युगप्रधाना जिनदत्तसूरयः ।
दिदीपिरे श्रावकलक्षबोधकाः सुरासुरैः संस्तुतपादपंकजाः ॥४॥
तेषां क्रमेण पट्टे श्रीजिनमाणिक्यसूरिसूरीन्द्राः ।
आसन् विद्यावन्तः सद्विश्वव्यापिमहिमानः । ५॥
यावत्क्षोणितले जयन्ति तरणिज्योतीरथाऽनेहस-
स्सन्नक्षत्रमितद्रुरामसुकथास्तावज्जयन्तीश्वराः ।
श्रीमच्छ्रीजिनचन्द्रसूरिगुरवस्तत्पट्टपूर्वाचलो-
द्गच्छद्भानुनिभाः सभाजितमहावादिप्रवादप्रभाः ॥६॥

× × ×

अकब्बराख्यक्षितिपालनाथस्तत्तच्चमत्कारिगुणातिसक्तः ।
युगप्रधानेत्यभिधामचीकरत् स नन्दतु श्रीजिनचन्द्रसूरिः ॥६॥

× × ×

यस्याचार्यपदं ददे सुगुरुभिः स्वैरात्महस्तेन वै,
दीव्यज्जीवदयापरायणमतेः सद्धर्मनिष्ठावतः ।
श्रीमल्लाभपुरे समृद्धिसहिते प्रोद्यन्महःपूर्वकं,
राजच्छ्रीमदकब्बराभिधमहाभूपेश्वरस्याग्रहात् ॥११॥
देवेन्द्रस्य गुरोर्विजेतरि सति स्वप्रज्ञया दिव्यया,
ननाकर्कशतर्कखण्डनमहाग्रन्थादिसन्निष्ठया ।
कीर्त्तिस्वर्गिवहा हिमाचल दू(द्र)हेलायां चिरंजीवति,
श्रीमच्छ्रीजिनसिंहसूरिसुगुरौ तस्मिन् प्रतिष्ठावति ॥१२॥
विश्वख्यातगुणा गणाधिपतयः सार्वत्रिकख्यातयः
श्रीमच्छ्रीजिनराजसूरय इह क्ष्मायास्तले रेजिरे ।
तच्छिष्याश्च दिदीपिरे वरधियश्चारित्रचंचच्छ्रियः,
श्रीमन्तो जयसागराभिधमहोपाध्यायधुर्याश्चिरम् ॥१३॥
गाम्भीर्यादिगुणैर्निर्जितजलधिवत्केनाप्यलब्धान्तरा-
स्तत्पट्टप्रकटोदयाद्रिविमलालंकारसूरोदयाः ।
नानाशास्त्रविचित्ररत्ननिचयः श्रीरत्नचंद्राह्वयो-
पाध्यायाः स्वधियाऽपराजितसुराचार्या विरेजुः पुरा ॥१४॥
तच्छिष्याः सकलाचलावलयसत्प्रख्यातकीर्त्युच्चयाः
सिद्धान्तोदधिगाहनैकरसिकाः कारुण्यपाथोधयः ।
मद्भाग्योदयदीप्तपाठकपदश्रीराजिता रेजिरे,
दर्पिष्ठपतिवादिमानमथनाः श्रीभक्तिलाभाभिधाः ॥१५॥

सर्वप्राज्ञवरांगशेखरसदृग्वाक्सूरवाराग्रणी.
प्रागल्भ्यप्रवरास्तपोविधिपराः सद्वुद्धच्दाराशयाः ।
तेषामन्तिषदो बभूवुरजिता दृप्यत्प्रवादिव्रजैः,
श्रीमत्पाठकशेखरा मुनिवराश्चारित्रसाराह्वयाः ॥१६॥
वैराग्यं प्रबलं शमोऽतिविमलः शास्त्रौघवार्त्ताद्भुता,
सिद्धान्तैकरुचिर्मनोरमतमा भव्योपकारः परः ।
चारित्रं च जगत्यनुत्तरतरं तत्पट्टशोभावहा
येषां श्रीयुतभानुमेरुगुरवस्ते वाचका भेजिरे ॥१७॥
अस्मत्सतीर्थ्या राजन्ते तेजोरंगगणीश्वराः ।
सिद्धान्तोक्तसदाचारपालनैकपरायणाः ॥१८॥
शब्दप्रभेदशास्त्रे वृत्तिः शास्त्राणि वीक्ष्य संदृब्धा ।
तेषां शिष्यैर्दक्षैर्ज्ञानविमलपाठकश्रेष्ठैः ॥१९॥
अस्मदन्तिषदो गाढसाहाय्यात् सिद्धिमागता ।
विद्वच्छ्रीवल्लभाह्वस्य युक्तायुक्तविवेचिनः ॥२०॥

× × ×

प्रथमादर्शे लिखिताऽस्मच्छिष्यज्ञानसुन्दराह्वेन ।
जयवल्लभगणिनाऽपि च विचारविज्ञेन भक्तेन ॥२३॥
श्रीमद्विक्रमनगरे राजच्छ्रीरायसिंहनृपराज्ये ।
सल्लोकचक्रवाकप्रमोदसूर्योदये सम्यक् ॥२४॥
चतुराननवदनेन्द्रियरसवसुधासम्मिते लसद्वर्षे ।
श्रीमद्विक्रमनृपतोऽतिक्रान्तेऽतीवकृतहर्षे ॥२५॥
शुभोपयोगे शुभयोगयुक्ते वरे द्वितीयादिवसेऽतिशुद्धे ।
आषाढमासस्य विशुद्धपक्षे, पुष्यार्कसंयुक्तगभस्तिवारे ॥२६॥

× × ×

अस्यास्त्रीणि सहस्राण्यधिकानि सप्तभिः शतैः ।
इत्येवं प्रमितिर्ज्ञेया श्लोकमानेन निश्चिता ॥२९॥

इति श्रीस्वकीयगुरुपट्टावली समाप्ता ॥श्रीरस्तु । शुभमस्तु ।

4537. हलायुधनाममाला सटीका

OPENING :

वन्दे सरस्वतीं यस्याः प्रभावेन विपश्चिताम् ।
अनालोचितमप्यर्थमुपतिष्ठन्ति सूक्तयः ॥१॥
सतीष्वप्यन्यटीकासु मया तेन विरच्यते ।
तज्ज्ञाः विशेषं जानन्तु व्याख्याने कृतिनो मम ॥२॥
यद्यपि हलायुधोक्तौ व्याख्यां कर्त्तुं न शक्यते ।
तथाप्यहं प्रवक्ष्यामि बल्लनाम्ना यतो ध्रुवम् ॥३॥

× × ×

उदयगतो मार्तण्डस्तस्मात्प्रद्योतनो बुधः ।
समभूद्बुद्भटनामा ततः सोढो डल्लणबुधस्तदनु ॥१७॥
तस्मात् पृथ्वीपालस्त्रिभुवनपालस्ततोऽभवद् विबुधः ।
आजडनामा कुरुते टीकामेतां तदीयसूतम्(ताम्) ॥१८८॥
मत्तोपि मन्दमतय उत्पत्स्यन्ते यतो नराः ।
आनन्त्यादिह कालस्य तेषामर्थे परिश्रमः ॥१९॥

COLOPHON : इति महापण्डितडाल्लणिपृथ्वीपालसुतत्रिभुवनपालसूनुना श्रं विद्येन माथुरज्ञातीय कायस्थश्रीमदाजडेन कृतायां श्रीहलायुधनाममालाटीकायां अनेकार्थकाण्डं पञ्चमं व्याख्यातं समाप्तं चेति । अस्याः टीकाया निबन्धे ग्रंथसंख्याश्लोकाः ४५७० सप्तत्योपेतपञ्चशतानि चतुःसहस्राः । श्रीरस्तु ।

उदकानलटीके(कीटे)भ्यस्तस्करेभ्यस्तथैव च ।
रक्षणीयं प्रयत्नेन यतः कष्टेन लिख्यते ॥१॥

Post-Colophonic संवत् १६८६ वर्षे प्रथमवैशाखसुदित्रयोदश्यां तिथौ पं० अमरसुन्दरेणालेखि । भद्रं भूयात् सर्वदा सर्वदा शिष्यप्रशिष्यानाम् ।

4539. छन्दःकौस्तुभः 'प्रभा'टीकोपेतः

OPENING : श्रीगणेशाय नमः ।

अर्चितनयनानन्दो राधादामोदरो गुरुर्जीयात् ।
विवृणोमि यस्य कृपया छन्दःकौस्तुभमहं मितवाक् ॥१॥

अथ श्रीनयनानन्दपदारविन्दसेवासादितनिखिलशास्त्रार्थच्छन्दोविद्वृन्दवन्द्यः श्री राधादामोदराभिधाख्यः कान्यकुब्जविप्रवंशावतंसो महत्तमः कविश्छन्दो(न्दः)कौस्तुभं नाम छन्दःशास्त्रं प्रणयन्सर्वछन्दःप्रगेयचरितं श्रीकृष्णं प्रणमति—छन्दोभिरिति ।

छन्दोभिर्विततार्ङ्गैः कवयो यस्यानुकीर्त्तयन्ति गुणान् ।
स जयति गोकुलवनिताजितान्तरः श्यामसुन्दरो भगवान् ॥१॥

CLOSING & COLOPHON(w.)

द्विजकुलतिलकः श्रीमान् राधादामोदरो हरेः प्रेष्टः ।
स्वर्णैः सूत्रैर्ग्रंथितं छन्दःकौस्तुभमिमं व्यतनोत् ॥१४॥
वेदर्त्तुपक्षसंख्याताश्छन्दसां व्यक्तयोऽत्र याः ।
लिखिताः सन्ति ताः सन्तः कलयन्तु कृपाकुलाः ॥१५॥

इति श्रीछन्दःकौस्तुभे द्विजेन्द्रराधादामोदरदासकृते मात्राप्रस्तारो नवमी प्रभा

(ct.)

श्रीराधादामोदरशिष्यो विद्याभूषणो नाम्ना ।
छन्दःकौस्तुभशास्त्रे भाष्यमिदं सम्प्रति व्यदधात् ॥१॥

इति श्रीविद्याभूषणविरचिते छन्दःकौस्तुभभाष्ये मात्राप्रस्तारविवरणं नाम नवमी प्रभा समाप्ता ॥६॥

अवशिष्टानां छंदसां लक्षणानि पञ्चदश—

नगणसगणांकितो जननगुरुसंयुतः

भवति किल गुच्छको व(द)शयतिविभूषितः ॥१॥

× × ×

एतानि प्राकृतपिंगलानुसारीणि दुर्गेश्वरभट्टेन विरचितानि बोध्यानि ॥४४॥

छन्दःकौस्तुभमूलश्लोकसंख्या २५०। टीकाश्लोकसंख्या ७५०।

Post-Colophonic लिखितं गोस्वामिना बलदेवेन स्वात्मार्थं परमार्थं वा। संवत् १६०६ मिति पौषकृष्ण ५ बुधवासरे। शुभं श्रीः।

4540. छन्दःपीयूषम्

OPENING: श्रीगणेशाय नमः।

न्यायव्याकरणादिशास्त्रमखिलं संक्षुण्णमेवाऽस्ति हि,

प्रायः प्राक्तननूतनैः सुकृतिभिश्छन्दस्तु नैवेत्यतः।

श्रीकण्ठः स्मरणादवाप्य सुमतिं प्रीत्यै मया धीमतां,

तत्सूत्रं गुरु तत्कृतं लघु पुनस्तस्याऽथ सारं ब्रुवे ॥१॥

सालङ्कारगुणं विदोषमपि यच्छब्दार्थयुग्मं बुधा-

स्तत्काव्यं यशआद्यनेकफलकं कार्यं मतं धीमताम्।

छन्दःशास्त्रनिबन्धना खलु भवेत्तत्रोपयुक्ता यति-

च्छन्दोभंगविहीनवाक्यरचनानेकप्रकारप्रथा ॥२॥

× × ×

ज्ञातादानदयादमानिजनिजाभिप्रायसाहायकात्,

प्राजापत्यवरैर्नरासुरसुरैः स्रष्टुर्दमात्रोक्तितः।

तस्मात्स्वाशयपाशवर्त्तिनि जने कस्मै किमाख्यायतां,

बालक्रीडनतो जगज्जनयिता तुष्येन्मनुष्येषु कः ॥५॥

पूर्वाचार्यकृतच्छन्दःशास्त्रेणापरितुष्यन्मिश्रजगन्नाथस्तत्सूत्राणि प्राणैषीत्। तत्रेदमादिमं शास्त्रारम्भसूत्रं प्रेक्षावतः प्रवर्त्तयितुं। अथ छन्दोऽनुशासनम्।

CLOSING: शिष्टप्रयुक्तं यदतिप्रसिद्धं छन्दश्च वृत्तं च तदुक्तमत्र।

ग्रन्थस्य भीत्या बहुविस्तरस्य कृतो हि सोऽन्यत्र तदिच्छतुष्टयै ॥१॥

श्रीरामं तनयं यमिष्टविनयं विद्याधरस्यात्मजा-

ल्लेभे श्रीहरिकृष्णदेवदुहिता साध्वी सुभद्राभिधा।

गोपालीदयितेन तेन हि जगन्नाथेन संलोहिता-

च्छन्दःशास्त्रमहाम्बुधेर्मतिमता पीयूषमेतद्वृतम् ॥२॥

× × +

ये तस्मिन्नपि नीललोहितपुरे संसत्सु संख्यावतां,
श्रीमद्बुद्धिमदाख्ययाखिलविदो भूतार्थया विश्रुताः ।
यत्पादाम्बुजदर्शनादमलधीर्निस्तीर्णमोहार्णवो
निस्त्रैगुण्यसुनिष्ठितश्च सततं तेभ्यो गुरुभ्यो नमः ॥४॥

\+ × ×

जीवाख्या प्रकृतिः परा निगदिता यस्यापरा चाष्टधा
खं वायुर्ज्वलनो जलं क्षितिरहंकारो मनो धीरिति ।
यो वेद्यो निगमैः क्षराक्षरपरो वेदान्तकृद्वेदवि-
त्तस्य श्रीपुरुषोत्तमस्य करुणामालोचयामोऽनिशम् ॥६॥

COLOPHON इति श्रीमिश्रजगन्नाथकृतच्छन्दःपीयूषे वृत्तनिरूपणश्चतुर्थोऽध्यायः ।४। समाप्तोऽयं ग्रन्थः ।

Post-Colophonic संवत् १६०६ माघकृष्ण ७ सौमवासरे लिखित वृन्दावनक्षेत्रे आनन्दघट्टे । राम

4542. छन्दःसूत्रम् 'मिताक्षरा' टीकासहितम्

OPENING: ············उपलक्षणतापक्षमाश्रित्य जातिसंकरेष्युपजातिस्वीकारस्य वक्ष्यमाण-त्वेनाक्षरच्छन्दोऽर्द्धसमं विषमं च कल्पनीयं शिष्टप्रयोगानुरोधात् । पदचतुरूर्ध्वं च विषममिति द्रष्टव्यम् । तच्चाक्षरच्छन्द एवेति वक्ष्यामः । प्रकृतमनुसरामः । गायत्री ।२। एषोऽधिकार अष्टादशसूत्र्याः ।

CLOSING : यत्युपदेशस्त्वत्रानुपादे यो भवति नजावित्युदाहरणे दोषा न दोषा ननु भावात् अरुणकरोद्गम एष वर्तत इति चतुरुदाहरणेन स्पष्टमेव विरुद्धः । न चैवं पञ्चमे यतिरिति भ्रमितव्यम् । अलिरपि चुम्बति मालतीं मुहुः इति मञ्जर्युदाहरणे तद-भावात् ।

COLOPHON : इति मिश्रजगन्नाथकृतायां मिताक्षरायां षष्ठोऽध्यायः ।

4544. पिङ्गलनागछन्दः

OPENING : श्रीगणेशाय नमः । ओं नमोऽनन्ताय ।
जो विविधमत्तसाअरपारं पत्तो विमलमइहेलं ।
पढमं भासतरंडो णाउ सो पिंगलो जयइ ॥१॥
दीहो संजुत्तपरो बिंदुजुअं पालिअं अ चरणंते ।
सगुरु वंकदुमत्तो अण्णो लहु होइ सुद्ध एवक अलो ॥२॥

CLOSING : साणरा— सिरिकामपभिदिसाए तर अंतधरि पिंगल पभणइ सव्वो ।
चउ आलि सरूअउ बुहजन जाणउ पुहुवि पआसउ कव्वो ।
एवो अम्मलपुरवो स आर पुट्ठिम्मि बेवि वण्णाइ
कव्वत पंचम अक्खर दह वण्णा पाउए णत्थि ।
रेहो तहवि विसग्गो पिंगलआरेण एरेशं भणिअं ।

तं पाउए·········निचलइ जइ सूरो पच्छिमि पुगइ ।
पिअ पिंगलकलिए वस्स·····················

COLOPHON : इति प्राकृत-प्राकृतापभ्रंसभाषाविरचितं तैर्यमुक्तपण्डितकृतं पिंगलणागछंदोमूलं छन्दः समाप्तम् ।

4554. वृत्तरत्नाकरः 'ललिताक्षरा'टीकासहितः

OPENING: ओं नमः ।

यत्पादाग्रनखांशुराजरुणा नम्रालिके राजिते,
तत्कालागतसम्पदः पदततिः सद्यावकांका किल ।
तं नत्वा जयमंगलैकवसतिं संकल्पकल्पद्रुमं,
श्रीमत्पार्श्वजिनेश्वरं मदगजं मोहांह्रिपोन्मूलने ॥१॥
गुरोः प्रसादादधिगम्य वृत्तरत्नाकरच्छन्दस उद्यमेन ।
सारं मया किञ्चिदथास्य वृत्तिर्विधीयते मुग्धसुबोधहेतोः ॥२॥
मयाऽत्र शास्त्रान्तरदर्शनेन प्रोद्भूतग्रन्थार्थविशेषबोधात् ।
व्याख्यायते केवलमेव सूत्रं पुरातनोदाहरणावली तु ॥३॥

CLOSING : वादिश्रीदेवसूरेर्गणगगनविधोर्बिभ्रतः शारदाया
नाम प्रत्यक्षपूर्वं सुजयपदभृतो मंगलाह्वस्य सूरेः ।
पादद्वन्द्वारविन्दे बुधमधुपहिते भृङ्गभृङ्गि दधानो
वृत्तिं सोमाभिरामामकृत कृतिमतां वृत्तरत्नाकरस्य ॥१॥

× × ×

श्रीविक्रमनृपकाले नन्दकरकृपीटयोनिशशिसंख्ये ।
समजनि रजोत्सवदिने वृत्तिरियं मुग्धबोधकरी ॥४॥
सर्वाग्रन्थाङ्को रुद्रमितिशतानि नवतियुक्तानि ।
अत्रानुष्टुप्गणनायोगाज्जातानि किञ्चिदधिकानि ॥५॥

COLOPHON सम्पूर्णा चेयं पण्डितसोमचन्द्रकृता वृत्तरत्नाकरच्छन्दोवृत्तिः । मूलराहित्येन एकादशशतानि नवतियुक्तानि । मूलं तु षट्त्रिंशदुत्तरशतम् । एवं सभाष्य ग्रन्थ १३२६ मूल १३६ भाष्यग्रंथाग्रं १५०० । शुभं भवतु ।

Post-Colophonic संवत् १५८२ वर्षे माघ शुदि ११······लक्षतं । शुभं भवतु ।

4556 वृत्तरत्नाकरः 'सेतु' टीकासहितः

OPENING : श्रीगणेशाय नमः । श्रीभास्करं नमस्कुर्वे ।

प्रस्फुरन्मधुपचुम्बितपद्मापंकजातजनिपंकजनीयम् ।
बुध्यते किल जडोऽपि च यस्मात् सारुणं तदिह धाम नमामः ॥१॥

श्रीगुरून् पितरौ चापि नत्वा भास्करशर्मणा ।
वृत्तरत्नाकरे सेतुर्यथामति विरच्यते ॥२॥

CLOSING : त्र्यम्बकेश्वरपुरीकृतवासादग्निहोत्रिकुलनि (नी) रधिचन्द्रात् ।
पुण्यपूर्वपुरुषोत्तमभट्टादुद्बभूव सुकृती हरिभट्टः ॥१॥

वेदवाक्यनिचयावचयेन प्रेक्षितो विधिरिवेह बुधौघैः ।
लोकगीतविमलायतकीर्त्तिः सोऽपि सज्जनमणिर्जयति स्म ॥२॥

तस्मादुद्भूतकीर्त्तेः कृतसुकृतभरान्मन्त्रतन्त्रस्वतन्त्रः
साधूनामग्रगण्यो गददलनविधौ मानवानां शरण्यः ।
काशीक्षेत्राधिवासी हृतकठिनमहच्छत्रुषड्वर्गदम्भः
श्रीमानापाजिभट्टः सुरयजनरतः शुद्धधीराविरासीत् ॥३॥

सेतुस्तत्तनयेन शैवनगरे सद्वृत्तरत्नाकरे,
नेतुं भास्करशर्मणा विरचितः पारं बुधानां गणम् ।
तेनानम्रसुरासुरेन्द्रनिकरव्यालोलमौलिस्खल-
च्चञ्चद्रत्नमरीचिरञ्जितपदो देवो रविः प्रीयताम् ॥४॥

तरीतुमचरीकरं यदिह वृत्तरत्नाकरं,
महीसुमनसामहं मननहेतुसेतुं जडः ।
हरेरिव महोदधौ कपिबद्धसेतौ स्फुर-
त्ययन्तु महिमा गुरोश्चरमोः(मः) समुज्जृंभते ॥५॥

अक्षिवह्निहयभूमितवर्षे सद्वसन्तसमये मधुशुक्ले ।
आगतः प्रतिपदीह समाप्ति सेतुरेष बुधसंधमुदेऽस्तु ॥६॥

COLOPHON : इति श्रीमदग्निहोत्रिकुलतिलकायमानश्रीमदापाजिभट्टसूनुभास्करविरचितो वृत्त-रत्नाकरः समाप्तिमगात् ।

Post-Colophonic संवत् १८१३ वर्षे मिती वैशाख वदि ६ दिने पूर्णम् ।

दशरथात्मजपादसरोरुहं विखनसार्पितपुष्पसमूहकम् ।
हरसुरेन्द्रनिषेवितमादरान् मम मुदे भवतां भवतापहम् ॥१॥

एषा पुस्तिका सम्पूर्णं भवतु । श्री ।

4558. वृत्तरत्नाकरः 'सेतु' टीकासहितः

OPENING : and Closing according to 4556

COLOPHON : इति श्रीमदग्निहोत्रिकुलतिलकायमान—श्रीमद्दाया(पा)जिभट्टसूनूभास्करविरचितो वृत्तरत्नाकरे सेतुः समाप्तः ।

Post-Colophonic : लिखितं विद्यार्थी कन्हैयारामेण श्रीगुरुभ्योऽर्थः । मिती माघ सुदी १ रविवारः । संवत् १९०३ ।

4559. वृत्तरत्नाकरः सटीकः

OPENING: श्रों नमः शिवाय ।

देहावलम्बितव्यालं नत्वा सुरगणस्तुतम् ।
गणेशं क्रियते वृत्ति [ं] वृत्तरत्नाकराश्रया ॥१॥

CLOSING: इति श्रीकण्ठविरचितायां वृत्तरत्नाकरछन्दोवृत्तावर्द्धसमवृत्ताध्यायश्चतुर्थः ॥
(f. 15 a)

(f. 15 b) [प्रथममिति] प्रथमं तुर्यं चरमं चरणपदं पश्चिमपादस्थानं यदि अधिवसति । अवसितौ अवसाने गुरुयुग्मं य............।

4560. वृत्तरत्नाकरः 'सुगमा' वृत्तिसहितः

OPENING: श्रीमदिष्टदेवो जयति ।

इष्टदेवं गुरुं नत्वा गणिः समयसुन्दरः ।
वृत्तरत्नाकरछन्दोव्याख्यानं कुरुते स्फुटम् ॥१॥
वृत्तयो बह्वस्सन्ति पुरातन्योऽस्य छन्दसः ।
परं मयातिसुगमा व्याख्या तस्य विधीयते ॥२॥

CLOSING: वृत्तरत्नाकरे वृत्तिं गणिः समयसुन्दरः ।
षष्ठाध्यायसम्बन्धा पूर्णा चक्रे प्रयत्नतः ॥१॥
संवति विधिमुखनिधिरसशशिसंख्ये दीपपर्वदिवसे च ।
जालोरनामनगरे लूणिया-फसलापितस्थाने ॥२॥
श्रीमत्खरतरे गच्छे श्रीजिनचन्द्रसूरयः ।
तेषां सकलचन्द्राख्यो विनेयः प्रथमोऽभवत् ॥३॥
तच्छिष्य-समयसुन्दर एतां वृत्तिं चकार सुगमतराम् ।
श्रीजिनसागरसूरौ प्रवरे गच्छाधिराजेऽस्मिन् ॥४॥
यः कोऽपि मत्सरी मूढः प्रशस्ति न लिखिष्यति ।
स लोके लप्स (प्स्य) ते निन्दां कुर्णिर्भावि परत्र च ॥५॥

COLOPHON इति श्रीसमयसुन्दरोपाध्यायविरचिता वृत्तरत्नाकरसुगमवृत्तिः सम्पूर्णा ।

Post-Colophonic संवत् १७५४ वर्षे चैत्रसुदि एकादश्यां दिने लिखिता प्रतिरियं । श्रीविक्रमपुरमध्ये । श्रीरस्तु । कल्याणमस्तु ।

[In a different handwriting]

सुरबाणपर्वतैकेऽब्दे चैत्रिके विशदे बुधे ।
एकादश्यां तिथौ रात्रौ व्यलेखि विक्रमे पुरे ॥१॥
भूतनाथप्रसादेन शर्म्मेशेन लिपीकृतम् ।
कल्याणमस्तु श्रेयोऽस्तु विजयोऽस्तु शमस्तु च ।
पुस्तिकेयं वदत्येवाऽविघ्नमस्तु प्रजासु च ॥२॥श्री॥

4563. वृत्तरत्नाकरः सटिप्पणः

OPENING श्रों नमो श्रीवीतरागाय नमः ।

नत्वा वीरं करिष्येऽहं समासान्वयटिप्पनम् ।
वृत्तरत्नाकराख्यस्य छन्दसः सुगमं मुदा ॥१॥

COLOPHON : इति वाचनाचार्यश्रीक्षेमहंसगणिविरचिते वृत्तरत्नाकराख्यस्य छन्दसः समासान्वय-टिप्पणके षट्प्रत्ययाध्यायः षष्ठः समाप्तः । शुभं भवतु । मंगलमस्तु ।

4564. वृत्तरत्नाकरः सटिप्पणः

OPENING सुख सं० सुखं मोक्षलक्षणं । सन्तानः पुत्रपौत्रादिः । सिद्धयोऽणिमादयस्तदर्थं । नत्वा प्रणम्य । ग्रन्थस्य सौभाग्यहेतवे गौरीग्रहणं । निर्विघ्नाय विनायकग्रहणम् । लोकः सप्तभवनात्मकः तस्य शं सुखं करोतीति तथा ॥१॥

COLOPHON इति वृत्तरत्नाकरच्छन्दः सम्पूर्णम् ।

Post-Colophonic मु० देवसुन्दरलिखितम् ।

4565. वृत्तरत्नाकरो बालावबोधसहितः

OPENING: श्रों श्रीसरस्वत्यर्कविघ्नराजेभ्यो नमः ।

म्यरस्तजभ्नगैर्लान्तैः सकलैर्वर्णसंश्रितैः ।
संस्तुतं सुरसिद्धाद्यैस्तं स्तुवे नाभिनन्दनम् ।-१॥

श्रनल्पयतिशोभिते खरतराभिधाने गणे,
मते जगति विश्रुते बहुलपुण्यभागाश्रिते ।
स्फुरन्मकरकेतनप्रबलरोप(ष)दर्पच्छिदो,
बभूवुरमितौजसः सुजिनभद्रसूरीश्वराः ॥२॥

तदन्वये वादिमदान्धसिन्धुरप्रदावणैकप्रबलैणनाथाः ।
निरंकसम्पूर्णशशांककान्तयशःप्रपूर्णाखिलभूमिभागाः ॥३॥
जयन्ति भाग्यैकनिवासभूमयः क्षितीश्वराराधितपादपङ्कजाः ।
चतुर्विधश्रीश्रमणेज्यसंघक्षेमङ्कराः श्रीजिनचन्द्रसूरयः ॥४॥
प्रसादमासाद्य समस्तविद्यापारंगमानाममलद्युतीनाम् ।
तेषां गुरूणां स्मरकंकपत्र-त्रपाकराणां सुभगाकराणाम् ॥५॥
श्रीवृत्तरत्नाकरनामधेयसच्छन्दसो बालकबोधनं हितम् ।
श्रीवाचनाचार्यपदप्रतिष्ठितः करोमि भव्यं किल मेरुसुन्दरः ॥६॥

CLOSING इति श्रीखरतरगच्छे वा० मेरुसुन्दरगणिविरचिते वृत्तरत्नाकरछन्दोबालावबोधे मात्रावृत्ताध्यायो द्वितीयः ।

× × ×

म्गौ गिति पंक्तिः। यत्र भगणो द्वौ गुरू भवतः तद्वृत्तं पंक्तिर्नाम । जिहां भगण भनइ बि गुरु हुइ तं वृत्त कन्या नाम । सुप्रतिष्ठा जातिः ।छ।

4575. श्रुतबोधः 'सुबोधिनी'टीकायुतः

OPENING : श्रीगणेशाय नमः ।

विघ्नहरं गौरिसुतं करुणाब्धिं गजमुखं गणेशं ननु सुप्ततिमुदारं वन्दे । दुर्म्मति-नाशाय गुरुकृपया कविना श्रुतबोधमिदंऽतिपतप्रतिकांयि निचितकान्तं निर्वृतिमयीं सुबुद्धि सुतनुं खलु कालिदासेन ताल्लम्बोदरं नमस्कृत्य व्याख्या क्रियते । 'छन्दसां-लक्षणम्' ।

COLOPHON इति श्रीसमस्तनृपतिशिरोमणिरञ्जितपादपीठमाणि[क्यमल्ल]कारिता श्रीमनोह-रशर्म्मकृता श्रुतबोधटीकासुबोधिनी समाप्ताः ।

4587. काव्यप्रकाशः, 'आदर्श' टीकान्वितः

OPENING : श्रीगणेशाय नमः ।

मुखैश्चतुर्भिः स्तुवते विधात्रे स्तोत्रे श्रुतीनां च चतुष्टयाय ।
भुजैश्चतुर्भिश्चतुरोऽर्थवर्गा (:) त्रयो ददानाय चतुर्भुजाय ॥१॥

सुकुमारान् राजकुमारान् स्वादुकाव्यप्रवृत्तिद्वारा गहने शास्त्रान्तरे प्रवर्तयितुमग्नि-पुराणादुद्धृत्यकाव्यरसास्वादकारणमलंकारशास्त्रं कारिकाभिः संक्षिप्य भरतमुनिः प्रणीतवान् ।

COLOPHON : इति श्रीमहेश्वरन्यायालङ्कारभट्टाचार्यकृते काव्यप्रकाशादर्शे दशमोऽर्थालङ्कार-प्रतिबिम्बः समाप्तः ।

4589. काव्यप्रकाश-'विस्तारिका'-टीका

OPENING : श्रीरघुपतये नमः । श्रीगुरवे नमः । श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।

श्रीपरमात्मने नमः । ओं नमः । क्षिप्रप्रसाधनविनायकाय नमः ।

प्रियायाः पद्मायाः प्रणयकुपितायाः स्तुतिपरः,
प्रसादं निर्मित्सुर्जलधिजनिवाणी परिवृढः ।
परस्याः कौटिल्यात्कटुनि वचसि प्रोद्यति ततः,
प्रदीप्तायां तस्यां जयति विनमद्वक्त्रकमलः ॥१॥

कार्यादर्यैरिव नो भवद्भिन्नवेति हेलाकृतिनः कृतो नः ।
निवारितान्तःकलुषः किशोरतां त दधत् कलभृन्न पुनः पुरातनः ॥२॥

न्यायाचार्यमनङ्गीकृतपरपक्षं बहुतमीशानम् ।
गुरुमिह नत्वा काव्यप्रकाशविस्तारिकां तनुमः ॥३॥

प्रखलद्रोणजबाणैः क्षतविक्षत-मुत्तरोदरगम् ।
रक्षतु परीक्षितं मे वचनं विबुधसुदर्शनेनाशु ॥४॥

CLOSING (f. 13) इति परमानन्दचक्रवर्तिकृतौ काव्यप्रकाशविस्तारिकायां प्रथम उल्लासः ।

(f. 138) अन्येऽपीति । या धर्म्यमानोस्तनयापि शीतत्वैः, स्वसायमस्यापि जनस्य जीवनैः । कृष्णाऽपि शुद्धैरधिकं विधायिभिर्विहन्तु महांसि जलैः पटीयसी । इत्यत्र प्रतिपाद्य विरोधालंकारस्य सामानाधिकरण्यप्रतिभासमानविरुद्धद्वयमूलत्वादत्र प्रचण्डत्वादीनां वैयधिकरण्येनैव निर्द्दे-..............।

4592 कुवलयानन्दः

OPENING: श्रीगणेशाय नमः ।

अमरीकवरीभारभ्रमरीमुखरीकृतम् ।
दूरीकरोतु दुरितं गौरीचरणपंकजम् ॥१॥
परस्परतपःसंपत्फलायितपरस्परौ ।
प्रपञ्चमातापितरौ प्राञ्चौ जायापती स्तुमः ॥२॥

× × ×

अलंकारेषु बालानामवगाहनसिद्धये ।
ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः ॥४॥
येषां चन्द्रालोके दृश्यन्ते लक्ष्यलक्षणश्लोकाः ।
प्रायस्त एव तेषामितरेषां त्वभिनवा विरच्यन्ते ॥५॥

CLOSING: अमुं कुवलयानन्दमकरोदप्प[य्य]दीक्षितः ।
नियोगाद् वेंकटपतेर्निरुपाधिकृपानिधेः ॥
चन्द्रालोको विजयते शारदागमसम्भवः ।
हृद्यः कुवलयानन्दो यत्प्रसादादभूदयम् ॥

COLOPHON: इति श्रीमदद्वैतविद्याचार्यश्रीभरद्वाजकुलजलनिधिकौस्तुभश्रीरंगराजाध्वरीन्द्र-वरदसूनोरप्प[य्य]दीक्षितस्य कृतिः कुवलयानन्दः समाप्तः । शुभमस्तु ।

Post-Colophonic संवत् १७७३ आश्विनस्य सिते पक्षे द्विती(या)यां गुरोर्दिने ।
वेणीदत्तेन लिखितं कुवलयानन्दपुस्तकम् ॥

4597. चन्द्रालोकः 'चन्द्रालोकप्रकाशशारदागम' टीकासहितः

OPENING: श्रीमते रामानुजाय नमः ।

पृथ्वी पृथ्वीं न पद्भ्यां न च वहति नभस्तुङ्गतामुत्तमाङ्गात्,
पाणिप्रक्षेपयोग्यं दधति दश दिशः किञ्च नैवावकाशम् ।
कुर्यां किं क्वा नु कुर्यां त्रिपुरविजयिनस्ताण्डवे चिन्तयेत्थं,
व्यग्रः सर्गादिहेतुस्त्रिदशगणनुतः श्रेयसे भैरवोऽस्तु ॥१॥

CLOSING :

श्रीवीरभद्रदेवेन भूदेवामरशाखिना ।
यदा गर्भरत्नेन यत्नेनेदं विनिर्मितम् ॥१॥

लक्ष्मीर्वक्षसि कौस्तुभप्रणयिनो यावत्तथार्द्धांगता-
मङ्गीकृत्य पुरद्विषो गिरिसुता स्थेमानमालम्बते ।
यावद् वेदगिरः पुराणविषयस्तावद् भुवो मण्डले,
चन्द्रालोकविकाशमेष कुरुतां ग्रन्थोऽभिधा मोदयन् ॥२॥

श्रीवीरभद्रभूपतिलब्धनिदेशेन यत्नेन ।
चन्द्रालोकमयूख[:] दशमः स्पष्टार्थतां नीतः ॥

COLOPHON

इति श्रीरामचन्द्रदेवात्मजयुवराजश्रीवीरभद्रदेवादिष्ट-मिश्रबलभद्रात्मज-सकल शास्त्रारविदप्रद्योतनभट्टाचार्यविरचिते चन्द्रालोकप्रकाशे शरदागमे दशमो मयूखः समाप्तः ॥१०॥

Post-Colophonic

संवत् १८६६ मार्गशिरमासे शुभे शुक्लपक्षे तिथौ प्रतिपदि शनौ लिखितं शालिग्रामेण पुस्तकमिदं श्रीस्वामीजी नारायणाचार्यस्य शुभं भवतु कल्याणमारोग्यं सुखसम्पदः ।

4621. वाग्भटालङ्कारः सटीकः

OPENING :

ओं नमः ।

श्रियं दिशतु वो देवः श्रीनाभेयजिनः सदा ।
मोक्षमार्गं सदा ब्रूते यदागमपदावली ॥१॥

व्याख्या—श्रीनाभेयजिनो वो युष्मभ्यं श्रियं दिशतु ददातु । किंविशिष्टः श्रीनाभेयजिनः देवः दीव्यति क्रीडते पर··········पदे इति देवः । यस्य भगवतः आगमपदावली सिद्धान्तपदपरम्परा सतां सत्पुरुषाणां मोक्षमार्गं ब्रूते सिद्धेः पन्थानं वदति । अन्यापि पदावली मार्गं ब्रूते ॥१॥

CLOSING :

प्रत्यक्षाल्लिंगतो यत्र कालत्रितयवर्तिनः ।
लिंगिनो भवति ज्ञानमनुमानं तदुच्यते ॥३८॥

व्याख्या—············लिंगतो हेतोः अतीतानागतवर्तमानसालक्षणस्य कालत्रितयवर्तिनो लिंगिनो ज्ञानं भवति तदनुमानम् ॥३८॥

अतीतोदाहरणमाह—

नूनं नद्यस्तवाऽभूवन्नाभिषेकाम्भसा विभोः ।
अ···································

4622. वाग्भटालंकारः सटीकः

OPENING :

as no. 4621

CLOSING :

इत्याशंक्योत्तरमाह—अर्थेन येन काव्यं कृतीनां पण्डितानां मनस्सु प्रतिचमत्क-

रोति अत्यन्तं चमत्कारकं भवति स एवार्थः। तस्मिन् काव्ये हन्त इति हर्षे अनया एव दिशाऽनेनैव मदुक्तेन प्रकारेण अलंकारत्वेन अभ्यूह्यतां ज्ञायताम्। एतावता यत्र काव्ये योऽर्थः आश्चर्यकारी स तत्र अलंकारी। स तत्र अलंकारत्वेन ज्ञेयः।

COLOPHON : इति वाग्भटालंकारटीकायां चतुर्थः परिच्छेदः समाप्तः।

4623. वाग्भटालंकार-पदभञ्जिकावचूरिः

OPENING : नत्वा वागीश्वरीं देवीं कामितार्थप्रदायिनीम्।
वाग्भटाख्ये स्वलंकारे क्रियते पदभञ्जिका ॥१॥

CLOSING : अथ कविः समर्थयन्नाह—दोषैरुज्झितमित्यादि। सारस्वतं नाम सरस्वती दैवतमत्र विशेषं अहर्निशं ध्यायन्तु। कविस्रष्टारः कविरूपधातारः काव्यपुरुषं निष्पादयन्तु। काव्यपुरुषं किंविशिष्टं दोषैरनर्थकादिकैः रहितं तथा गुणगणैरौदार्यादिभिः सहितम्। चित्राद्यलंकारैश्चित्तचमत्कारकारिणं। केषां सतामुत्तमानां स्फुरद्रूपया गौडीयादिकया रीत्या सर्वतो युक्तं तैस्तैः। × × × × × अत्र सारस्वताध्यायिन इति शास्त्रप्रान्ते विसर्गदर्शनं न दोषकृत्, शब्दस्यैव मंगलरूपत्वात् ॥३२॥

COLOPHON : इति पञ्चमपरिच्छेदाऽवचूर्णिः। ग्रन्थाग्रं सूत्रेण ३०५। ग्रन्थाग्रं अवचूर्ण्याः १५००।

4624. वाग्भटालंकारः सटीकः

OPENING : ओं नमः। श्रीपरमात्मने नमः।

श्रीमान् श्रीआदिनाथः श्रियमिह दिशतु श्रेयसीं भूयसीं वो,
बिभ्राणः सौरभेयं हृदयमत (थ) शिवः शंकरं शंकराभः।
सेव्यो भूतैर्विभूत्या परिकलिततनुर्वर्णनीयो ह्यहीनै-
बिभ्रद् वर्णं सुवर्णं तुहिनशिखरिणो भाति यः कामजेता ॥१॥

प्रभावविभवावासं प्रतिभादानलक्षणम्।
स्पृशामि शिरसा सौरं गुरुपादरजःकणम् ॥२॥
बालानामवबोधाय स्वस्यार्थस्मरणाय च।
वाग्भटालंकृतेः कुर्वे व्याख्यां संक्षेपयुक्तितः ॥३॥

CLOSING (f. 11) इति खरतरगच्छे जिनवर्द्धनसूरिविरचितायां वाग्भटालंकारटीकायां द्वितीयः परिच्छेदः ॥२॥

(f. 47) इति श्रीवाग्भटालंकारटीकायां पञ्चमः परिच्छेदः। श्रीरामाय नमः। शुभमस्तु।

Post-Colophonic संवत् १५९४ वर्षे माघ वदि ९ गुरौ ज्योतिर्विद्वेणाकस्य सुतेन रामेण शिष्यपाठायालेखि।

शोधितव्यं बुधैः कूटं दयां कृत्वा ममोपरि।
प्रायो भवन्ति विद्वांसः परकार्याणि हिता हि वै ॥

4625. वाग्भटालंकारः सावचूरिः

OPENING: अर्हम् ।

आदौ स्वाभिमतदेवतास्तुतिं विघ्नोपशान्त्यर्थमाह—श्रियमिति । अन्यस्य । कस्यचित्पदानां चरणप्रतिबिम्बानां पंक्तिर्दृढा सती सतां मार्गं प्रकाशयतीत्युक्तिलेशः । यस्यागमपदानि सिद्धान्तवचनानि तेषामावलिः श्रेणिः ॥१॥

CLOSING: कविस्रष्टारः कल्पकालं काव्यपुरुषं स्वयं तु श्रुतिकट्वादिदोषरहितं तथा ओजप्रसादादिभिर्गुणैः श्रितं नानालंकारैरुपेतम् ॥३२॥

COLOPHON: इति पञ्चमपरिच्छेदावचूर्णिः समाप्ता । ।छ। शुभं भवतु श्रमणसंघस्य ।

4631. विदग्धमुखमण्डनं सटीकम्

OPENING: श्री गणेशाय नमः

ग्रन्थादौ धर्मदासनामा बौद्धाचार्य[:] विघ्नविघातार्थं इष्टदेवतास्तुतिमाह—सिद्धौषधानीति । शौद्धोदने[:] बौद्धदेवस्य प्रवचनानि चिरं जयन्ति । किं भूतानि प्रवचनानि निष्पन्नौषधानि भवस्य संसारस्य दुःखा एव गदाः रोगाः भवदुःखमहागदास्तेषां परमं प्रकृष्टं कर्णयोः रसायनानि परमकर्णरसायनं तानि परमकर्णरसायनानि पुण्यात्मनामिति । मनोमलानां चेतोमलानां प्रक्षालने एकसलिलानि प्रक्षालनैकसलिलानि ।

CLOSING: पूर्ण० । कामिनी कस्य स्वान्तं चित्तं एकान्ते रहसि मदनातुरं कन्दर्पाकुलं किं न करोति अपि तु करोत्येव । किं० पूर्णचन्द्रवन्मुखं यस्याः सा रम्या मनोज्ञा निर्मलाम्बरा निर्मलं उज्ज्वलं अम्बरं वस्त्रं यस्याः सा, पक्षे यामिनी रात्रिः । किं० पूर्णचन्द्र एव मुखं यस्या सा रम्या निर्मला निर्मलं अम्बरं आकाशं यस्याः सा कामिनी यामिनी । अत्र च्युतदत्ताक्षरं गुप्तं ज्ञेयम् ॥७६॥

COLOPHON: इति श्रीधर्मदासविरचिते विदग्धमुखमण्डने चतुर्थपरिच्छेदस्य अवचूरिः संपूर्णा ।

Post-Colophonic: लिखितं गुरजी शिवजीराम तत्पुत्रेण शिवनाथेन मिती वैशाख शुक्ल ८ रवौ संवत् १८३९ ।

4635. साहित्यरत्नाकरः

OPENING: श्रीमन्महागणपतये नमः ।

आलिंग्य गाढमुदरं पितुरर्द्धजाने-
रुत्संग्यवर्त्यवतु बालगजाननो नः ।
यः कुम्भयोर्गिरिसुताकुचपार्श्वभाजो-
स्तन्यं पिपासति गुहस्त्रिभिराननाब्जैः ॥१॥

× × ×

गोत्रे च तस्य समभूदभिजातवंशो,
वाराणसीत्युपपदेन भुवि प्रसिद्धः ।

तत्राऽभवन्बुधवरास्त्रिपुरारिसोम-
यज्वादयः शुभवपुःश्रुतवृत्तशीलाः ।।

× × ×

विधिवदनुष्ठितकर्मा धर्माख्यसुधीस्संस्फुरद्धर्मा ।
जनयांबभूव तनयान्नारायणपर्वतेशरामाख्यान् ।।

+ + +

तस्यानुजः पर्वतनाथसूरिरासीदशेषागमपारदृश्वा ।
एकात्म्यलीलापि तमारममाना षड्दर्शनीजन्मकृतां मुनीनाम् ।।

+ + +

यो वादेन जनार्दनाह्वयबुधं मध्ये विपश्चित्सभं,
जित्वाऽविन्दत वादिकेशर(रि)पदं प्रौढं तदीयं स्वयम् ।
मायावादिभयंकराख्यविरुदादर्यूर्जितादर्जितां
किं चोदंचयति स्म कीर्त्तिमतुलां प्रख्यापयन्वैष्णवम् ।।
आटोपोद्भटनाथधूर्जटिजटाकोटीरकोटीनटद्-
गंगातुंगतरंगरिंगणभरप्रस्पर्द्धिवाग्वैभवः ।
सोऽयं स्वप्रतिभादृषन्निकषणप्रोद्दीप्तषड्दर्शनीं,
रत्नस्रङ्मयकन्धरो यदनुजो रामाह्वयः पण्डितः ।।
तस्मात् पर्वतनाथसूरिजलधेः श्रीपल्लमाम्बावियद्-
गंगासंगजुषोर्लसद्गुणमणेर्यस्योदयश्चन्द्रवत् ।
सोऽहं धर्मसुधीर्गवां विलसितैः कर्त्तुं रसालंक्रिया-
संस्फूर्तिं समुदञ्चयेयमधुना साहित्यरत्नाकरम् ।।

CLOSING: इति श्रीमत्त्रिभुवनपवित्रहरितसगोत्रावतंस-वाराणसीवंशपद्माकरप्रभातभानुना पदवाक्यप्रमाणपारावारीणश्रीमन्महोपाध्यायस(प)र्वतनाथपण्डितमण्डलेश्वरसूनुना पल्लमाम्बागर्भरत्नाकरपारिजातेन निर्मलाचारपूतेन चतुर्दशविद्यास्थानसिद्धान्तरहस्यविज्ञानवता श्रीधर्मसंख्यावता विरचिते श्रीमद्रघुकुलतिलकयशोधनसारसारसुरभीकृते साहित्यरत्नाकरनामनि अलंकारशास्त्रे ग्रन्थारंभसमर्थनं नाम प्रथमस्तरंगः ।।१।।

+ + +

तत्र महाकुलीनता, यथा—
आवासः कथमस्मदादिवचसां वंशो रघूणां भवेद्,
यस्यासीत् प्रभवस्त्रिमूर्त्तितनुभृद्भानुस्त्रिवेदीमयः ।
यत्सम्भूतभगीरथस्य दुहि..................।

4637. अनूपसङ्गीतरत्नाकरः

OPENING: श्रीगुरुगणाधिपबटुकशारदाभ्यो नमः ।
श्रीमज्जनार्दनं नत्वा संगीतार्थफलप्रदम् ।
तन्यते भावभट्टेन रागालापनमञ्जरी ।।

CLOSING & COLOPHON

इति श्रीमद्राठोडकुलदिनकरमहाराजाधिराजश्रीकर्णसिंहात्मजजयश्रीविराजमान-चतुःसमुद्रमुद्रावच्छिन्नमेदिनीप्रतिपालनचतुरवदान्यताग्रेशनिर्जितचिन्तामणिखप्रतापत-पिताखिर्गधर्मावतारश्री ५ महाराजाधिराजश्रीमदनूपसिंहप्रमोदितश्रीमहोमहेन्द्रमौलि-मुकुटरत्नकिरणनीराजितचरणकमलश्रीसाहिजहांसभामंडनसंगीतराजजनार्द्दनभट्टाङ्गजानु-ष्टुप्चक्रवर्तिसंगीतराजभावभट्टविरचिते श्रीअनूपसंगीतरत्नाकरे रागाध्यायो द्वितीयः समाप्तः ॥२॥ छ।

4642. राजवल्लभ-वास्तुशास्त्रम्

OPENING :

श्रीगणेशाय नमः ।

आनन्दं वो गणेशार्कविष्णुगौरीमहेश्वराः ।
देवाः कुर्युः श्रियं सौख्यमारोग्यत्वं गृहे सदा ॥१॥

\+ \+ \+

स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदं,
जन्तूनां लपनं सुखास्पदमिदं शीताम्बुघर्मापहम् ।
वापीदेवगृहादिपुण्यमखिलं गेहात् समुत्पद्यते,
गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः ॥५॥

CLOSING :

श्रीमेदपाटे नृपकुम्भकर्णस्तदंघ्रिराजीवपरागसेवी ।
स मण्डनाख्यो भुवि सूत्रधारस्तेन कृतो भूपतिवल्लभोऽयम् ॥४३॥
गणपतिगुरुभक्त्या भारतीपादतुष्ट्या,
मुनिमतमिदमुक्तं वास्तुशास्त्रं सुवृत्तम् ।
गणितममितसारं शाकुनं सारभूतं,
भवतु चतुरयोग्यं विश्वकर्मप्रसादात् ॥४४॥

COLOPHON : इति श्रीवास्तुशास्त्रे राजवल्लभमण्डने शाकुनं लक्षणं नाम चतुर्दशमोऽध्यायः शुभमस्तु ।

Post-Colophonic संवत् १९०६ मासानां मासोत्तममासे पौषमासे शुक्लपक्षे एकादश्यां ११ भौम-वासरे शुभं भूयात् ॥छ ।

4643. विश्वकर्म-वास्तुशास्त्रम्

OPENING :

श्रीगणेशाय नमः ।

जयति वरदमूर्तिर्मङ्गलं मंगलानां,
जयति सकलवन्द्या भारती ब्रह्मरूपा ।
जयति भुवनमाता चिन्मयी मोक्षरूपा,
दिशतु मम महेशो वाङ्मयः शब्दरूपम् ॥१॥
आब्रह्मभुवना लोका गृहस्थाश्रममाश्रिताः ।
यतस्तस्माद् गृहारम्भप्रवेशसमयस्त्वहम् ॥२॥

प्रवक्ष्यामि मुनिश्रेष्ठ शृणुष्वेकाग्रमानसम्(सः) ।
यदुक्तं शम्भुना पूर्वं वास्तुशास्त्रं पुरातनम् ॥३॥
पराशर[:] प्राह बृहद्रथाय बृहद्रथः प्राह च विश्वकर्मणे ।
सुविश्वकर्मा जगतां हिताय, प्रोवाच शास्त्रं बहुभेदयुक्तम् ॥४॥

CLOSING :

स विश्वकर्मा जगतो हिताय[।]कथयत्पुनः ।
वासुदेवादिषु पुनर्भूलोके भक्तितोऽब्रवीत् ॥६३॥
इदं पवित्रं परमं रहस्यं यः पठेन्नरः ।
न स्यादवितथा वाणी स संसत्संवदाम्यहम् ॥६४॥
अथ स विमलविद्यो विश्वकर्मा महात्मा,
सकलगुणवरिष्ठः सर्वशास्त्रार्थवेत्ता ।
सकलसुरगणानां सूत्रधारः कृतात्मा,
भुवननिवसतां यच्छास्त्रमेतच्चकार ॥६५॥

COLOPHON : इति ब्रह्मोक्तविश्वकर्मप्रकाशे विश्वकर्मणोक्तवास्तुशास्त्रे त्रयोदशोध्यायः समाप्तः १३। शुभमस्तु॰ ।

4673. मदनमुकुटम्

OPENING :

ओं नमो मकरध्वजाय ।

तियलोयं कुसुमसिलीमुहेण जो जिणइं तणु विमुक्को वि ।
सो भीमरूवतवभंगकारिणो जयो पंचसरो ॥१ ।
सो जयउ मयणराओ अलिउलकुलबहुलपरियणो जस्स ।
मलयानिलमत्तगयंदसंठिओ कुसुमधयधरणो ॥२॥

CLOSING :

णासेण मइणेण विसिहण जुवं वह वइट्ठाणयाणं पि ।
घणकठिणपीणतुंगं सत्तादिणाभितरे णूणं ॥७७॥

COLOPHON

इय[मये]ण मउडे छट्टं परिच्छेयं सम्मत्ता ॥

4689. मल्लप्रकाशः

OPENING : (f. 13)

·········षितं बालबिल्वं सगुडनागरम् ।
हन्ति सर्वानतीसारान् ग्रहणीमतिदुस्तराम् ॥ इति पंचकषायः ।

CLOSING :

आसीद् योधपुरे पुरन्दरपुरी पूर्णार्थकामे पुरा,
गीर्वाणागमगानमानवगणागीतः स गांगेयवत् ।
गंगागोगुणपानदानरसिको राठोडराजो भुजः,
असद् (आसीद्) भूपशिरोमणिव्रजलसत्पादारविन्दं कृती ॥५॥
तत्पुत्रं पूर्णसत्रसुरसरिदमलांभः पवित्र···मित्र-
स्तेजोभिः प्रीतमित्रं मदनरसकलाकल्पनावान् कलत्रः ।

भूमीशो मल्लदेवो जगति विजयते वैरिभिः प्रार्थ्यसेव्यो,
दानाम्भःकुम्भरिक्तीकृतमिव जलधिभ्रान्तिसत्वाधिदेवः ॥६॥
तेनायुर्वेदरत्नाकरबहुमथनात्कारितो दृष्टयोगो
ग्रन्थोऽयं भूरियुक्त्या कुलगदिगदहृत्मल्लदेवः प्रकाशः।
यं दृष्ट्वा वैद्यविद्याकुलनिजमतियुक्स्वस्थवद्वैद्यपुत्रो,
राजानं वा जनं वा मुनिजनपथि वा वीतरोगं करोतु ॥७॥

× × ×

निर्मथ्य मल्लदेवेन सदायुर्वेदसागरम्।
मल्लप्रकाशनामाऽयं कारितः संग्रहः शुभः ॥१०॥

COLOPHON : इति मल्लप्रकाश नाम लोकनाथविरचितं सम्पूर्णोऽभवद् ग्रन्थः।

Post-Colophonic संवत् १८८६ मिति जेष्टसुदि २ लिपिकृतं देवदत्त चिरंजीव शंकर-रामरत्न-रामकंवार-राधावलभ पठन अर्थं।

4705. रत्नसागरः

OPENING (f. 2)

एलाकुष्टविडंगानि शताह्वा चित्रकं वला।
दन्ती रसाञ्जनं चेति लेपः कुष्ठविनाशन[:] ॥
योगतरंगिण्याम्—विडंगैडगजाकुष्टनिशासिंधूत्थसर्षपैः।
धान्याम्बुपिष्टैर्लेपोऽयं दद्रुकुष्ठविनाशनः ॥

CLOSING

खसफलशुण्ठीक्वाथः षोडशशेषे गुडेन निशि पीतः।
कुरुते रतेन पुंसां रेतः पतनं विनाम्लेन ॥
चटकाण्डं तु संगृह्य नवनीतेन पेषयेत्।
तेन प्रलिप्तपादस्य शुक्रस्तम्भः प्रजा······

4707: लक्ष्मणोत्सवः

OPENING:

श्रीधन्वन्तराय नमः।

प्रणतविबुधमौलिस्फाररत्नांशुगर्भा-
श्चरणनखरभासो भाति यो भक्तिभाजाम्।
दधदभिमतसिद्ध्यै कल्पवल्लीरिवाग्र्याः,
स जयति गजवक्त्रो दाननीरप्रसक्तः ॥१॥

× × ×

नमन्महीभृद्भुजमौलिमालासवलत्परागारुणपादपद्मे।
तस्मिन् क्षितौ राज्यपदं दधाने ग्रन्थः कृतः श्रीमहमद्दखानैः ॥६॥
आस्ते पुरी सर्वजगत्प्रसिद्धा निवासलोभादिव यत्र विष्णुः।
जन्माददे सर्वसती विहाय त्रैलोक्यवन्द्या मथुरेति नाम्ना ॥७॥

तस्यामभूत्संकलकार्यिथयाभिरामः कायस्थवंशसरसीरुहकाननार्कः ।
कामाधिकोत्तमधनान्वितिमार्गणेषा भास्वद्गुणौघमहिमोदयनागनामः ॥८॥

\+ + +

प्राप्तोदयो गजपतिप्रवरोदयादेः,
स्फूर्जत्प्रभावमहिमामरसिंहभानुः ।
उत्साद्यन्नपि समस्तमनःप्रवृत्ति,
चित्रं न जातु जनतापमयं तनोति ॥२३॥

\+ + +

येनाशेषशकोत्तमात्प्रविलसत्प्रौढप्रतापानल-
ज्वालालीढसमस्तवैरिनिवहारण्यात्पदं प्रोत्तम् ।
लब्ध्वा श्रीमंहमद्खानु[सु]नृपात्प्रत्यर्थकान्ताननो-
दञ्चच्चन्द्रपराभवाय सततं शौर्येण सूर्यायितम् ॥२५॥
सौन्दर्येण मनोभवो न हि यतो नो संयमिद्वेषण-
श्चन्द्रो नैव यतः कलंकरहितो दस्रो[ऽपि]नैको यतः ।
भूमौ संचरतीति वामनयनाचेतोहरं न क्षमा,
वक्तुं यं कवयोऽपि स क्षितितले प्रोद्भासते लक्ष्मणः ॥२६॥

\+ + +

दृष्ट्वा सुश्रुत-वाग्भटाऽत्रि-चरकाचार्योदिताः संहिता
भेडाचार्यमतं विलोक्य बहुसः···नित्यनाथादिभिः ।
प्रोक्तं चापि विविच्य सर्वमखिलं सारं गृहीत्वा ततो
ग्रन्थं नाम सुलक्षणोत्सवमिमं ब्रूते सुधी लक्ष्मणः ॥३०॥

\+ + +

सन्त्येव निर्मलगुणाः सदसद्विवेकं
कुर्वन्ति ये परगुणान्प्रथयन्ति सन्तः ।
सेत्ये च (सन्त्येव)दुग्धजलभेदविधानदक्षा-
स्तम्वन्ति मानसगुणानपि शुभ्रपक्षाः ॥३२॥

इति श्रीमाथुरकायस्थवंशावतंसामरसिंहात्मज-श्रीलक्ष्मणोत्सवे ग्रंथे वंशवर्णनो नाम प्रथमोल्लासः ।

CLOSING :

औदार्यगाम्भीर्यविवेकधैर्यदाक्षिण्यशीलादिगुणैककेमेः ।
ज्येष्ठस्तनूजोऽमरसिंघनाम्ना सर्वातिदुःपारसमुद्रसेतोः ॥१॥
कायस्थमाथुरकुलान्वितकल्पवृक्षः,
श्रीलक्ष्मणो(णः)सकललोकहितैकदक्षः ।

विद्युन्मुखेन कुरुते स्म शुभं निबन्धं,
संतं[:]समीकुरुत तत्र सदस्त्यबन्धः ॥२॥ ।युग्मम्

+ + +

रसव्योमशरेन्द्वंके ख्याते विक्रमवत्सरे ।
माघे शुक्ले वरि दिने पूर्णो ग्रन्थो भवेद् बुधे ॥६॥

× + ×

यावत्क्षीरनिधौ नीरं दिवभानुनिशाकरौ ।
क्षोणी मेरुकुलं नाव लक्ष्मणस्येहनं वतात् ॥८॥

COLOPHON इति श्रीमाथुरकायस्थवंशावतंसामरसिंघात्मजश्रीलक्ष्मणनामप्रथिते लक्ष्मणोत्सवे ग्रन्थे मिश्रवर्गकथनं नाम चतुःषष्टितमोल्लासः ॥६४॥ इति श्रीलक्ष्मणोत्सव-ग्रंथे समाप्तः ।

4709. वैद्यरत्नम्

OPENING : श्रीधन्वन्तराय नमः ।

नारदादिमुनिवृन्दसेविता पारदादपि नितान्तमुज्ज्वला ।
शारदामृतमरीचिभानना शारदा वसतु मे हृदम्बुजे ॥१॥
ये वैद्या अलसाः सन्ति बृहद्ग्रन्थावलोकने ।
तेषां कृतेऽतिसंक्षिप्तं वैद्यरत्नं वितन्यते ॥२॥

CLOSING : माषटंकाक्षबिल्वानि कुडवः प्रस्थमाढकम् ।
राशिद्रोणिखारिकेति यथोत्तरचतुर्गुणाः ॥

COLOPHON इति श्रीगोस्वामिशिवान्दभट्टविरचिते वैद्यरत्ने सप्तमः प्रकाशः संपूर्णः । ग्रंथ-संख्या श्लो० ९७५ ।७।

4727. शार्ङ्गधरसंहिता-पूर्वखण्डः, 'गूढार्थदीपिका'-टीकान्वितः

OPENING: द्वितीयखण्डे आदौ स्वरसादीनामभिधानात् स्वरसादीनाह—

अथात्र स्वरसः कल्पः क्वाथश्च हिमफाण्टकौ ।
ज्ञेया कषायाः पञ्चैते लघवः स्युर्यथोत्तरम् ॥

अथेति रोगगणनानन्तरं स्वरसः कल्कः क्वाथः हिमः फांटः एते पञ्च कषाया ज्ञेयास्ते च यथोत्तारं लघवः स्युरिति योजना । यथोत्तारमिति स्वरसात् कल्को लघुः एवं उत्तारं ज्ञेयम् । +++ यद्वा कषायाः कषायनामानः संज्ञापरोऽयं कषायशब्दः ।

CLOSING & COLOPHON : इति प्रसिद्धा गणिता ये किलोपद्रवा भुवि ।
असंख्याश्चापरे धातुमूलजीवादिसम्भवाः ॥२॥

इति श्रीदामोदरसूनु-शार्ङ्गधरेण विरचितायां निदानरो[ग]गणनाध्यायः ७ । इति पूर्वखण्डः ।

समाप्तजन्या इति ये प्रसिद्धोपद्रवा भुवि सन्ति ते मया गणिताः, अपरे असंख्या धातुमूलजीवादिसम्भवास्तेऽपि तथा विस्तरतः विस्तरत्वान्मया नोक्ताः। उपद्रवा देहस्योपद्रवकर्तारः।

इति श्रीकाशीरामभारद्वाजीसारस्वतविरचितायां शार्ङ्गधरगूढार्थदीपिकायां रोग[ग]णनाध्यायः। समाप्तोऽयं प्रथमः खण्डः समाप्तः।

4739. अनुपानमञ्जरी सस्तबका

OPENING :

श्रीगुरुभ्यो नमः।

यस्य ज्ञानमयी मूर्त्ति(:) सच्चिदानन्दकारिणी।
तत्पादपंकजं वन्दे ग्रन्थसम्पूर्तिहेतवे ॥१॥

ये प्रभूनी ज्ञानमयी मूर्ति छे चिद् ते ज्ञान तेहनी आनन्दकारक छे तेह प्रभूना चरणकमल वांदी नइं संपूर्ण ग्रंथ थाइ तेहनइं हेतें।

CLOSING :

संवदष्टादशे वर्षे सागरा नेत्र चाधिके।
चैत्रसिते च पञ्चम्यां गुरुवारे च ग्रन्थकृत् ॥३६॥
......जुंनपुरे तत्र वासी सदा किल।

COLOPHON :

गुरुजीवाभिधानस्य गच्छ चागमसंज्ञिकः ॥४०॥
तस्य पीताम्बरो शिष्यस्तस्माद् वंदकं सदा।
देवगुरुप्रसादेन विश्राम ग्रन्थकारकः ॥४१॥

इति अनुपानमंजर्यां धातुरूपधातुमारणम्।
......नुपानप्रकरणं नाम पञ्चम स......॥५॥

Post-Colophonic

पंडितप्रवर श्री ५ देवराजजी तत्शिष्य खीमचंद ल०

4740. अमृतमञ्जरी (अजोर्णमञ्जरी)

OPENING :

श्रीगणेशाय नम.।

अथ अजीर्णमञ्जरी लिख्यते।

श्रीमदायुर्विदो विप्रा नत्वा कुर्वन्ति बोधये।
अजीर्णरसमञ्जर्यां वक्ष्येऽहं लोकहेतवे ॥१॥

CLOSING :

पद्यैर्मुनीनामनवद्यपद्या श्रीकाशीनाथेन शिशोः सुखाय।
स्फुटीकृताऽजीर्णविषापहन्त्री जीयाच्चिरायामृतमंजरीयम् ॥५१॥

COLOPHON :

इति श्रीकाशीराजविरचिता अमृतमञ्जरी समाप्ता।

4742. उड्डीशकल्पः

OPENING :

श्रीगणेशाय नमः।

श्रीमत्सर्वज्ञपादाम्बुजयुग[मम]ल सेवितं संश्व[सन्न]गेन्द्रैः,
साक्षात्त्रैलोक्यपद्यां निवसति सततं पूजितं शुभ्रपद्मैः ॥

भक्त्या देवेन्द्रनेत्रं व्रजमधुपमुदा चुम्बितं चित्ररूपं,
वन्देऽहं सत्फणीन्द्रं स्तुतिरवरटितं श्रेयसे शर्मसिद्धौ ॥१॥

× × ×

अथातः संप्रवक्ष्यामि उड्डीशं ज्ञानमुत्तमम् ।
व्याधिदारिद्रहरणं जरामृत्युविनाशनम् ॥४॥

CLOSING: कृष्णसुना नवानीतं लिप्यं युग्मांह्रिपादुका ।
कूठातनजलोपरि क्षिप्रं भ्राम्यति लोकस्य कौतुकं परमम् ॥३६॥

COLOPHON: इति श्रीउड्डीशकल्पं सम्पूर्णम् शुभमस्तु ।

Post-Colophonic लिखितं मीस्र रामनारायनः पठनार्थं लाला घासीराम वयाने मध्ये कातिक शुक्ला ४ भृगुवासरे संवत् १९२७ रां म

4758. चिकित्साकलिका

OPENING: न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित् ।
अतः प्रयोगकार्यार्थं मानमत्रोच्यते मया ॥१॥

CLOSING: व्याघ्री बृहत्पंशुमती स्वदंष्ट्रा,
संयुक्तमेभिरिति तत्कथितं कनीयः ।
पित्तानि लोल्वणविकारहरं गणाभ्या-
माभ्यां भवेदिति गणो दशमूलसंज्ञः ॥१८॥

COLOPHON: इति गणपाठश्चिकित्साकलिकायाः श्रीः स्तात् सर्वेषाम् ।

4760. ज्वरतिमिरभास्करः

OPENING (f. 2) ·········षु ऋषभं तद्वदन्नेषु चूर्णकम् ।
गोधूमे कुंकुमाख्यं च नीलिकां सलिलेषु च ॥

OPENING: सर्वौषधीषु ज्योतिष्कं लतासु ग्रन्थिकं तथा ।
ऊषरं क्षेत्रभूमीषु पर्वतेषु शिलाजतु ।
पर्वासंज्ञं प्रसूनेषु शाके विन्द्यान्मधूपकम् ।

CLOSING: देशे श्रीमेदपाटे रसयुगशरभूमानवर्षे दशम्यां,
शुक्लायामाश्विनस्य त्रिदशगुरुदिने योगिनीपत्तनस्थः ।
भूपे श्रीराजमल्ले विलसति वसुधामण्डले कुम्भसूनुः,
कायस्थचामुण्डनामा ज्वरतिमिरहरं भास्करं संव्यधत्त ।

COLOPHON: इति श्रीचामुण्डकृते ज्वरतिमिरभास्करे ज्वरोपद्रवः चिकित्साशास्त्रपरिपूर्णता नाम षोडशोध्यायः ॥१६॥

Post-Colophonic संवत् १७४३ वर्षे भाद्रवा वदि ६ दिने सोमवासरे लिखितं । पुस्तकं लिखितं । ग्रंथश्लोकसंख्या १२८५ । श्रीरस्तु । लेखकयोः शुभं भवतु ।

4761. तैलपरीक्षा सटीका

OPENING : पूर्वस्यां वर्द्धते बिन्दुः तैलस्य प्रसरो यदि।
आरोग्यतां तदा नूनं रोगा नैवायुप त्रुटि ॥
पूर्वदिसि तेल को विंदु प्रस करै तो रोगी को रा(रो)ग जाई ॥१॥

CLOSING: श्वेतोत्पलं यदा मूत्रे दृश्यते परिवेष्टितम्।
चिकित्सा तस्य कर्त्तव्या कथिता रुद्रयामले ॥१५॥
मूत्र मांहि कमलो आकार दीसै तो रोगी मरई नही ॥

COLOPHON: इति तैलपरिषा टीका संपूरणम्। श्रीरस्तु। कल्याणमस्तु। श्री।

4765 त्रिशती

OPENING : श्रीगणेशाय नमः।
प्रणम्य बटुकं देवं सर्वसिद्धिफलप्रदम्।
सर्वेषां धाममाश्रित्य त्रिशती वक्ष्यते मया ॥१॥

CLOSING : ज्ञात्वैवं सर्वतन्त्राणि दासेन स्वल्पविस्तरात्।
सर्वलोकहितार्थाय कृता त्रिशतिका शुभा ॥३०२॥

COLOPHON: इति श्रीजगुपण्डिततनयवासकृतायां त्रिशतिकायां रसायनवाजीकरणं समाप्तं।

Post-Colophonic संवदि १८५६ वैशाष शुदि १४ रविवारे लिखितं देवदत चिरंजी संकर पठनार्थं।

4775. द्रव्यावली-समुच्चयः

OPENING श्रीगणेशाय नमः।
कृष्णाविषेऽरिष्टविदारकाय तुभ्यं जगल्लोचनलोपनाय।
श्रीपार्श्वनाथाय सनातनाय नमो नमस्ते पुरुषोत्तमाय ॥१॥
अनन्तपारस्य विगृह्य गृह्यात् सारं चिकित्सागमसागरस्य।
उक्तो मया सम्प्रति कल्पयोगा द्रव्यावली नाम समुच्चयोऽयम् ॥२॥

CLOSING : इति द······रखिलं नि···ज्ञानमुत्तमम्।
भिषजार्थं बुद्धिवृद्धयर्थं धन्वन्तरै(रि)विनिर्मितम् ॥१॥
इति धन्वन्तरिकृतौ गुणनाम निघण्टुः समाप्तः।
अयं कृतो महेन्द्रेण वैद्यकृष्णस्य सूनुना।
सूत्रसम्बन्धवर्गाद्यो निघण्टुः स गुणोत्तरः ॥१॥

COLOPHON: इति श्रीनिर्घण्टुद्रव्यावली सम्पूर्णम्।

Post-Colophonic संवत् १७०९ वर्षे चैत्रशुक्लपूर्णमास्यां सोमवासरे। लिखितं उदयपुरमध्ये। श्रेयोऽस्तुः। लेखपाठकयोः। शुभं भवतु। कल्याणमस्तु। श्रीरस्तु।

4784. पथ्यलंघननिर्णय:

OPENING :

श्रीगणेशाय नमः ।

श्रीसर्वज्ञं नमस्कुर्वे तापत्रयनिवारकम् ।
चतुर्गतिप्रहर्त्तारं सर्वसौख्यप्रदायकम् ॥१॥

\+ + +

महोपाध्यायतिलकान् श्रीदयातिलकाभिधान् ।
सद्गुरून् ज्ञानदान् विज्ञान् प्रणमामि मुहुर्मुहुः ॥३॥

\+ + +

ब्रह्मेशौ गरुडध्वजो भृगुसुतो भारद्वजो गौतमो,
हारीतश्चरकोऽत्रिकः सुरगुरुर्धन्वन्तरिर्माधवः ।
नासत्यो नकुलः पराशरमुनिर्दामोदरो वाग्भटो,
येऽन्ये वैद्यविशारदा मुनिवरास्तेभ्यः परेभ्यो नमः ॥८॥
आत्रेयधन्वतरिसुश्रुतानां नासत्यहारीतकमाधवानाम् ।
सुषेणदामोदरवाग्भटानां दस्रस्वयम्भूचरकादिकानाम् ॥६॥
विलोक्य शास्त्राणि ततो हृतानि पद्यान्यवद्यानि लिखामि नूनम् ।
तत्तन्निबन्धेष्वकृतश्रमाणां, सुभावुकानां भिषजां हिताय ॥१०॥

CLOSING :

द्विनन्दमुनिभूवर्षे (१७९२) माघमासे शुभे दले ।
शुक्ले प्रतिपदायां च भृगोश्चैव तु वासरे ॥१०॥
श्रीजयपुरवरे रम्ये राज्ये जयसिंहभूपतेः ।
सम्पूर्णो हि कृतो ग्रंथः पथ्यलंघननिर्णयः ॥११॥
वाचकदीपचन्द्रेण वैद्यानां सुखहेतवे ।
कपोलकल्पनं नास्ति किञ्चिदत्र विलेखितम् ॥१२॥

× × ×

शरेभेन्दुभाग्वर्षे भाद्रे मास्यसिते दल ।
शंकरस्य तिथौ चन्द्रे पथ्यलंघननिर्णयः ॥
शंकराख्येण विप्रेण शोधितो बुध्यतां बुधैः ॥१४॥

COLOPHON :

इति श्रीपथ्यलंघननिर्णयः समाप्तः ।

Post-Colophonic

मि । चेत्रसुदि १२ । सं० १९३७ पं० तिलकसौभाग्येन लिपीकृतम् ।

4789 पथ्यापथ्यविबोधकः

OPENING :

श्रीधन्वन्तराय नमः ।

नत्वैकं विश्वरूपं त्रिभुवनशरणं स्वर्गमोक्षैकहेतुं,
शंभुं वाग्देवतां च व्यवहरति यथा विश्वमेतन्नितान्तम् ।

यस्या ध्यानप्रसादात् प्रभवति पुरुषः सर्वकार्यस्य सिद्धि,
कर्तुं तं देववन्द्यं स्फुरदुरगवरास्फारभारं गणेशम् ॥१॥
भारद्वाजपवित्रगोत्रतिलकश्रीपद्मनाभोऽभवद्,
वेदव्याकृतिनाटिकागमकथालङ्कारपारंगमः ।
तत्पुत्रो गुणभूषितश्चमभवत् सारंगनामा भिषक्,
येन प्राणगदो गदैरपहृतोऽसौ सर्वविद्यालयः ॥२॥
तत्पुत्रकेयदेवोऽस्ति वैद्यविद्याविशारदः ।
नाम रत्नाकरो येन कृतोऽन्यो नामसागरः ॥३॥
नाम रत्नाकरोक्तानां द्रव्याणां च रसादिषु ।
ग्रन्थोऽयं क्रियते तेन पथ्यापथ्यविबोधकः ॥४॥

COLOPHON : इति श्रीवैद्यकेयदेवविरचिते पथ्यापथ्यविबोधके मिश्रवर्गे अष्टमप्रभावः समाप्तोयं निघंटुः ।

Post-Colophonic संवत् ऋषिवसुव्यसनभूप्रमितवर्षे अश्वनि सुदि ११ एकादशी कर्मवाटयां शुभं भवतु ।

4791. प्रकारान्तर-बालग्रह चिकित्सा

OPENING श्रीपार्श्वनाथाय नमः ।
अथापि ग्रन्थान्तराद् बालग्रहचिकित्सा कथ्यते—
नमस्कृत्य जिनेन्द्रस्य चरणाम्भोरुहद्वयम् ।
ग्रहाणां विकृतेः शान्तिं वक्ष्ये बालनिरोधिनाम् ॥१॥

CLOSING पूज्यपादमिदं लिख्य शिशोर्वलिविधानकम् ।
शान्तिकं पौष्टिकं चैव कुर्यात्क्रमसमन्वितम् ॥

COLOPHON इति प्रकारान्तरबालग्रहः समाप्तम् ।

4801. बह्मकल्पः

OPENING: ओं श्रीरामाय नमः । ओं महादेव उवाच । ओम् ।
शृणु षण्मुख तत्त्वेन रहस्यं दुर्लभं परम् ।
मोक्षस्यार्थं च काम्यार्थं कार्यार्थं च विशेषतः ॥१॥
ब्रह्मवृक्षस्य बीजानि विक्रणो कृत बुद्धिमान् ।
अथ धात्रीरस्येनैव अजाक्षीरेण भावयेत् ॥२॥

CLOSING: एवमेतं[तन्]मयाख्यातं तव स्नेहेन षण्मुख ।
रसायनपरं दिव्यं त्रिदशैरपि दुर्लभम् ॥११॥ [५२]

COLOPHON इति श्रीब्रह्मकल्पः ॥११॥

4810. योगचिन्तामणिः सबालावबोधः

OPENING:

नमः श्रीविघ्नच्छिदे

यत्र वित्रासमायान्ति तेजांसि च तमांसि च ।
महीयस्तदहं वन्दे चिदानन्दमहं महः ।।१।।

× × ×

पाक-चूर्ण-गुटी-क्वाथ-घृत-तैल-समिश्रकाः ।
अध्यायाः सप्त वक्ष्यन्ते ग्रन्थेऽस्मिन् सारसंग्रहे ।।४।।

प्राप्ताः प्रसिद्ध[ाः]सर्वत्र सुखबोधाश्च ते यतः ।
अतः··············पाठैः संगृह्यते मया ।।५।।

COLOPHON श्रीमन्नागपुरीयतपोगणराजश्रीहर्षकीर्त्तिसूरिसंकलिते श्रीयोगचिन्तामणौ वैद्यकसार-संग्रहे मिश्रकाध्यायः सप्तमः सम्पूर्णः ।

श्रीबृहत्खरतरगच्छीयवाचनाचार्यरतनराजगणिशिष्यगणक·········यनरसिंहकृतः बालावबोधः समाप्तः श्रीयोगचिन्तामणिनामा वैद्यक सम्पूर्णः

Post-Colophonic: संवत् १७२४ वर्षे कार्तिक सुदि २ बुधवारे श्रीकालूग्रामे पं० रंगविमललिखितं शुभं भवतुः ।।श्रीरस्तुः।।

4816. योगरत्नसमुच्चयः

OPENING:
(f. 104)

··························नकस्य च ।
नामाश्चतुः पलान् कृत्वा सूक्ष्मेलाया···वस्तथा ।।९।।
सितोपला सहस्रं च चूर्णितं तुलयाधिकम् ।
तैलस्याद्वौढकं तत्र दद्यात् त्रीणि च सर्षपा ।।१०।।

CLOSING: इति तीसटसुतचन्द्रटविरचिते योगरत्नसमुच्चये गदश्य(शा)न्त्याधिकारे विषशान्त्या-धिकारे विषतन्त्रं समाप्तं ।छ।

अथातो रसायनतन्त्रं व्याख्यास्यामः ।छः

पूर्वे वयसि मध्ये वा मानुषस्य रसायनम् ।
प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोरहा ।।१।।

× × ×

हरीतकीनां चूर्णानि सैन्धवामलकं गुडम् ।
बचा विडंगरजनी पिप्पली विश्वभेषजम् ।।३।।
पिवेदुष्णाम्भसा जन्तुः स्नेहस्वेदोपपादितः ।
तेन शुद्धशरीराय कृतसंसर्ज·········

4825 राजमार्त्तण्डप्रयोगसार:

OPENING : श्रीगणेशाय नमः । श्रीधन्वन्तराय नमः ।

नीलस्निग्धगिरीन्द्रजालकलतासंबंधबद्धस्पृह-
शीतांशुद्युतिशुभ्रदंष्ट्रवदनः प्रोत्सर्पदुग्रध्वनिः ।
लीलोदस्तकरप्रहारदमितोद्दामद्विपेन्द्रश्रियं,
दिश्याद् वोऽग्निशिखापिशंगनयनश्चण्डीशपञ्चाननः ॥१॥
दृष्ट्वा रोगैः समग्रैर्जनमखिलमिमं सर्वतः पीड्यमानं,
रोगाणां संग्रहोऽयं नृपतिशतशिरोऽह्विता येन राज्ञा ।
कारुण्यात् संनिबद्धस्फुटपदपदवीं सुन्दरोद्दामबन्धै-
र्वृत्तैर्वृत्त(श)त्रुप्रथमनपटुता राजमार्तण्डनामा ॥२॥

CLOSING : समस्तपाथोदधिवीचिसंचय-
प्रवर्तितांदोलितदिव्यकीर्तिता ।
प्रकाशितो भोजनृपेण देहिनां,
हिताय नानाविधयोगसंग्रहः ॥४३६॥

COLOPHON : इति श्रीमन्महाराजविरचितो राजमार्तण्डप्रयोगसारः संपूर्णः ।

Post-Colophonic लिखितं लक्ष्मीनारायणेन भक्तवरस्य पठनार्थं । मीति फाल्गुनशुक्ला ६ षष्ठ्यां गुरुवासरे संवत् १९४२ का शाके १८०७ का । श्रीरस्तु । कल्याणमस्तु । श्रीधन्वन्तरये नमो नमः ॥श्रीः॥

4827. रामनिदानम्

OPENING : श्रीजिनाय नमः ।

अथ रामनिदान लिख्यते—

श्रियं स दद्यात् भवतां जिनेन्द्र यदाप्तस्याद्वादसुधासमुद्र ।
येन निर्दिष्टभवा रुजापहृत्, सिद्धौषधं पथ्यनिमित्तकारणम् ॥१॥

श्रीजिनदत्तसूरीशं सूरिः कुशलसंज्ञकम् ।
सद्गुरुं धर्मशीलं च वाग्देवीं प्रणमाम्यहम् ॥२॥

निदानं सर्वरोगाणां आचक्षेऽहं समासतः ।
बालानां सुखबोधाय निदानं रामसंज्ञकम् ॥३॥

आत्रेय निजपुत्राय नाभेय जिनपुंगवम् ।
शिक्षितमायुर्ज्ञानार्थं तत्सारं अत्र संग्रहम् ॥४॥

CLOSING : शिरा छेदात् शुक्ररोधात् जन्मात् क्लैव्यं च पंचधा ।
शिराछेदी जन्मक्लैव्यः असाध्यो पंच कष्टकृत् ॥१२॥ [६१२]

4831. विद्वन्मुखमण्डनसारसंग्रहः

श्रीगुरुभ्यो नमः । धनंतरायः ।

पथ्या पञ्चपलान्येकः मजा ज्या मिरचानि च ।
पिपलि पिपलीमूलं चविकचित्रनागरैः ॥
पलानि वृद्धया क्रमशो जवक्षारो पलद्वयम् ।
भल्लातिक पलान्यष्टो कन्दस्थ द्विगुणोत्तमाः ॥२॥

CLOSING : (f. 62) इति मंजिष्ठादि ६४ । इति विद्वन्मुखमण्डने वा० श्रीविनयमेरुगणिविरचितायां सारसंग्रहो नामः क्वाथाधिकार सप्तरो·········

(f. 66) इति श्रीविद्वन्मुखमण्डने सारसंग्रहो नाम मस्तकरोगाधिकारसारोद्धारः समाप्तः । अथ रोगाधिकार प्रारम्यते ।

दधिमधुनवनीतं पिप्पलीशृङ्गबेरैः
मिरचदपि च कुष्टं चा·········

4832. वेगराजविवेकः

OPENING : श्रीगणेशाय नमः ।

अथ कर्मविपाक लिख्यते रोगानां तत्प्रतीकार·····रामाह । अथ कर्मविपाकाभिप्रायेण ज्वरहेतुमाह तत्प्रतीकारं च यथा गर्गः—

जन्मनि ये भूयः क्रूराः पिशुनसंयुताः ।
ज्वरवन्तश्च सततं विभवत्यन्यजन्मनि ।

CLOSING : दृष्टे तु यत्र विदुषां न पुनर्व्यपेक्षा
शास्त्रान्तरे भवति कर्मविवेचनाय ।
तं वेगराजनृपति सहस्राणिबन्धं
सत्कर्मवान् मयुक्तं व्यदिशद्वरेण्यः ॥

COLOPHON इति श्रीवेगराजविवेकाख्ये निबन्धे ज्योतिःशास्त्रे ऽऽयुर्वेदकर्मविपाकपरिच्छेदः समाप्तोऽयम् ।

Post-Colophonic संवत् १८७८ मिती ज्येष्ठशुक्ले ५ रवौ लिखितं विजैगच्छे सुमतिसागरा राज्ये ऋ० संतोषरामजी ऋ० तेजरामजी तत्शिष्य ऋ० सरूपचंदस्य स्वपठनार्थं वा परोपकाराय शुभं मांगल्यं भव ।

4855. वैद्यजीवनं सटीकम्

OPENING : श्रीगणेशाय नमः

व्याख्या—लोलिम्मराज कविशिष्टाचारमंगीकृत्य प्रारब्धग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं श्रीकृष्णमर्थयन्नाशीर्वादात्मकं मंगलमातनोति-प्रकृतीति ।

प्रकृतिसुभगगात्रं प्रीतिपात्रं रमायाः,
दिशतु किमपि धाम श्यामलं मंगलं वः ।

Ct. COLOPHON इति श्रीमन्मनोहरसूनुना गोमिश्रना हरिनाथकृतायां वैद्यजीवनटीकायां पंचमो विलासः संपूर्णम् ।

Post-Colophonic मीति चैत्रकृष्ण ६ सं० १८८६ ।

4888. हितोपदेश-वैद्यकशास्त्रम्

OPENING: श्रीगणेशाय नमः ।

गजाननं ब्रह्महरिं च रुद्रं उमागुरुं वृद्धधनंतरिं च ।
प्रणम्य भक्त्या शिरसा सदैव मनोरमायोगमहं प्रवक्ष्ये ॥१॥
भुवनत्रय आदि जगज्जननी सुरराज्यप्रदा अरिपक्षहरी ।
सकला जनवुद्धि हृदिस्थितया प्रणिपत्य मया त्रिपुरा वरदा ॥२॥

COLOPHON : इति श्रीहितोपदेशे शिवपण्डितविरचिते वैद्यकशास्त्रे बालरोग-स्त्रीरोगनामा एकादशसमुद्देशः ॥११॥

Post-Colophonic: संवत् १८७० वर्षे पौषमासे शुक्लपक्षे एकादशीतिथौ रविवासरे रैणिकानग्रे लिपि ऋषिजी श्री श्री १०८ श्री श्री मणिरुपजी तत्शिष्य पेमचंद्रस्य ग्रंथ पूर्णकृतोयम् ।

4901. शालिहोत्रं सटीकम्

OPENING : श्रीमते रामाय नमः ।

प्रणम्य शंकरं भक्त्या शंकरं सर्वदेहिनाम् ।
शिवाय जगतो जातां शिवां चापि विशेषतः ॥१॥

सुखाववोधशब्दार्थग्रन्थविस्तरवर्जिता ।
लक्षणं वाजिदेहस्थं संक्षेपेण यथाक्रमम् ।२॥

चिकित्सा च समासेन सिद्धौषधिसमन्विता ।
मुनिप्रोक्तानि शास्त्राणि सम्यगालोच्य वाजिनाम् ॥३॥

श्रीमद्विजयदत्तस्य पुत्रेण क्रियतेऽधुना ।
श्रीमता जयदत्तेन वाहानां हितमिच्छता ॥४॥

अध्यायानां यथायोगं षष्टयष्टाधिकसंख्यया ।
श्लोकानां च सहस्रेण शताष्टकयुतेन च ॥५॥

CLOSING : इति जयदत्तकृतेऽश्वशास्त्रे वयोज्ञानं पंचमोऽध्यायः ॥५॥

दशा दशकमश्वानां जीवितं परिकीर्तितम् ।
प्रमाणं वाजिनामेतद् ब्रह्मणा सृजता प्रजाः ॥१॥

अर्थ—दश दशा घोडां को जीवित आयुबंल को प्रमाण ब्रह्माये कह्यो प्रजा-सृष्टिः..........

4915 बीजवासनाभाष्यम्

OPENING : (f. 20)

······ज्य० उक्तवद्व्यवकलनफलेन ३ भाव्यमित्युपपन्नम्। च्युतं शून्यतस्तद्विपर्यासमेतीति। एवं योज्ययोजकयोर्वियोज्यवियोजकयोश्च धनत्वप्रकल्पयुक्तिरुक्ता-तयोभयो ऋणत्वमपि प्रकल्प दृष्टव्या। एकस्य धनत्वमितरस्यर्णत्वमिति कल्पने तूपचयापचयोरन्यथात्वेनोपपत्तिर्द्रष्टव्येत्यलं विस्तरेण।

COLOPHON

इति श्रीमन्मार्त्तण्डात्मजप्रकटस्थगोकुलग्रामनिवासी श्रीमत्प्रचण्डपाण्डित्यमण्डितो-द्दण्डपण्डितमण्डलीमण्डनबलभद्रभट्टात्मजमाधवभट्टसुतव्रजनाथभट्टसूनुना गणकमण्डलीमण्डनेन ज्योतिर्विन्नितान्ततोषहेतवे विरचितं बीजवासनाभाष्यं सकलसन्देहापनोददक्षं श्रीमत्प्रचण्डप्रतापसार्वभौमरामसिंहराज्येऽम्बावत्यां अम्बिकेश्वरपुर्यामिंकात्र नृप १६०६ मिते शाके चैत्रशुक्लपक्षे गुरौ सप्तम्यां समाप्तिमगमत्।

Post-Colophonic

संवत् १७७६ शाके १६४१ प्रथम आश्विनकृष्ण १२ सोमे लि० इन्द्रमणिना।

4926 रेखागणितम्

OPENING :

श्रीगणेशाय नमः।

गणाधिपं सुरार्चितं समस्तकामदं नृणाम्।
प्रशस्तभूतिभूषितं स्मरामि विघ्नवारणम्॥१॥

× × ×

श्रीगोविन्दसमाह्वयादिविबुधाग्वृन्दाटवीनिर्गतान्-
यस्तत्रैव निराकुलं शुचिमनो भावस्स्वभक्त्याऽनयत्।
म्लेक्षान्मानसमुन्नतान्स्वतरसा निर्जित्य भूमण्डले,
जीयाच्छ्रीजयसिंहदेवनृपतिः श्रीराजराजेश्वरः॥३॥

करं जनार्द्दनं नाम दूरीकृत्य स्वतेजसा।
भ्राजते दुःसहोऽरीणां यथा ग्रैष्मो दिवाकरः॥३॥

येनेष्टं वाजपेयाद्यैर्महादानानि षोडश।
दत्तानि द्विजवर्येभ्यो गोग्रामगजवाजिनः॥५॥

तस्य श्रीजयसिंहस्य तुष्टयै रचयति स्फुटम्।
द्विजस्सम्राट्जगन्नाथो रेखागणितमुत्तमम्॥६॥

अपूर्वं विहितं शास्त्रं यत्र कोणावबोधनात्।
क्षेत्रेषु जायते सम्यग्व्युत्पत्तिर्गणिते तथा॥७॥

CLOSING :

शिल्पशास्त्रमिदं प्रोक्तं ब्रह्मणा विश्वकर्मणे।
पारम्पर्यवशादेतदागतं धरणीतले॥१॥

तदुच्छिन्नं महाराज-जयसिंहाज्ञया पुनः।
प्रकाशितं मया सम्यक् गणकानन्दहेतवे॥२॥

COLOPHON: श्रीमद्राजाधिराजप्रभुवरजयसिंहस्य तुष्टचै द्विजेन्द्रः,
श्रीमत्सम्राट् जगन्नाथ इति समभिधारूढितेन प्रणीते ।
ग्रन्थेऽस्मिन्नाम्नि रेखागणित इति सुकोणावबोधप्रदात–
र्यध्यायोऽध्येतृमोहाय ह इह विरतिं षन्नसंख्यो गतोऽभूत् ॥ समाप्तोऽयं ग्रन्थः ।

Post-Colophonic भाद्रपदकृष्ण १२ सं० १६२० लि० बद्रीनाथगौड ब्रा०

4929 लीलावतीगणितपाटी सटीका

OPENING: श्रीसूर्याय नमः ।

नत्वाब्जिजापतिगणेशसरस्वतीनां,
पादाम्बुजानि परशूपपदो हि रामः ।
लीलावतीविवरणं प्रकरोति तच्च,
विद्वज्जनाः स्वमतितः परिशोधयन्तु ॥१॥

शिष्टाचाराद्देवतानमस्काररूपं मंगलमाचरन्प्रयोजनाभिधेये प्रतिजानीते —
प्रीतिं भक्तजनस्य यो जनयते विघ्नं विनिघ्नं स्मृत-
स्तं वृन्दारकवृन्दवन्दितपदं नत्वा मतंगाननम् ।
पाटीं सद्गणितस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुटां,
संक्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीम् ॥१॥

CLOSING: अष्टौ व्याकरणानि सप्तभिषजां व्याचक्षते संहिताः,
षट्तर्कं गणितानि पञ्च चतुरो वेदानधीते स्म यः ।
तन्त्राणां त्रितयं द्विपञ्च बुबुधे मीमांसयोरन्तरं,
सद्ब्रह्मैकमगादगाधमहिमा योऽस्याः कविर्भास्करः ॥१३॥

COLOPHON: इति श्रीभास्कराचार्यविरचिता लीलावती नाम संज्ञापाटी समाप्ता । सूत्रसंख्या···
उदाहरणसंख्या···लीलावतीसटीकसंख्या ।
त्यक्तं न यत्र समपेक्षितमर्थजातं,
नो वा किमप्यनुपयुक्तमतं व्यलेखि ।
रामोत्तरेण परशूपपदेन तच्चं,
लीलावतीविवरणं कृतिनां मुदेऽस्तु ।

इति श्रीहर्षसूनु-परशुरामस्य कृतौ लीलावतीविवरणेऽङ्कपाशः समाप्तः ।
शुभं वो भवतु ।

Post-Colophonic नागे बह्नौ व्योमवस्वीन्दुसंख्ये वर्षे मासे स्यान्नभः कृष्णपक्षे ।
अष्टम्यां वै सौरिवारान्विते द्राक् दुर्गादत्तो मूरजित्को लिलेख ।
शुभं भूयात् ।

4930 लीलावती-टीका 'गणितामृतकूपिका'

OPENING: (f. 3) ···–···नने यस्य तमेवंविधमतिस्थूलतरं कुंभकर्णं विनिघ्नन् नाशयन् भक्त-

जनस्य लक्ष्मणविभीषणादिप्रमुखस्य प्रीतिं संतोषं जनयते । + + + + वन्दितं चरणारविन्दं यस्य स तथा । शेषाणि पाटीविशेषणानि इत्यलमतिविस्तरेण ॥१॥

COLOPHON इति श्रीमद्दैवज्ञपण्डितसूर्यविरचितायां गणितामृतकूपिकायां लीलावतीविवृतौ श्रीघटीव्यवहारः । श्रीशः शरणम् ।

वन्दे तं देवसंदेहसंदोहहरणक्षमम् ।
प्रभुं प्रभूतविभवं भवानीभवमन्वहम् ॥

4931 लीलावतीटीका 'मनोज्ञा'

OPENING: श्रों श्रीगणेशाय नमः ।

ज्योतिर्लोचन इन्दुमौलिरखिलान्प्रासूत लोकानिमां-
स्तां देवीं निजवामकायकलितां स्वाङ्के दधत् पुत्रकौ ।
गङ्गामूर्द्ध(नि)यश्च दिङ्मितकरं सन्तोष(य)न् दिक्पतीन्,
दिश्याद्वो वरदानतः स च शिवस्तुष्यञ्छिवं सर्वदा ॥१॥
भगवन्तसिंहजलधेर्जातः श्रीबाणसिंहविधुः ।
सम्प्राप्तजीविकस्तस्मात् काश्यां रामकृष्णबुधः ॥२॥
दुर्गमटीकातोऽहं हिताय बोधाय जनतायाः ।
लीलावतीविवरणं सुमनोरंजनमिदं तनुवे ॥३॥

CLOSING: लीलावती सुगहना शक्या नैव कथंचन ।
उपायेन वशीकर्तुमिति सर्वत्र निश्चितम् ॥१॥
आपदेवसुतत्वेन धृत्वोभयसमांशकम् ।
मनोरञ्जनमात्रेण रामकृष्णस्तथाऽकरोत् ॥२॥
आत्रेयगोत्रे सुतरां पवित्रे गोपालदेवो विबुधारिदेवात् ।
अभूदभूमिः प्रतिवादजन्मनां पराभवानां भुवनैकमान्यः ॥३॥
तस्मादभूच्छास्त्रविदां वरिष्ठः श्रीनीलकण्ठोऽर्चितनीलकण्ठः ।
तस्माद्भूत् पण्डितमण्डलीजित् श्रीश्रीपतिः श्रीपतिसक्तचेताः ॥
शेषपन्नगगवी रुचिरैकसक्ता तर्कनीतिरदनोपनिषत्सुवक्षा ।
ज्योतिषानयननेत्रमनोभिरामच्छन्दसां चितिपदा सकलागमांगी ॥५॥

+ + +

सदाशिवोऽस्ति तत्पुत्रः समर्चितसदाशिवः ।
शब्दधर्मनयाभिज्ञ आपदेवापराभिधः ॥७॥
तदंगजन्मना रामकृष्णदेवेन निर्मितम् ।
लीलावतीविवरणं मनोरञ्जनसंज्ञकम् ॥८॥
संप्रार्थयेऽहं सततं कृताञ्जलिर्निर्मत्सरा ये निवसन्ति लोके ।
संशोध्य संशोध्य कृतिं मदीयां विपश्चितस्ते परिशीलयन्तु ॥९॥

COLOPHON इति श्रीमद्विद्वन्मुकुटमाणिक्यपदवाक्यप्रमाणपारावारीणधुरीणश्रीमन्नीलकण्ठ-देवात्मजसकलविद्यानिधानश्रीमच्छ्रीपतिदेवात्मजश्रीमच्छदाशिवदेवापराभिधानश्रीमदा-पदेवसुतभवानीगर्भजरामकृष्णदेवनिर्मिते लीलावतीविवरणे मनोरञ्जनाभिधेऽङ्कपाशा-धिकारः समाप्तः ।

4932. लीलावतीगणितपाटी 'पद्यानुवाद'सहिता

OPENING: अथ लीलावतीभाषा लिख्यते

दोहा— प्रणमि सिरीगुरु के चरण, बुद्धिप्रकाश सुहेत ।
सूत्र अरथ लीलावती, भाषामय लिख लेत ॥१॥

पाटी लीलावती रची, पंडित भास्कर सूरि ।
सूत्र अरथ भाषा थकी, रहै चित्त भर पूरि ॥२॥

COLOPHON: इति श्रीभास्करीयसिद्धान्तसिरोमणेः पाटीलीलावती की भाषा अमीचन्द्रेण श्रावग अजमेरा गोत्रेण बुधि अनुसारेण श्रीजयनगरे रचिता ।

दोहा— संवत अष्टादस सतक, नवनवतो अधिकाय ।
सुकल दौजि आषाढ की, रची सुमंगल दाय ॥

Post-Colophonic: पुस्तग की नकल उतारी मोतीलाल सेट लखमीचंद का पडवा वास्तै मीती जेठ वुदि १० संबत् १६२५ का तांई । समाप्त भद्रीया मे दस्कत प्रथम अमंचंद मोतीलाल लीखमीचंद का सुभं भूयात् ।

4933. सिद्धान्तशिरोमणि-गणितपाटी

OPENING: अथ बीजगणितपाटी लिख्यते ।

उत्पादकं यत्प्रवदन्ति बुद्धेरधिष्ठितं सत्पुरुषेण सांख्याः ।
व्यक्तस्य कृत्स्नस्य तदेकबीजमव्यक्तमीशं गणितं च वन्दे ॥१॥
पूर्वं प्रोक्तं व्यक्तमव्यक्तबीजं प्रायः प्रश्ना नो विना व्यक्तयुक्त्या ।
ज्ञातुं शक्या मंदधीभिर्नितान्तं यस्मात्तस्मात् वच्मि बीजक्रियां च । २॥

CLOSING: आसीन् महेश्वर इति प्रथितः पृथिव्या-
माचार्यवर्यपदवीं विदुषां प्रयातः ।
लब्धावबोधकलिकां तत एव चक्रे
तज्जेन बीजगणितं लघुभास्करेण ॥१॥

ब्रह्माह्वयश्रीधरपद्मनाभ बीजानि यस्मादतिविस्तृतानि ।
आदाय तत्सारमकारि नूनं सद्युक्तियुक्तं लघुशिष्यतुष्टयै ॥२॥

× × +

गणकभणितिरम्यं बाललीलावगम्यं सकलगणितसारं सोपपत्तिप्रकारम् ।
इति बहुगुणयुक्तं सर्वदोषैर्विमुक्तं गणकमिति विवृद्धयै लभ्यिदं प्रौढसिद्धयै ॥९॥

COLOPHON : इति श्रीभास्कराचार्यविरचिते सिद्धान्तशिरोमणौ बीजगणिताध्याय: समाप्त: ।

Post-Colophonic संवत् १८६६ वर्षे मार्गशिरे मासे शुक्लपक्षे ५ पंचमी भानुवारे अमीचन्द्रेण श्रावग अजमेरा वैद्यगोत्रेण स्वपठनार्थमलिखत् यस्मात्पुस्तकात् गणितप्रधानपण्डित-रामबकसब्राह्मणसकाशात् सुभं भूयात् सवाई जयपुरमध्ये ।।

4940. सिद्धान्तशिरोमणि: (बीजगणितम्) 'बालबोधिनी'टीकासहित:

OPENING : श्रीगणेशाय नम:। ओं वरदमूर्तिर्जयति । ओं

महेशानं गौरीगणपतियुतं शुद्धमनसा,
प्रणम्य ज्ञानाम्भोनिधिमथ गुरुं कायवचसा ।
कृपारामो मिश्र: प्रकुरुत ऋजुं बीजगणिते,
अबोध: ध्वान्तौघ: प्रहरणपरोदाहृतिमिमाम् ।।१।।

CLOSING : देशे गुर्जरनाम्नि धाम्नि यशस: स्थानेऽमदावादके
भारद्वाजकुलप्रसूतिरभवत् मोढद्विजौघाग्रणी: ।
विद्यावेदकलामलाचलगति: स्युर्जन्मनि बो जिता,(?)
मिश्र: श्रीमदमन्दवन्दितपदद्वन्द्वश्चतुर्वेदिक: ।१।।
लक्ष्मीनारायण इति मतिख्यातकीर्त्तिर्धरित्र्यां,
तस्यात्मासीत् गगनगगतिज्ञाननिर्वाण एव ।
सूनुस्तस्याध्ययनविधिनोपात्तसिद्धान्तविद्यो,
लक्ष्मीनाथान्निजगुरुवराच्छ्रीकृपारामनामा ।।२।।
भुवनात्यष्टिमेशोंके सुनभ: पूर्णिमा गुरौ ।
बीजस्योदाहृतिमिमामकरोद् बालबोधिनीम् ।।३।।

COLOPHON: इति श्रीगुर्जरब्राह्मणमोढचातुर्वेदीमिश्रलक्ष्मीनारायणात्मजमिश्रकृपारामदैवज्ञ-विरचिते बीजोदाहरणे बालबोधिन्याख्यग्रन्थं समाप्तम् ।

Post-Colophonic सवत् १८६४ पौषशुक्लप्रतिपदि गुरौ लिखितं व्रजवा(सि)सिल्लु: काश्यां ललिता-घट्टे श्रीगुरुभीष्ममिश्रप्रसादात् सांबसदाशिवाय नम:, ढुंढिराजाय नम:, भैरवाय नम: ।।

4941. सिद्धान्तशिरोमणि:(बीजगणितम्) कल्पावतारटीकासहित:

OPENING : श्रीकृष्णाय नम: । सिद्धि: श्रीगणेशाय नम: ।

शिवयोर्भजनातिगौरवाद् यरसुतलीलाधृतकुञ्जरास्यरूपम् ।
अपहन्तु ममान्तरं तमस्तत्सततानन्दमय महोमहीय: ।।१।।

× × +

कदापि नैव संभ्रम: स्थितश्च भौममण्डले ।
अपूर्वमार्गमाश्रयन् जयत्यपूर्वभास्कर: ।।५।।

आसीदसीमगुणरत्ननिधानकुम्भः,
कुम्भोद्भवाभरणदिग्ललनाललामः।
आशंशवाजितविशेषकलानुवर्ती,
श्रीकेशवः सुगणितागमचक्रवर्ती ॥६॥
तस्मादभूद् भुवनभूषणभूतमूर्तिः,
श्रीमानगण्यगुणगौरवगेयकीर्तिः।
ज्योतिर्विदागमगुरुर्गुरुसम्प्रदाय-
प्रज्ञातशास्त्रहृदयः सदयो गणेशः ॥७॥
भ्रातुः सुतस्तस्य यथार्थनामा नृसिंह इत्यद्भुतरूपशोभः।
अवर्द्धयद् यो जगतामभीष्टं प्रह्लादमाश्चर्यकरः सुराणाम् ॥८॥
तच्छिष्यो विष्णुनामा स जयति जगती जागरूकप्रतिष्ठः,
शिष्टानामग्रगण्यः सुभणितगणितानायविद्याशरण्यः।
यद्वक्त्रोन्मुक्तमुक्ताफलविमलवचो वीचिमालागलन्तो,
द्वित्राः सिद्धान्तलेशा जगति विदधतेऽज्ञेऽपि सार्वज्ञगर्वम् ॥९॥
तस्मादधीत्य विधिवद् त्रिस्कन्धं ज्योतिषं गुरोः।
कृष्णो दैवविदां श्रेष्ठस्तनुते बीजपल्लवम् ॥१०॥
अव्यक्तत्वादिदं बीजमित्युक्तं शास्त्रकर्तृभिः।
तद्व्यक्तीकरणं शक्यं न विना गुर्वनुग्रहम् ॥११॥

CLOSING : रूपकस्य नोपायश्च हरभक्ता यस्य कृतिरित्यादिवक्ष्यमाण ऊह्यः। मन्दैस्तु हर-भक्तेति स्थानेऽव्यक्तांकभक्तेति पठित्वा वक्ष्यमाणविधिना रूपाणि कल्प्यानि। शे..................

4942. सिद्धान्तशिरोमणिः (बीजगणितम्) 'मरीचि'टीकासहितः

OPENING : श्रीगणेशाय नमः। श्रीगुरुसमर्थः

नित्यानन्दज्ञानरूपं महोदं, विश्वाज्ञानध्वान्तविध्वंसदक्षम्।
श्रीकृष्णाख्यं सर्वदाभीष्टसिद्ध्यै ध्यायामीशं सर्वगं सर्वहेतुम् ॥१॥
अथोत्तरार्द्धं गुरुरामकृष्णपितृव्यपादाब्जयुगप्रसादात्।
व्याख्यायते सद्गणकाभितुष्ट्यै प्रज्ञानुसारेण मुनीश्वरेण ॥२॥

CLOSING : द्विखण्डयोगान्मणिमितमार्यो न जातु हर्तुं धिषणां दधातु।
यतोऽस्य शुद्धा खलु विश्वरूपप्रकाशिनी चारुतरा मरीचिः ॥१॥
गंगाभैशिलन[ग]राद्गोदावर्यनुगतीद्रयायायातः।
एलचपुरपमदेशे तटे पयोधाः शुभे दधिग्रामे ॥१॥
ज्योतिर्विद्याविद्भिः सकलैः शिरसा सदा बुधैः धार्यः।
व्यजयत यजुःश्रुतिज्ञो गणकश्चिन्तामणिर्नाम्ना ॥२॥

× × ×

सोऽजनयत् सीतायां त्रिमल्लसंज्ञं सुतं विनीतायाम् ।
येन सदा विनयेन प्रकाशितं नाम भुवि नयेन ॥४॥
वल्लालस्तत्तनयः सदैव यः कविवरेषु दत्तनयः ।
अपहाय स्वग्रामं काश्यामागाद् भजन् सविष्टग्रामम् ॥५॥

× × ×

गौरीवल्लभपादपंकजमिलन्माधीसस्वादनया,
साछात(क्षात्)कारणयः श्रुतिस्मृतिरतो गोविन्दविज्ञानुजः ।
ग्रन्थे योऽर्ककृतेऽकरोद् विवरणं मूलप्रकाशे महा-
देवस्याग्रजनिगृंहस्थकमलः श्रीरङ्गनाथोऽभवत् ॥१०॥
तस्यात्मजो गुरुकृपाजनितावबोधः,
शास्त्रं विभाव्य निखिलं महतादरेण ।
श्रीभास्करोदितशिरोमणिगूढभाव-
व्याख्यां मुनीश्वरकृपी कृतवान् मरीचिः(म्) ॥११॥
शको भूयुतो नन्दभूहृत्फलस्य निरेकस्य मूलं नि ऐकं भवेद्भ्रान्तदघंम् ।
भवेन्मासदं दूनितोयं तिथि द्यूनिता पक्षवारौ भवेताम् ॥१२॥
नक्षत्रवारतिथिपक्षयुतिश्च योगो,
विश्वैर्युताखिलयुतः यदमभ्रवेदाः ।
अस्या यदात्र परिपूर्तिमितो मरीचिः,
श्रीवासुदेवगणकाग्रजनिर्मितोऽयम् ॥१३॥

× × ×

कायेन वाचा मनसाभाश्रीजगन्नाथ...... ......।
तवार्चने स्यादिमं सदा पूरय मत्फलाशाम् ॥२४॥

COLOPHON : इति श्रीसकलगणकसार्वभौमवल्लालदैवज्ञात्मजरंगनाथगणकतमयुतो(मुनी)श्वरा-परनामकगणकविश्वरूपविरचितः सिद्धान्तशिरोमणिमरीचिः समाप्तिमगमत्

स्वांगबाणधरणीमितशाके चन्द्रवारसितपक्षश[भे]हि ।
लेखितं गणकदर्शनहेतोरुत्तरार्द्धमिदमात्ममरीचेः ॥१॥

4943. सौरवासना

OPENING: श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीसूर्याय नमः । श्रीगुरुचरणारविन्दाभ्यां नमः

ब्रह्माण्डगोलोदरगं खसंस्थं भान्तं समस्तं जलगोलरूपम् ।
यत्तैजसं भाति यतः सदा तं नारायणं मण्डलगं नमामि ॥१॥
भट्टार्यभास्कराद्यैः प्राक् सौरार्थो नाशितोस्त्यतः ।
वदाम्यहं विदां तुष्टयै सुबोधां सौरवासनाम् ॥२॥

यस्या प्रसादतस्तत्त्वविवेको रचितो मया ।
सत्योद्बोधकरी इ(धा)र्हा सैवेयं सौरवासना ॥१॥

× × ×

परोपकाराय कृतं मयैषा तज्ज्ञत्वमेवासितवांघ्रिपद्मे ।
प्रतोऽर्पिता स्या: परबोधवृद्धयै कृपां कुरु त्वं मयि सु(प्र)पूर्णा ॥

COLOPHON : इति श्रीसकलगणकसार्वभौमश्रीमन्नृसिंहदैवज्ञात्मजकमलाकरविरचिता दशाधिका-रान्तपूर्वखण्ड-सौरवासना सम्पूर्णा ।

Post-Colophonic संवत् १८०० मासोत्तममासे चैत्रमासे शुभे शुक्लपक्षे तिथौ ६ बुधवासरे लिखतं हेमराज आचार्य नगर सवाई जैपुरमध्ये लिखायतं·········रामजी आत्मपठनार्थम् । शुभं भवेत् । कल्याणमस्तु । श्रीरस्तु ।

4949. सूर्यसिद्धान्तः सटीकः

OPENING श्रीगणेशाय नमः । श्रीनृसिंहाय नमः । श्रीगुरुभ्यो नमः । श्रीसरस्वत्यै नमः ।

प्रत्यूहव्यूहविध्वंसकारणाय महात्मने ।
गणेशाय नमस्तस्मै जगतामेकसाक्षिणे ॥१॥

× × ×

नरैरर्थावबोधार्थमुपाया बहवः कृताः ।
वासनावगमार्थाय नृसिंहेन वितन्यते ॥३॥

× × ×

श्रीब्रह्मगुप्तगणकार्यवराहलल्ल-
सत्केशवार्यगुरुवर्यगणेश्वराणाम् ।
श्रीभास्करस्य विविधात् गणितप्रबन्धा-
नभ्यस्य मे मतिलता विततैव जाता ॥६॥
श्रीविष्णुसंज्ञकपितृव्यमुखारविन्दा-
न्मल्लारिसंज्ञवदनादधिगत्य विद्याम् ।
सौरागमाब्धितरणाय नृणां करोमि,
भाष्यप्लवं बहुविचारविशेषरम्यम् ॥७॥

CLOSING स्वाज्ञानादिति । भास्करोदितमसद्ब्रूते स एवाबुधः । तत्र तेषामयमभिप्रायः भास्करेणैव पलप्रभाव्यासदलेन निघ्नीदिग्ज्योद्धृतानां पलभ्यां प्रकल्पितस्योदाहरणा-वसरेऽभिहितं यदाक्रान्तिज्यापूर्णं । तदा खगुणश्चिन्त्यश्च शेषविधावित्यादिना कार्या तदर्थं क्रान्तिगणितोक्तया शून्यपरिभाषया अग्रासमशंक्वादीनि साधितानि । अन्येषामनु-पाताश्रं क्वचिन्न दुष्यतीति ।

4950. सूर्यसिद्धान्तः 'किरणावली'टीकोपेतः

OPENING:

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः ।

प्रणिपत्य परं ब्रह्म सूर्याशयमहोदधेः ।
सारचन्द्रं समुद्धृत्य करोमि किरणावलीम् ॥१॥
चित्तपावनजातीयमाधवांगभवः सुधीः ।
दादाभाई समालोच्य वराहादिकृतीः स्फुटाः ॥२॥

CLOSING:

ज्ञानप्रदेति नयनत्रयभूषितेति,
त्वामद्रिराजतनये विबुधाः भजन्ति ॥१४॥
यं स्तुवन्ति जन्मतः श्लोकैर्द्वादशभिः क्रमात् ।
त्वामम्ब प्राप्य वाक्सिद्धिं प्राप्नुयुस्ते परां श्रियम् ॥१५॥

4951. सूर्यसिद्धान्तस्य 'गहनार्थप्रकाशिका'

OPENING:

श्रीगणेशाय नमः

अनर्चनाद् यस्य महेश्वरोपि कार्येषु धत्ते विभुतां न जातु ।
तं विघ्नविच्छित्तिकरं गणेशं सिन्दूरपूरारुणमानमामि ॥ १ ॥
गोदातीरे भाति गोलाभिविद्धि गोलग्रामो विप्रधामाभिरामः ।
तत्रासन् मे पूर्वजाः यज्ञभासः सिद्धान्तानां एभ्य एव प्रकाशः ॥२॥
स्वात्मानुरागविभवेन समस्तलोक-
मारञ्जयन्बुधजनस्पृहणीयमूर्तिः ।
सद्वृत्ततादिरमणीयगुणाभिरामो,
रामो बभूव गणितज्ञसुमौलिरत्नम् ॥३॥

× × ×

उद्वासयन्निखिललोकमहान्धकारं,
विद्यासहस्रकिरणैरभितः प्रकाशः ।
सिद्धान्ततत्त्वविशदीकरणप्रवीण-
स्तस्मादजायत दिवाकरनामधेयः ॥५॥

× × ×

तस्यानुजो गणकशास्त्रविचारचित्ता,
श्रीविश्वनाथचरणाम्बुजदत्तचित्तः ।
नत्वा परापरगुरूनथ विश्वनाथः,
सूर्योक्तिभावमधुना विशदीकरोति ॥१०॥
अमलगणकविद्योद्दामसन्दर्भकर्ता,
द्विजकुलतिलकोऽयं विश्वनाथाभिधानः ।

रचयति वहुचञ्चत्सूर्यसिद्धान्तटीकां,
विशदगणितिभावोदाहृतिं भावनीया ॥११॥

अस्योपपत्तिर्गणकैर्विलोक्या नृसिंहदैवज्ञकृतातिरम्या।
विचारसञ्चारचमत्कृतिर्या विदग्धकण्ठाभरणीकरोति ॥१२॥

CLOSING: विश्वनाथेन रचिता गहनार्थप्रकाशिका।
चतुर्दशी ह्यभवत्तस्यां शिखा मानाधिकारिणी।
सूर्यसिद्धान्तप्रदर्शनमर्हाणि············।
विश्वनाथो विरचयद् गहनार्थप्रकाशिकाम्।

COLOPHON: इति श्रीदिवाकरदैवज्ञात्मजश्रीविश्वनाथदैवज्ञविरचिते सूर्यसिद्धान्तसोदाहरण-व्याख्याने गहनार्थप्रकाशके मानाध्यायः समाप्तः।

ग्रन्थसमाप्तौ क्वचित्पुस्तके बीज्य(ज)साधनोपायस्तु दृश्यत इति कारणानि, ते—
यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद् वेदांगशास्त्राणां गणितं मूर्द्धनि स्थितम् ॥१॥
न देयं तत् कृतघ्नाय वेदलिप्तावकाय च
अर्थलुब्धाय मूर्खाय साहका·········।

Post-Colophonic संवत् १६१२ तत्र ज्येष्ठमासे बुधवार लिखितं रामजीवण शुभं भूयात् ।श्री।

4952. सूर्यसिद्धान्तस्य 'गूढार्थप्रकाशिका' टीका

OPENING: श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः। श्रीसूर्याय नमः। श्री

यत्स्मृत्वाऽभीष्टकार्यस्य निर्विघ्नां सिद्धिमेष्यति।
नरस्तं बुद्धिदं वन्दे वक्रतुण्डं शिवोद्भवम् ॥१॥

पितरौ गोजिवल्लालौ जयतोऽम्बाशिवात्मकौ।
याभ्यां पञ्च सुता जाता ज्योतिःसंसाध्यहेतवः ॥२॥

सार्वभौमजहांगीरविश्वासास्पदभाषणम्।
यस्य तं भ्रातरं कृष्णं बुधं वन्दे जगद्गुरुम् ॥३॥

नानाग्रन्थान् समालोच्य सूर्यसिद्धान्तटिप्पणम्।
करोमि रंगनाथोऽहं तद्गूढार्थप्रकाशकम् ॥४॥

CLOSING: रंगनाथेन रचिते सूर्यसिद्धान्तटिप्पणे।
पाताधिकारः पूर्णोऽयं तद्गूढार्थप्रकाशके ॥१॥

सूर्यसिद्धान्तगूढार्थप्रकाशकमिदं दलम्।
रंगनाथकृतं दृष्ट्वा लभन्तां गणकाः सुखम् ॥२॥

इति श्रीसकलगण[क] सार्वभौमवल्लालदैवज्ञात्मज रंगनाथगणकविरचिते गूढार्थ-प्रकाशके पूर्वखण्डं परिपूर्तिमगमत् ।

Post-Colophonic श्री संवत् १६०९ चैत्रशुक्ल ७ शुक्रवार, ग्रंथसंख्या ४०००

4986. करणकुतूहलं 'नार्मदा'टीकोपेतम्

OPENING (ct.) श्रीगणेशाय नमः । श्री गुरवे नमः ।

ज्ञातुं सदुक्तिलवयु[ग्]विवृतिं तु शिष्यैः,
सम्प्रार्थितोऽल्पविदपि प्रतिपद्य सूक्तिम् ।
श्रीभास्करोदितपितामहतुल्यकर्ण-
वृत्तिं विधातुममलामहमुद्यतोऽस्मि ॥१॥

गणेशं नार्मदं तातं गुरुं सूर्यं सरस्वतीम् ।
प्रणम्य पद्मनाभोऽहं कुर्वे टीकां सवासनाम् ॥१॥

(w.) गणेशं गिरं पद्मजन्माच्युतेशान् ग्रहान् भास्करो भास्करादींश्च नत्वा ।
लघुप्रक्रियं प्रस्फुटं खेटकर्म प्रवक्ष्याम्यथ ब्रह्मसिद्धान्ततुल्यम् ॥

CLOSING (w.) आसीन् मज्जनधाम्नि विज्जडविडे शाण्डिल्यगोत्रो द्विजः,
श्रौतस्मार्तविचारसारचतुरः सौजन्यरत्नाकरः ।
ज्योतिर्वित्तिलको महेश्वर इति ख्यातः क्षितौ स्वैर्गुणै-
स्तत्सूनुः करणं कुतूहलमिदं चक्रे कविर्भास्करः ॥

COLOPHON : इति श्रीभास्कराचार्यविरचितब्रह्मतुल्यस्य श्रीनार्मदात्मजपद्मनाभविरचितायां नार्मदटीकायां ग्रहणसम्भवाधिकारो दशमः । श्रीरस्तु ।

सपार्पेदुचन्द्रौ यदा भिन्नगोलैर्विजातेर्युतिस्तुल्यजात्योर्वियोगः ।
यदा तुल्यगोलौ तदा त्वन्यथैवं शरक्रान्तिखण्डोत्थसंस्कारमार्गः ॥

श्रीविश्वनाथाय नमः ।

Post-Colophonic संवत् १७०० वर्षे पौष वदि पंचमी । श्रीमथुरामध्ये । लिखितं जटमल गौंड । शुभं भवतु । लिखावत योयसी नृसिंह । मांगल्यं ददात् । केशवजी सहायः ।

4987. करणकुतूहलं 'करणोदाहरण'टीकान्वितम्

OPENING : श्रीमदर्हं नमः । श्रीसद्गुरुभ्यो नमः ।

नत्वा देवं त्रिनेत्रं प्रकटितविभवं सर्वकर्त्तारमेकं,
श्रौतस्मार्त्तक्रियायां निपुणतरमते राघवस्यात्मजोऽहम् ।
ज्ञात्वा सिद्धान्ततत्त्वं सुगुरुवचनतः शिष्यशिक्षार्थमेताः(तत्),
चण्डीदासः सुबोधं करणमि(म)तितरां भास्करीयं करोति ॥१॥

COLOPHON — इति श्रीचण्डीदासविरचिते करणंकुतूहले सोदाहरणे माष्ये प्रश्नाध्यायस्तृतीयः। ।३। श्रीरस्तुः। सर्वदा श्रेयः।

Post-Colophonic — लिखितं च। नैंणसागरेण। श्री आकोला ग्रामे। श्रीः

4988. करणकुतूहलटीका

OPENING: श्रीसारदाय नमः। श्रीचतुर्विंशतिजिनपादपद्मेभ्यो नमः।

संवत् १६२३ वर्षे शा १४८९ प्रवर्त्तमाने वैशाख शुदि १३ चन्द्रे तद्दिने श्रीसूर्योदयात् गत घटी ५ पल ५५ समये जन्म। श्रीकरणंकुतूहले करणाब्धि ३८४ अर्कनिघ्नो जातम्।

CLOSING: क्षेपोग्रपडध्याय कारवेत्। प्रथमो हृतश्चैकेन पञ्चदशभिर्द्वितीयकः। एकत्रिंशन्हिगुणितं तृतीयं। सप्तदशश्च छः पञ्चको षष्ठे हृते या विंशत्या पंचधा षष्टि भागयेत् ।।२।।

ऊर्ध्वसप्तभागेन लब्धं ऊर्ध्वसंयुतम्।
त्रिस्थाने शेषं मिश्रं त्रिस्था निशा षग्रहगे ।।

COLOPHON: इति श्रीश्रीपटीपध्यटीका। इति श्रीब्रह्मतुल्ये टीपणिका यंत्रोऽधिकारो समाप्ता।

4995. कर्मविपाकः

OPENING: ॐ श्री नमो नारायणाय

अर्जुन उवाच—

केन पापे भवेदन्धः केन पापे दरिद्रता।
केन पापे भवेत्कुष्ठी कथं कस्य जनार्दन ।।१।।

श्रीभगवानुवाच—

प्रहारे रमते भवे अन्धा प्रद्रवेषु दरिद्रता।
पूर्वहत्या भवेत् कुष्ठी शृणु हो पाण्डुनन्दन ।।२।।

CLOSING: श्रीभगवानुवाच—

कासी क्रीयते पापं अंत्रगृही मुच्यते।
अंत्रगृही क्रियते पापं पञ्चक्रोशी मुच्यते ।।
पञ्चक्रोशं क्रीयते पापं वजं वर्णस्य लिप्यते ।।३२।।

COLOPHON — इति श्रीकृष्णार्जुनसंवादे कर्मविपाकं सम्पूर्णम् ।।

Post-Colophonic — गढ बदनोर्मध्ये लिखितं केसवदास। संवत्सर १८४४ राम राम

4997. कर्मविपाकसंहिता

OPENING: (f. 2) ....च मम प्रभुः ।।६।।

श्रीसूर्योवाच—

शृणु अरुण प्रवक्ष्यामि नराणां कर्मभावनाम्।
देशग्रामस्य वर्णानामाचरेत्कर्म शुभाशुभम् ।।७।।

CLOSING: कृतं कर्म विलयं याति हत्यादोषो न मुच्यते।

अरुणोवाच—

किं पुण्यमुच्यते पापं किं पुण्यं पुत्र जायते ।

श्रीसूर्योवाच—शुक्रवार ना व्रत करै वर्ष १ पश्चात् उद्यापन करै रूपा नो शुक्र करावै हरिवंसपुराण सांभलै स्वेत अश्व सपलाणो द्यै रूपो तोला ३ घूघरा घोड़ा नै गलै वांधै नालेर २१ स्वेत वस्त्र गज २५, कांसी सेर १ इतनो द्यै तो पाप उतरै न द्यै तीन जन्म ३ भोगवै ।

COLOPHON: इति श्रीरत्नपुराणे सूर्यार्णवसंवादे सप्तमोऽध्यायः ॥७॥ इति श्रीकर्मविपाक तिथि वार नक्षत्र जोगं करणं नामाक्षरं उभी युक्ता बाणमध्ये ततकाललग्नम् । श्रीरस्तुः ।

Post-Colophonic अथ लीखतं गोकुलचन्दः । जतीः कलकता बंदर मध्यैः । गुजराती लुंका छै । संवत् १९९५ । चेत्र वदः द्वादसी समाप्तंः । श्रीरस्तुः ।

5011. ग्रहलाघवम्

OPENING श्रीगणेशाय नमः ।

ज्योतिःप्रबोधजननी परिशोध्य चित्तं,
तत्सूक्तकर्मकरणैर्गहनार्थपूर्णा ।
स्वल्पाक्षरापि च तदंशकृतैरुपायै-
र्व्यक्तीकृता जयति केशववाक् श्रुतिश्च ॥६॥

CLOSING & COLOPHON

इति श्रीगणेशदैवज्ञविरचिते सिद्धान्तरहस्ये ग्रहलाघवे पाताधिकारः चतुर्दशमः ॥१४॥

पूर्वे प्रौढ़तराः क्वचित् किमपि यच्चक्रुर्धनुर्ज्ये विना,
ते तेनैव महातिगर्वकुभृदुत्संगेऽधिरोहन्ति हि ।
सिद्धान्तोक्तमिहाखिलं लघुकृतं हित्वा धनुर्ज्ये मया,
तद्गर्वो मयि नास्ति किन्न तदहं तच्छास्त्रतो वृद्धधीः ॥१ ।

नंदिग्राम इहापरान्तविषये शिष्यादिगीतस्तुति-
र्योऽभूत् कौशिकगोत्रजः सकलसच्छास्त्रार्थवित् केशवः ।
सूनुस्तस्य तदंघ्रिपद्मजन[नाल्] लब्धावबोधांशकं,
स्पष्टं वृत्तविचित्रमल्पकरणं चैतद् गणेशोऽकरोत् ॥२॥

इति श्रीग्रहलाघवे सर्वाधिकारसमाप्तिः । ग्रंथसंख्या श्लोक ४५०

Post-Colophonic सं० १७४५ वर्षे आश्विन वद १३ तिथौ लि० पं० समयनिधानेन । श्रीसरस्वतीपत्तने ।

5020. ग्रहलाघवं 'सिद्धान्तरहस्योदाहरण'टीकोपेतम्

OPENING: (f. 2) यतीति सा । किं कृत्वा चित्तं परिशोध्य चित्त मनः संशोध्य निश्चलीकृत्य परि-

शोध्य निर्मलीकृत्य । कैः तत्सूक्तकर्मचरणैः तेन केशवेन सुष्ठूक्तानि कर्माणि ग्रहकारकाणि तेषां चरणानि सदभ्यासस्तैः । तदुक्तग्रहकारकाणि ग्रहकौतुकादीनि सदभ्यस्य मनो निश्चलीकृत्य ग्रहादीनां प्रबोधो भवतीत्यर्थः ।

COLOPHON इति पातोदाहरणम् । इति श्रीविद्याकरदैवज्ञात्मजविश्वनाथदैवज्ञविरचिता ग्रहलाघवाख्यसिद्धान्तरहस्योदाहृतिः समाप्ता ।। श्रीः

Post-Colophonic: संवत् १८०० शाके १६६५ फाल्गुनमासे शुक्लपक्षे १० दशाम्यां रविवासरे लिखितं कल्हा केसोराय श्रीरूपनगरमध्ये सन्ध्यासमये समाप्तोऽयं ग्रन्थः । श्रीरस्तुः शुभं भवतुः ।

5101. ज्योतिषजन्मसारसंग्रहः

OPENING: (f. 2)

थी मरण उपजै ।।६।।

श्लोक—रिपुध्वंसकृद्भास्करो यस्य षष्ठे तनोति व्ययं राजतो मित्रतोऽपि ।
कुले मातुलाऽपि(त्तिश्च)च्चतुःपादतो वा प्रयाणे निषादैर्विवाद करोति ।।७।।

टीका—वैरि नो नास हुइः जिणरै छटै सूर्य तिण रैः राजा रा कुल थि मित्राइः धनवंत थायः सत्यंः मामा नै पक्षै हाणि करैः चौपद कि हांणिः चालतां वाटै भीलांदिक थि बोलवो पडै ।।७।।

COLOPHON इति श्रीरामनारायणविरचितं ज्योतिग् जन्मसारसंग्रहः ग्रन्थः समाप्तम् ।

Post-Colophonic लिखितं गरू मोति । सं० १८६६ वर्षे मृगसर मदी ८ भृगुवारे ।

5102. ज्योतिषमकरन्दः

श्रीगणेशाय नमः

OPENING:

श्रीमच्छिवात् समधिगत्य वरप्रसादं,
वृत्तांशुभिर्विवरणाभिनवारविन्दम् ।
एतद्दिवाकरविकासितमार्यवर्य-
भृङ्गा भजन्तु मकरन्दपिपासवो ये ।।१।।

CLOSING:

पर्वादिपद्यप्रतिपादनेन पुरातनोक्तादपि सद्विशेषम् ।
नूनन्वनोक्तान्नरसिंहसूनुप्रणीतमंगीकरणीयमार्यैः ।।

बालोदितेऽपि बहुसुन्दरविस्तृतार्थे,
तुष्टिं भजन्तु सुहृदो गतमत्सरा ये ।
आकस्मिकं खलु सतां हृदयेषु लग्नः
सौख्यानि पंजरसुकल्पवचस्तनोति ।।

इति मकरन्द सम्पूर्णं ।

5103. ज्योतिषमणिमाला

OPENING: श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः।

श्रेयः श्रीत्रिजगेशपादकमलं नत्वा त्रिसंध्यं मुदा
वेधोजा जडधीस्तमोपहरणी सद्बुद्धिसंवर्द्धनी।
तस्याः पादसरोजयुग्मत्रिविधं ध्यायामि पद्मावतीं,
विद्याबुद्धिसुधर्मदं स्वकगुरुश्रेयस्कृतेऽहं भजे ॥१॥
उमाजं खेचरान्नत्वा पूर्वग्रन्थगतं मतम्।
विलोक्य मणिमालाख्यं ज्योतिःशास्त्रं करोम्यहम् ॥२॥
प्रमोदशीलस्य गुरून्नत्वा मात सखी तदा।
हरिनाथस्य पुत्रेण क्रियते मणिमालिका ॥३॥
योगाभिधानमुत्पत्तिः श्रीमतादिक्रमेण च।
मुहूर्त्तसकलान् वक्ष्ये यथाबुद्धिप्रमाणतः ॥४१॥

CLOSING: जन्माभिधानकेशव गुरुणा दत्तं च देवशीलश्च।
तस्य श्रीगुरुचरणं नत्वा 'मणिमालिका' कृत्वा ॥१६॥

शार्दूलविक्रीडितम्

संवच्चाभ्रयुगांगचन्द्रसमये माशा (आषा) ढमासे सिते,
पक्षे पञ्चमिशुक्रवारकरभे सौभाग्ययोगान्विते।
औदीच्यो हरिनाथवंशतिलकस्तस्यात्मजः केशवः,
तस्य स्वात्मजश्रीकमस्य पठनात्मार्थे च कृत्वा मुदा ॥२०॥

COLOPHON: इति श्री केशवविरचितायां ज्योतिषमणिमालायां गोधूलिकलग्नाधिकारो सप्तदशमस्तवकः १७। श्रीयोतिषग्रन्थे मणिमाला ग्रन्थ समाप्तमिति।

Post-Colophonic: संवत् १७६८ वर्षे शाके १६३३ फलगुनमासे कृष्णपक्षे पर्वणी ३ तिथौ बुद्धवासरे मुनि विबुधर्क्षणाल्लेखि। वाच्यमानो चिरं नन्द्यात्।

5117. ज्योतिषरत्नमाला सटीका

OPENING: Ct. अथ विवाहप्रकरणम्। अथ विवाहलग्नस्य प्राबल्यं तज्जातकादीनामानर्थं किंप्रसंगः सत्यं यज्जातके शुभाशुभफलमुक्तं तस्य विवाहे तत्कालग्रहसंस्थानेनाधिक्यं न्यूनता वा भवति तथा च बृहज्जातके।

CLOSING (Ct.) शश्वद्वाक्यप्रमाणप्र[व]णपटुमतेर्वेदवेदाङ्गवेत्तुः,
सूनुः श्रीलूणिगस्याच्युतचरणनतिः श्रीमहादेवनामा।
तत्प्रोक्ते रत्नमालारुचिरविवरणे ज्ञानदीपाख्यशास्त्रे
आतृव्यत्वप्रसिद्धे प्रकरणममरस्थापनं विंशमेतत् ॥२०॥

श्रीजाप्ययालयवंशमौक्तिकमणिः श्रीकर्णभूभृत्सखो,
धीमान् बन्धुक इत्यसीममहिमाऽभूद्भूमिदेवाग्रणीः ।
सर्वज्ञस्तनयस्ततोऽस्य स महादेवाभिधोऽभूद् बुधो,
यश्चक्रे स्फुटशब्दसिद्धिममलां कालापकोद्बोधनीम् ।।१।।

सूनुस्तस्यामशर्मा गणकपरिवृढः पर्वशास्त्रान्तद्रष्टा-
ख्यातस्तस्यानुजस्त्वाजड इति विबुधो भीमभूपस्य मित्रम् ।
विद्वद्वृन्दैकवन्द्यस्तदनुज उदयद्बुद्धिनिर्ढूतमाह-
ख्यातः श्रीलूणिगाख्यो गरुडपतिपदि द्वन्द्वपद्मद्विरेफः ।।२।।

शरवसुशशिसोमैः ११६५ सम्मिते शाककाले
नभसि तिथिचतुर्थ्यामिन्दुपुत्रस्यवारे ।
निजमतिपरिणामा तत्तनूजेन तेन,
विवृतिरिति किल श्रीश्रीपतिप्रोक्तशास्त्रे ।।३।।

COLOPHON : इति श्रीपण्डितश्रीमहादेवविरचितं रत्नमालाविवरणं समाप्तम् ।

Post-Colophonic संवत् १८६८ । माघ शुक्लपूर्णिमासि भौमवासरः लिखितं भगीरथब्राह्मण सीतारामब्राह्मणार्थे श्रीगंगाविश्वेसर साहु ।

5122. ज्योतिषरत्नमाला बालावबोधसहिता

OPENING : श्रीसद्गुरुभ्यो नमः । श्रीगणेशाय नमः ।

श्लोकः—प्रभवविरतिमध्यज्ञानवंध्यानितान्तं,
विदितपरमतत्त्वं यत्र ते योगिनोऽपि ।
तमहमिह निमित्तं विश्वजन्माद्यनाथा-
मनुमभिवन्दे [तं]भग्रहि(हं)कालमीशम् ।।१।।

अरथ—रत्नमाला को अर्थ शगलाइं सु शमझावण रे वास्थे वार्त्ता लिखितं–तीय नु काल नु नमस्कार छे जीय काल री उत्पति विचिइ नही छैः हवो कोइ जोगीश्वरे नहीं जाणो जिके जोगीश्वरे आतमा नो तत्त्व जाण छे पण काल न जाणें इण संसार रो निमित्तकारण नही संसार री उत्पति स्थिति नही प्रल रो निमत्त कारण छ अन सगलाइ रो कारण छै काइ कस्येकाल छे पण प्रत्तथ नही पण नक्षत्र गृह राशि करे नइ अनुमान कीजेइ छे सो काल छे सगलाइ रो स्वामी छै ।

CLOSING : भ्रातूरद्यतनेति । अर्थ—श्रीपति आचार्य शघलाइ भला मांणसां ने केहे छे, भाइ मित्र आज रा सास्त्र देखे नवल मति करो शास्त्र छे सो अगम छे; मूंलगा शास्त्र मांहिलो छे ऋषिश्वरां कहियो छै तोने आधिको नही कीदो छे जको कयो छे आगला ऋषीश्वरां की आज्ञा प्रमाणे कीदी छें ।

COLOPHON : इति श्रीपतिभटविर[चि]तायां ज्योतिषरत्नमालायां उगणीस प्रकरण संपूर्णम् ।

Post-Colophonic: सवत् १८७१ वर्षे आसोज वीथी २ शनीवासरे मर्या गुलसनवेगजी राज्यः आपाजी वीठुल काज लिखतं ऋष खूबचंदजी शिस्य गंभीरचंदः वें मांणक्यचंदः खलची पुरेः शुसराविक शिवजीरामजी पोता लालजी चिरं भवः ।

5138. ज्योतिषसारः सस्तबकः

OPENING : श्रीसद्गुरुभ्यो नमः ।

तनु-धनु-सहज-सुहृत्सुत-रिपु-जाया-मृत्यु-धर्म-कर्म्मायुः ।
व्यये (य)लग्नाद्या भावात् द्वादश चिन्त्यं प्रयत्नेन ॥१॥

श्रीगणेशाय नमः । अथ वारै भवन रो विचारफलमाह—तनभवन १ धनुकुटंब भवन २ भाई पराक्रम भवन ३, सुख भवनां माता भवन, ४ पंचमं सुत विद्या भवनं ५ षष्ठं रिपु मामा भवनं ६ सप्तमं जाया वाणिज्य भवनं ७ अष्टमं मृत्यु छिद्र भवनं ८ धर्मभवनं भाग्य ९ दसमं कर्म पितृ भवनं १० लाभ भवन ११ खरच भवन १२ लग्न थकी द्वादश भाव बारै ई भाव विचारवा चिंतवा जत्नै करी विचारणा ।१।

CLOSING: जन्मलग्नमृत्युस्थाने वर्षलग्नः प्रजायते ।
तद्वर्षे हि ध्रुवं मृत्युः नात्र कार्या विचारणा ॥४१॥

Ct· जन्मलग्न आठमें ठिकांणें आवै वर्षलग्न में आवै तो ते पुरुष निश्चै मरण पांमै एह में कांई विचारवो नही पंडित कह्यो प्रकास्यो ॥४१॥

COLOPHON : इति श्री योतिषसार स०

5164. ताजिकनीलकण्ठी सटीका

श्रीगणेशाय नमः ।

चण्डीकुण्डलमाकलय्य कुतुकाद्दण्डाभशुण्डाग्रगं,
कृत्वा ताण्डवडम्बरे पशुपतेः खेलन् खलूच्छृङ्खलम् ।
चण्डांशोरिव मण्डलं तदपरं संदर्शयन्नम्बरे,
हेरम्बो जगदम्बिकां विहसयन् वः श्रेयसे गर्जताम् ॥१॥

दिवाकरो नाम बभूव विद्वान् दिवाकराभो गणितेषु मन्ये ।
स्वकल्पितैर्येन निबन्धवृन्दैर्बद्धं जगद्दर्शितविश्वरूपम् ॥२॥

तस्यात्मजाः पञ्च समा बभूवुः पञ्चेन्द्रकल्पा गणितागमेषु ।
पञ्चानना वादिगजेन्द्रभेदे पञ्चाग्निकल्पा द्विजकर्मणा च ॥३॥

× × ×

तस्यानुजः सम्प्रति विश्वनाथो विष्णुप्रसादाद् गुणसंभविष्णुः ।
सर्वज्ञदैवज्ञविलासविज्ञो नृसिंहतः साधितसर्वविद्यः ॥८॥

आसीद् वेदान्तवेदी स्मृतिनिगमपटुर्ग्रामणी गर्वभेत्ता,
·······ग्रन्थान्तराणां फणिपतिनिगमस्यापि वेत्ताधिकाशि ।

वक्ता श्रीनीलकण्ठात्मजभजनपटुर्नीलकण्ठः स चक्रे,
संज्ञातन्त्रं दुरूहं सकलशुभदृशां दुर्दशादर्शभूतम् ॥९॥
गोलातीरस्य गोलाभिधपुरवसतिः पार्थदेशैकभूपा,
संज्ञातन्त्रस्य टीकां व्यदधदभिनवां गद्यपद्यानवद्याम् ।
शश्वद्विश्वोपकृत्यै विशदतरतया दैवविद् विश्वनाथो,
ग्राम्याणां ग्रन्थभेत्ता ग्रहगणितविदामग्रगण्योप्यवर्गः ॥१०॥

COLOPHON इति श्रीदिवाकरदैवज्ञात्मजविश्वनाथदैवज्ञविरचिते श्रीनीलकण्ठज्योतिर्वित्कृत-संज्ञातन्त्रे सहमाध्यायस्य व्याख्योदाहृतिः समाप्ता ।

Post-Colophonic सं० १९१० शाके १७७५ पौष शुक्ल १५ शनौ शुभं भूयात् ।

5156. ताजिक-नीलकण्ठी 'रसाला'टीकासहिता

OPENING : श्रीगणेशाय नमः ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
